Government Oriental Library Series.

BIBLIOTHECA SANSKRITA—No. 17.

तैत्तिरीयसंहिता

भट्टभास्करमिश्रविरचितभाष्यसहिता.

THE TAITTIRÍYA SAMHITA

OF THE

KRISHNA YAJUR-VEDA

WITH THE

COMMENTARY OF BHATTABHA'SKARAMIS'RA.

Vol. IX.

(Kanda V—Prasnas 5 to 7)

EDITED BY

A. MAHA'DEVA S'A'STRI, B. A.,

Curator, Government Oriental Library, Mysore,

AND

PANDITARATNAM K. RANGA'CHA'RYA,

Pandit, Government Oriental Library, Mysore.

Published under the Authority of the Government of His Highness the Maharaja of Mysore.

MYSORE:

PRINTED AT THE GOVERNMENT BRANCH PRESS,

1898.

EDITORIAL NOTE.

The portion comprised in this Volume has been edited from a collation of the manuscript copies found in the Sarasvatî Bhandâra of H. H. the Mahârâja's Palace, Mysore, in the Sarasvatî-Mahal of the Tanjore Palace, and in the Sanskrit Library of the Sringeri Mutt at Kûdli.

A. M. S.

विषयसूचिका.

पञ्चमकाण्डे पञ्चमः प्रपाठकः.

	अनु.
अग्निचयनम्	१–१०
(५-१-८) विहितेषु पशुषु विशेषः, त्रिहविर्दीक्षणीयेष्टिश्च ...	१
अग्निचयनं, उख्यधारणम्	२
उखाहोमः, पुरुषशीर्षोपधानं, वामभृदिष्टकोपधानं च ...	३
रेतस्सिचामुपधानं, स्वयमातृण्णोपधानानन्तरहोमः समन्त्रकः, चित्यभिमर्शनं च	४
हिरण्येष्टकोपधानं, स्वयमातृण्णोपधानं, समन्त्रम् ...	५
अह्नां रूपाणामुपधानं, लोकंपृणोपधानं च ...	६
एकयूपविधिः, आक्रमणं प्रतीष्टकोपधानं, धनुर्दानं, अग्न्युपस्थानं समन्त्रम्	७
गायत्रसामादिना शिरआद्युपस्थानं, आत्मेष्टकोपधानं समन्त्रम् ..	८
संचिताहुतिचित्याद्रवणमन्त्राः सब्राह्मणाः, शतरुद्रीयहोमाङ्गं चरुनिधानं समन्त्रम्, सञ्चितप्रोक्षणं समन्त्रम् ...	९
सर्पाहुतिगन्धर्वाहुत्यग्निविमोकाहुतयस्समन्त्राः ...	१०
आश्वमेधिकाः पशुगणाः	११–२४

षष्ठः प्रपाठकः.

अग्निचयनम्	१–१०
कुम्भेष्टकोपधानमन्त्राः	१
कुम्भेष्टकोपधानविधिः, चरूपधानविधिश्च	२
भूतेष्टकाविधिः, अभिषेकविधिः, सौत्रामणीविधिश्च ...	३
दर्भस्तम्बहोमविधिस्समन्त्रः, चित्याग्निस्तुतिश्च ...	४
आग्नेयाष्टाकपालादिहविःपञ्चकविधिः	५
काण्ड्युपान्तदुपमोकादिप्रशंसा	६
दीक्षाकालविकल्पः	७

अन्वारोहणविधिस्समन्त्रः, यूपैकादशिन्यां विशेषविधिः, इष्टकासंख्यादिविधिः, रेतस्सिचां स्तुतिः, स्तुतशस्त्रदोहवाचनादिविधिस्समन्त्रः ... . अनु. ८
आसन्दीसादननिरूहणनिषेधादिः ९
ऋत्वादिद्वारा चयनस्तुतिः १०
आश्वमेधिकाः पशुगणाः ११–२३

सप्तमः प्रपाठकः.

अग्निचयनम् १–११
अभिमर्शनविधिः, हिरण्यपात्रदानं समन्त्रं, हिरण्यपात्रावेक्षणाश्चावघ्रापणादि च १
ऋषभप्राजापत्याज्यानीष्टकोपधानं उख्योपसमिन्धनं च समन्त्रम् २
वज्रिण्युपधानं समन्त्रकं, वसोर्धाराहोमस्समन्त्रः ... ३
अदाभ्यहोमादिविधिः, राष्ट्रभृदिष्टकाविधिस्समन्त्रः ... ४
उख्याग्न्यनुगमनप्रायश्चित्तं समन्त्रकं, पञ्चचितिस्तुतिः ... ५
व्रतविशेषविधिः, हिरण्येष्टकोपधानं समन्त्रकं, होमविशेषविधिस्समन्त्रः, मैत्रावरुण्यामिक्षाविधिः, अग्निस्तुतिश्च ... ६
समिष्टयजुर्होममन्त्राः ७
स्वयंचितिजपस्समन्त्रः कूर्मोपधानं च समन्त्रम्. चयनप्रशंसा च ८
अग्निग्रहणं समन्त्रकं हिरण्येष्टकोपधानं, चयनप्रशंसा च ... ९
पशुशिरसां विधिः १०
आश्वमेधिककाण्डम् ११–२६
अश्वाङ्गहोमविधिः ११–२३
हृदयानुमन्त्रणादिमन्त्राः २४–२६

हरिः ॐम्.

तैत्तिरीयसंहिता

भट्टभास्करीयभाष्ययुक्ता.

पञ्चमकाण्डः.

पञ्चमः प्रश्नः.

यदेकेन सꣳस्थापयति यज्ञस्य सन्तत्या अविच्छेदायैन्द्राः पशवो ये

[1]यत् । एकेन । सꣳस्थापयतीति सं–स्थापयति । यज्ञस्य । सन्तत्या इति सं–तत्यै । अविच्छेदायेत्यवि–छेदाय । ऐन्द्राः । पशवः । ये । मुष्क-

[1]अतः परमग्निकाण्डमेव अग्न्याधेयम् । एवं चतुर्थकाण्ड आम्नातानां मन्त्राणां परिसमाप्त्या इदानीं अग्निप्रयोगविहितान् कांश्चिद्धर्मविशेषान्वक्तुं द्वितीयं काण्डमारभ्यते । तत्र यदुक्तं 'अग्निभ्यः पशूनालभते'* इत्यारभ्य 'प्राजापत्येन संस्थापयति'* इत्यन्तेन पक्षद्वयमग्निभ्यः पशूनालभ्य तान् पर्यग्निकृतानुत्सृज्य प्राजापत्येनैव संस्थापयेत् सर्वेषां संस्थापयेदिति, तत्र वि-

*सं. ५-१-८.

मुष्करा यदैन्द्रास्सन्तोऽग्निभ्य आ-
लभ्यन्तै देवताभ्यस्समदं दधात्या-
ग्नेयीस्त्रिष्टुभौ याज्यानुवाक्याः कु-
र्याद्यदाग्नेयीस्तेनाग्नेया यत्त्रिष्टुभस्ते-

राः । यत् । ऐन्द्राः । सन्तः । अग्निभ्य इत्यग्नि-
भ्यः । आलभ्यन्त इत्या-लभ्यन्तै । देवताभ्यः ।
समदमितिं स-मदम् । दधाति । [2]आग्नेयीः । त्रि-
ष्टुभः । याज्यानुवाक्या इतिं याज्या-अनुवाक्याः ।
कुर्यात् । यत् । आग्नेयीः । तेन । आग्नेयाः । यत् ।
त्रिष्टुभः । तेन । ऐन्द्राः । समृद्ध्या इति सं-ऋ-

शेषविवक्षया प्रथमः पक्षोऽनूद्यते—यदेकेनेत्यादि ॥ यत्प्राजाप-
त्येनैकेन पशुना संस्थापयति यज्ञस्य सन्तत्यै साकल्येन निवृत्त्यर्थं
भवति । तच्चाविच्छेदार्थं मध्ये विच्छेदो माभूदिति । पर्याग्नि-
कृतानां उत्सर्गात् विच्छेदस्स्यात् प्राजापत्येन संस्थापनया तत्प-
रिह्रियत इति । अथ द्वितीये पक्षे विशेषमाह—ऐन्द्राः खल्वे-
ते पशवः ये मुष्कराः मुष्कवन्तः अनुत्पातितवृषणाः 'ऊषसुषि-
मुष्कमथो रः' इत्यादिना रः । ऐन्द्रास्सन्तो ये अग्निभ्यः आलभ्य-
न्ते संज्ञप्यन्ते च ते सर्वे देवताभ्यः समदं कलहं दधाति उत्पा-
दयति । इन्द्रस्याग्न्यादीनां च समानं माद्यन्त्यस्यामिति सम-
त्कलहः । क्विप्, 'समानस्य छन्दसि' इति सभावः ॥

[2]आग्नेयीरित्यादि ॥ गतम् ॥

नैन्द्रास्समर्द्ध्यै न देवताभ्यस्समदं
दधाति वायवे नियुत्वते तूपरमा लं-
भते तेजोऽग्नेर्वायुस्तेजस एष आ लं-
भ्यते तस्माद्यद्रियङ् वायुः॥१॥ वाति
तद्रियङ्ङग्निर्दहति स्वमेव तत्तेजोऽन्वे-

द्ध्यै । न । देवताभ्यः । समदमिति स—मदम् ।
दधाति । [3]वायवे । नियुत्वत इति नि—युत्वते । तू-
परम् । एति । लभते । तेजसः । अग्नेः । वायुः ।
तेजसे । एषः । एति । लभ्यते । तस्मात् । यद्रि-
यङ् । वायुः ॥ १ ॥ वाति । तद्रियङ् । अग्निः ।
दहति । स्वम् । एव । तत् । तेजसः । अन्विति ।

---

[3]अधुना तृतीयमपि पक्षं समर्थयति—वायवे नियुत्वत इति॥ सर्वेषामेतेषां स्थाने एक एव वायव्यः पशुस्तूपर आलभ्यते । तूपरः शृङ्गहीनः । तेज इति । तद्धेतुत्वात्ताच्छब्द्यम् । वायुना अभिध्यायमानो अग्निस्तेजस्वीभवति । तस्माद्यद्रियङ् यद्दिगभिमुखो वाति वायुः अग्निरपि तद्रियङ् तद्दिगभिमुखो दहति गच्छतीति यावत् । यदञ्चति तदञ्चतीति ऋत्विगादिना क्विन्, 'विष्वग्देवयोश्च' इत्यद्र्यादेशः । अद्रिसक्रियोरन्तोदात्तत्वनिपातः कृत्स्वरनिवृत्त्यर्थम्, 'क्विन्प्रत्ययस्य कुः' इति कुत्वम् । आत्मनस्तेजोहेतुत्वमनुगच्छति वायुः ॥

त्ति यन्न नियुत्वंते स्यादुन्मांद्येद-
जंमानो नियुत्वंते भवति यजंमान-
स्यानुंन्मादाय वायुमतीं श्वेतवंतीं
याज्यानुवाक्यें भवतस्सतेजस्त्वायं
हिरण्यगर्भस्समंवर्तताग्र इत्यांघार-

एति । [4]यत् । न । नियुत्वंत् इतिं नि–युत्वंते । स्यात् । उदितिं । माद्येत् । यजंमानः । नियुत्वंत् इतिं नि–युत्वंते । भवति । यजंमानस्य । अनुं-न्मादायेत्यनुंत्–मादाय । [5]वायुमती इतिं वायु–म-तीं । श्वेतवंती इतिं श्वेत–वती । याज्यानुवाक्यें इतिं याज्या–अनुवाक्यें । भवतः । सतेजस्त्वाये-तिं सतेजः–त्वायं । [6]हिरण्यगर्भ इतिं हिरण्य–ग-र्भः । समितिं । अवर्तत । अग्रें । इतिं । आघार-मित्यां–घारम् । एतिं । धारयति । प्रजापंतिरितिं

[4]यदिति ॥ केवलवायव्यत्वे यजमान उन्माद्येत् ॥

[5]वायुमतीति ॥ 'पीवोन्नान्'* इत्येवमाद्ये नियुत्वत्यौ श्वेत-वत्यौ 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । सतेजस्त्वायेति । स्वतोस्य तेजस्त्वात् ॥

[6]हिरण्यगर्भ इति ॥ स्रुचैव विधीयते । प्रजापतेरिति । एवं हि प्रजापतेरनुरूपत्वं भवतीति ।

*आ. २-८-१.

मा धारयति प्रजापतिर्वै हिरण्यग-
र्भः प्रजापतेरनुरूपत्वाय सर्वाणि वा
एष रूपाणि पशूनां प्रत्या लभ्यते
यच्छमश्रुणस्तत् ॥२॥ पुरुषाणा ꣳ रू-
पं यत्तूपरस्तदश्वानां यदन्यतोदन्त-
त्वां यदव्या इव शफास्तदवीनां य-

प्रजा–पतिः । वै । हिरण्यगर्भ इति हिरण्य–गर्भः ।
प्रजापतेरिति प्रजा–पतेः । अनुरूपत्वायेत्यनुरूप–
त्वाय । [7]सर्वाणि । वै । एषः । रूपाणि । पशू-
नाम् । प्रति । एति । लभ्यते । यत् । श्मश्रुणः ।
तत् ॥ २ ॥ पुरुषाणाम् । रूपम् । यत् । तूपरः ।
तत् । अश्वानाम् । यत् । अन्यतोदन्नित्यन्यतः–
दन्न् । तत् । गवाम् । यत् । अव्याः । इव । शफाः ।
तत् । अवीनाम् । यत् । अजः । तत् । अजा-

[7]सर्वाणीति ॥ पशूनां सर्वाणि रूपाणि प्रत्येषः य आल-
भ्यते प्राजापत्यान्नातमेवे*त्यर्थः । कथमित्याह—यदित्यादि । श्म-
श्रुणत्वात् पुरुषाणां रूपं प्रत्यालभते । तूपरत्वादश्वानाम् । अ-
न्यतोदत्त्वात् गवाम् । 'छन्दसि च' इति दद्भावः । अवितु-
ल्यशफत्वात् अवीनाम् । अजत्वात् अजानां सर्वेषाम् ॥

*आलभ्यते प्रत्यान्नातमेवे.

द्जस्तद्जानाँ वायुर्वै पंशूनां प्रियं धाम यद्वांयव्यो भवंत्येतमेवैनंमभि सँजानानाः पशव उपं तिष्ठन्ते वायव्यंः कार्या३ः प्राजापत्या३ इत्याहुर्यद्वांयव्यँ कुर्यात्प्रजापंतेरियाद्यत्प्राजापत्यं कुर्याद्वायोः ॥ ३ ॥ इयाद्यनांम् । [8]वायुः । वै । पशूनाम् । प्रियम् । धामं । यत् । वायव्यंः । भवंति । एतम् । एव । एनम् । अभीति । सज्ञानाना इति सं—ज्ञानानाः । पशवंः । उपेति । तिष्ठन्ते । [9]वायव्यंः । कार्या३ः । प्राजाप-त्या३ इति प्राजा—पत्या३ः । इति । आहुः । यत् । वायव्यंम् । कुर्यात् । प्रजापंतेरिति प्रजा—पतेः । इयात् । यत् । प्राजापत्यमिति प्राजा—पत्यम् । कुर्यात् । वायोः ॥ ३ ॥ इयात् । यत् । वायव्यंः ।

---

[8]वायुर्वा इति ॥ वृष्ट्यादिद्वारेणोत्पत्तिहेतुत्वात् पशूनां प्रियं स्थानम् । तस्माद्वायव्यत्वे एवमेकप्रियस्थानात्मकं वायुमेवाभिसज्ञानानाः प्रत्यभिजानन्तः पशव एवैनं पशव उपतिष्ठन्ते अतश्च सर्वपशुप्रत्याम्नातमितीदं पशोस्स्तुतिः ॥

[9]वायव्यार्थं प्राजापत्यस्य पशुपुरोडाशस्य विधानार्थं पशोर्विचारः । 'विचार्यमाणानाम्' इति प्लुतः । यदित्यादि ॥ इयात् अपगच्छेत् सम्बन्धोस्य न स्यात् तत्र पशोर्वायव्यत्वात् पशुपुरोडा-

द्वायव्यः पशुर्भवति तेन वायोर्नैति यत्प्राजापत्यः पुरोडाशो भवति तेन प्रजापतेर्नैति यद्वादशकपालस्तेन वैश्वानरान्नैत्याग्नावैष्णवमेकादशकपालं निर्वपति दीक्षिष्यमाणोऽग्निस्सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चारभतेऽग्निरवमो देवतानां वि-

पशुः । भवति । तेन । वायोः । न । एति । यत् । प्राजापत्य इति प्राजा–पत्यः । पुरोडाशः । भवति । तेन । प्रजापतेरिति प्रजा–पतेः । न । एति । यत् । द्वादशकपाल इति द्वादश–कपालः । तेन । वैश्वानरात् । न । एति । [10]आग्नावैष्णवमित्याग्नावैष्णवम् । एकादशकपालमित्येकादश–कपालम् । निरिति । वपति । दीक्षिष्यमाणः । अग्निः । सर्वाः । देवताः । विष्णुः । यज्ञः । देवताः । च । एव । यज्ञम् । च । एति । रभते । अग्निः । अवमः । दे-

---

शस्य च प्राजापत्यत्वात् दोषद्वयं परिहृतम् । इदं चापरमुच्यते तस्य पशुपुरोडाशस्य द्वादशकपालत्वात् वैश्वानरान्नापगमः ॥

[10]शाखान्तरे यद्वैश्वानरस्य पुरोडाशं तदप्येतेनोपसंहृतमिति दर्शयति—आग्नावैष्णवमित्यादि ॥ दीक्षणीयायां 'तस्मा एतमाग्नावैष्णवं'* इति प्रकृतौ विहितस्यानुवादोऽयं विशेषविधानार्थम् । अ-

---

*ब्रा. १-५-९.

ष्णुः परमो यदाग्नावैष्णवमेकादश-
कपालं निर्वपति देवताः ॥ ४ ॥ ए-
वोभयतः परिगृह्य यजमानोऽव रु-
न्धे पुरोडाशेन वै देवा अमुष्मिं-
न्लोक आर्ध्नुवञ्चरुणाऽस्मिन् यः का-
मयेतामुष्मिंन्लोक ऋंध्नुयामिति स
पुरोडाशं कुर्वीतामुष्मिंन्नेव लोक

वतांनाम् । विष्णुः । परमः । यत् । आग्नावैष्ण-
वमित्याग्ना—वैष्णवम् । एकादशकपालमित्येकाद-
श—कपालम् । निर्वपतीति निः—वपति । देवताः ।
॥ ४ ॥ एव । उभयतः । परिगृह्येति परि—गृह्य ।
यजमानः । अवेति । रुन्धे । [11]पुरोडाशेन । वै ।
देवाः । अमुष्मिन्न् । लोके । आर्ध्नुवन्न् । चरुणा ।
अस्मिन् । यः । कामयेत । अमुष्मिन्न् । लोके ।
ऋध्नुयाम् । इति । सः । पुरोडाशम् । कुर्वीत । अ-

ग्निस्सर्वा इत्यादि । सर्वदेवतात्वेन अग्नेस्स्तुतिः, यज्ञत्वेन विष्णोः । अवमः पश्चिमः । परम उत्कृष्टः । यज्ञभुजां देवानां सीमानावेतौ आग्न्यां देवानुभयतः परिगृह्य अवरुन्धे लभते यजमान एतान् एतत्साध्यं वा फलम् ॥

[11]पुरोडाशेनेति ॥ विशेषविधिः । अमुष्मिन् लोके ऋद्धिकामस्य पुरोडाशः । अस्मिन्लोके ऋद्धिकामस्य चरुः । गतमन्यत् ॥

ऋध्नोति यदष्टाकपालस्तेनाग्नेयो य-
त्त्रिकपालस्तेन वैष्णवस्समृद्ध्यै यः
कामयेतास्मिन्लोक ऋध्नुयामिति स
चरुं कुर्वीताग्नेर्घृतं विष्णोस्तण्डुला-
स्तस्मात् ॥५॥ चरुः कार्योस्मिन्नेव
लोक ऋध्नोत्यादित्यो भवतीयं वा
अदितिरस्यामेव प्रति तिष्ठत्यथो अ-

मुष्मिन्न् । एव । लोके । ऋध्नोति । यत् । अष्टाकपा-
ल इत्यष्टा–कपालः । तेन । आग्नेयः । यत् । त्रिक-
पाल इति त्रि–कपालः । तेन । वैष्णवः । समृद्ध्या
इति सं–ऋद्ध्यै । यः । कामयेत । अस्मिन् । लो-
के । ऋध्नुयाम् । इति । सः । चरुम् । कुर्वीत । अग्नेः ।
घृतम् । विष्णोः । तण्डुलाः । तस्मात् ॥ ५ ॥ चरुः ।
कार्यः । अस्मिन् । एव । लोके । ऋध्नोति ।
[12]आदित्यः । भवति । इयम् । वै । अदितिः । अ-
स्याम् । एव । प्रतीति । तिष्ठति । अथो इति ।
अस्याम् । एव । अधीति । यज्ञम् । तनुते ।

---

[12]आदित्य इति ॥ कः आन(?) । अथो अपि च अस्यां पृथिव्यां अधियज्ञं तनुते आदित्यं सर्वा पृथिवी देवी यजमानमिति ॥

स्यामेवार्धं यज्ञं तनुते यो वै संव-
थ्सरमुख्यमभृत्वाऽग्निं चिनुते यथा
सामि गर्भोऽवपद्यते तादृगेव तदा-
र्तिमाच्छैद्वैश्वानरं द्वादशकपालं पुर-
स्तान्निर्वपेत्संवत्सरो वा अग्निर्वैश्वा-
नरो यथा संवत्सरमाप्त्वा ॥६॥ काल
आगते विजायत एवमेव संवत्स-

[13]यः। वै। संवत्सरामिति सं—वत्सरम्। उख्यम्। अभृ-
त्वा। अग्निम्। चिनुते। यथा। सामि। गर्भः। अवपद्यत इत्यव—पद्यते। तादृक्। एव। तत्। आर्तिम्। एति। ऋच्छेत्। वैश्वानरम्। द्वादश-
कपालमिति द्वादश—कपालम्। पुरस्तात्। निरि-
ति। वपेत्। संवत्सर इति सं—वत्सरः। वै। अ-
ग्निः। वैश्वानरः। यथा। संवत्सरमिति सं—वत्स-
रम्। आप्त्वा ॥ ६ ॥ काले। आगत इत्या—गते।
विजायत इति वि—जायते। एवम्। एव। संव-
त्सरमिति सं—वत्सरम्। आप्त्वा। काले। आगत

[13]यो वा इत्यादि ॥ संवत्सरमुख्यस्याभरणे वैश्वानराग्निविधिः। सामीति। गर्भकालस्यैकादशापगमे आर्तिमार्च्छेदिति। यजमानः वैश्वानरस्य संवत्सरत्वात्। संवत्सरकार्यलाभः। ततः काले च यजनात् यजमानस्य आर्त्यभावः ॥

रमात्वा काल आगतेऽग्निं चिनुते नार्तिमार्छत्येषा वा अग्नेः प्रियात-नूर्यद्वैश्वानरः प्रियामेवास्य तनुवमव रुन्धे त्रीण्येतानि हवीꣳषि भवन्ति त्रय इमे लोका एषां लोकानाꣳ रोहाय ॥ ७ ॥

इत्या–गते । अग्निम् । चिनुते । न । आर्तिम् । एति । ऋच्छति । [14]एषा । वै । अग्नेः । प्रिया । तनूः । यत् । वैश्वानरः । प्रियाम् । एव । अस्य । तनुवम् । अवेति । रुन्धे । [15]त्रीणि । एतानि । हवीꣳषि । भवन्ति । त्रयः । इमे । लोकाः । एषाम् । लोकानाम् । रोहाय ॥ ७ ॥

यद्रियङ् वायुश्श्रमꣳश्रुणस्तद्वायोर्निर्वपति देवतास्तस्मादात्वाऽष्टात्रिꣳशच्च ॥१॥

---

[14]एषेति ॥ गतम् ॥

[15]त्रीणीति ॥ वैश्वानरान्तानि नित्यानीति मन्यन्ते । विकल्पवचनं विकृत्यर्थं स्यादिति ॥

इति पञ्चमे पञ्चमे प्रथमोनुवाकः.

प्रजापतिः प्रजास्सृष्ट्वा प्रेणाऽनु प्राविं-
शत्ताभ्यः पुनस्संभवितुं नाशक्नो-
थ्सोऽब्रवीदृध्नवदित्स यो मेऽतः पुनं-
स्संचिनवदिति तं देवास्समचिन्व-
न्ततो वै त आर्ध्नुवन् यथ्समचिन्व-
न्तच्चित्यस्य चित्यत्वं य एवं विद्वा-

[1]प्रजापतिरिति प्रजा–पतिः । प्रजा इति प्र–जाः । सृष्ट्वा । प्रेणा । अनु । प्रेति । अविशत् । ताभ्यः । पुनः । सम्भवितुमिति सं–भवितुम् । न । अशक्नोत् । सः । अब्रवीत् । ऋध्नवत् । इत् । सः यः । मा । इतः । पुनः । संचिनवदिति सं–चिनवत् । इति । तम् । देवाः । समिति । अचिन्वन् । ततः । वै । ते । आर्ध्नुवन् । यत् । समचिन्वन्निति सं–अचिन्वन् । तत् । चित्यस्य । चित्यत्वमिति चित्य–त्वम् । यः । एवम् । विद्वान् । अग्निम् ।

---

[1]प्रजापतिरित्यादि ॥ विशेषस्तुतिः । प्रेम्णा सृष्टा अनुप्राविशन् । छान्दसो मकारस्य लोपः, उदात्तनिवृत्तिस्वरेण तृतीयाया उदात्तत्वम् । प्रजानां पाता अग्निः प्रजापतिः । प्रजापतिरेव हि वैश्वानरभावं प्रतिपन्नः ता अनुप्रविष्टः ताभ्यः पुनः प्रजाभ्यः पुनः सम्भवितुमुत्पत्तुं नाशक्नोत् । विभक्तात्मैवा-

नग्निं चिनुत ऋध्नोत्येव कस्मै कम-
ग्निश्चीयत इत्याहुरग्निवान् ॥ ८ ॥
असानीति वा अग्निश्चीयतेऽग्निवानेव
भवति कस्मै कमग्निश्चीयत इत्याहु-
र्देवा मा वेदन्निति वा अग्निश्चीयते
विदुरेनं देवाः कस्मै कमग्निश्चीयत

चिनुते । ऋध्नोति । एव । [2]कस्मै । कम् । अग्निः ।
चीयते । इति । आहुः । अग्निवानित्यग्नि—वान् ॥
८ ॥ असानि । इति । वै । अग्निः । चीयते । अ-
ग्निवानित्यग्नि—वान् । एव । भवति । कस्मै । कम् ।
अग्निः । चीयते । इति । आहुः । देवाः । मा ।
वेदन् । इति । वै । अग्निः । चीयते । विदुः । ए-
नम् । देवाः । कस्मै । कम् । अग्निः । चीयते । इति । आ-

स्थितः । अथ तादृशस्सोब्रवीत् ऋध्नुयादेव सः प्रजासु मां विभक्तात्मानमवस्थितमादाय पुनस्संचिनवत् सङ्गतमेकत्र चिनुयादिति । उभयत्रापि लेट्याडागमः । अथ देवाश्च तथा कृत्वा गताः तस्मात्संहतचयनात् चित्यत्वं अग्नेः । 'चित्याग्निचित्ये च' इति निपात्यते । तस्मादेवं विदित्वा चिन्वानः ऋध्नोत्येव ॥

[2]कस्मा इत्यादि ॥ ब्रह्मवादिन आहुः । कमिति निपातः लुप्तचतुर्थी कः । कमेर्वा व्यत्ययेन कर्मणि विच् । कस्मै कामाया-

इत्याहुर्गृह्यसानीति वा अग्निश्चीयते गृह्येव भवति कस्मै कमग्निश्चीयत इत्याहुः पशुमानसानीति वा अग्निः ॥ ९ ॥ चीयते पशुमानेव भवति कस्मै कमग्निश्चीयत इत्याहुस्सप्त मा पुरुषा उप जीवानिति वा अग्निश्चीयते त्रयः प्राञ्चस्त्रयः प्रत्यञ्च आहुः । गृही । असानि । इति । वै । अग्निः । चीयते । गृही । एव । भवति । कस्मै । कम् । अग्निः । चीयते । इति । आहुः । पशुमानिति पशु-मान् । असानि । इति । वै । अग्निः ॥ ९ ॥ चीयते । पशुमानिति पशु-मान् । एव । भवति । कस्मै । कम् । अग्निः । चीयते । इति । आहुः । [3]सप्त । मा । पुरुषाः । उपेति । जीवान् । इति । वै । अग्निः । चीयते । त्रयः । प्राञ्चः । त्रयः । प्रत्यञ्चः । आत्मा ।

ग्निश्चीयत इत्यर्थः । अग्निवानिति । जाठरेण तद्वान् । भूम्नि मतुप् । 'छन्दसीरः' इति मत्वम् । 'ह्रस्वनुड्भ्याम्' इति मतुप उदात्तत्वम् ॥

[3]सप्तेति ॥ सप्त पुरुषा मा उपजीवन्तीति लेट्याडागमः । प्राञ्चः त्रयः पित्रादयोऽतीताः त्रयः प्रत्यञ्चः पुत्रादयो भविष्यन्तः । आ-

त्मा सप्तम एतावन्त एवैनममुष्मिं-
न्लोक उप जीवन्ति प्रजापतिरग्नि-
मचिकीषत तं पृथिव्यब्रवीन्न मय्य-
ग्निं चेष्यसेऽतिं मा धक्ष्यति सा त्वाऽ-
तिदह्यमाना वि धविष्ये ॥ १० ॥
स पापीयान्भविष्यसीति सोब्रवी-
त्तथा वा अहं करिष्यामि यथा त्वा

सप्तमः । एतावन्तः । एव । एनम् । अमुष्मिन्न् । लोके । उपेति । जीवन्ति । [4]प्रजापतिरिति प्रजा-
पतिः । अग्निम् । अचिकीषत । तम् । पृथिवी । अ-
ब्रवीत् । न । मयि । अग्निम् । चेष्यसे । अतीति । मा । धक्ष्यति । सा । त्वा । अतिदह्यमानेत्यति-द-
ह्यमाना । वीति । धविष्ये ॥ १० ॥ सः । पापीयान् । भविष्यसि । इति । सः । अब्रवीत् । तथा । वै । अ-
हम् । करिष्यामि । यथा । त्वा । न । अतिधक्ष्यती-

त्मा प्रकृष्टपाण्यादिकं शरीरम् । औपचारिकमस्य पुरुषत्वम् । व-
क्तारश्च भवन्ति—विरूपः पुरुष इति । एतावन्त इति । सप्ता-
प्येते एनमग्निचितं अमुष्मिन् लोके भोगभूमौ उपजीवन्ति उपगच्छन्ति ॥

[4]प्रजापतिरग्निमित्यादि ॥ 'प्रजापतिस्त्वा'* इत्यस्य स्तुतिः । अचि-

---

*सं. ४-२-९.

नाति धक्ष्यतीति स इमामभ्यमृश-
त्प्रजापतिस्त्वा सादयतु तया देव-
तयाऽङ्गिरस्वद्ध्रुवा सीदेतीमामेवेष्टकां
कृत्वोपाधत्तानतिदाहाय यत्प्रत्यग्निं
चिन्वीत तदभि मृशेत्प्रजापतिस्त्वा
सादयतु तया देवतयाऽङ्गिरस्वद्ध्रुवा
सीद ॥ ११ ॥ इतीमामेवेष्टकां कृ-

त्यति—धक्ष्यतीति । इति । सः । इमाम् । अभीति । अ-
मृशत् । प्रजापतिरिति प्रजा—पतिः । त्वा । सादय-
तु । तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद ।
इति । इमाम् । एव । इष्टकाम् । कृत्वा । उपेति ।
अधत्त । अनतिदाहायेत्यनति—दाहाय । यत् । प्र-
तीति । अग्निम् । चिन्वीत । तत् । अभीति । मृ-
शेत् । प्रजापतिरिति प्रजा—पतिः । त्वा । सादय-
तु । तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद
॥ ११ ॥ इति । इमाम् । एव । इष्टकाम् । कृत्वा ।

कीषत चेतुमैच्छत् । 'विभाषाश्चेः' इति कुत्वम् । पृथिव्यब्रवीत् मय्यग्निं न चेप्यसे अकार्यं तत्तव । अथ कारणं चाह—पृथिवीमेवेष्टकां कृत्वोपाधत्त । तच्चानतिदाहायाभवत् ॥

[5]यदित्यादि ॥ यत्फलं प्रत्यग्निं चिन्वीत तत्फलं साधयितुम् ।

त्वोपं धत्तेऽनंतिदाह्राय प्रजापंतिरका-
मयत प्र जांयेयेति स एतमुख्यंमप-
श्यत्तꣳ संवथ्सरमंबिभस्ततो वै स
प्राजांयत तस्मांथ्संवथ्सरं भार्यः प्रैव
जांयते तं वसंवोऽब्रुवन्प्र त्वमंजनि-
ष्ठा वयं प्र जांयामह्रा इति तं वसु-

उपेतिं । धत्ते । अनंतिदाह्रायेत्यनंति–दाह्राय । [6]प्र-
जांपंतिरितिं प्रजा–पतिः । अकामयत । प्रेतिं ।
जायेय । इतिं । सः । एतम् । उख्यंम् । अपश्यत् ।
तम् । संवत्सरमितिं सं–वत्सरम् । अबिभः । त-
तंः । वै । सः । प्रेतिं । अजायत । तस्मांत् । सं-
वत्सरमितिं सं–वत्सरम् । भार्यः । प्रेतिं । एव ।
जायते । तम् । वसंवः । अब्रुवन् । प्रेतिं । त्वम् ।
अजनिष्ठाः । वयम् । प्रेतिं । जायामहै । इतिं ।

यद्वा—कर्म निर्वर्तयितुं तत्राभिमृशेत् इष्टकाम् । 'सुपां सुलुक्' इति सप्तम्या लुक् । व्याख्यातो* मन्त्रः । इमामित्यादि । गतम् ॥

[6]प्रजापतिरकामयतेत्यादिरुख्यस्य संवत्सरविधिः । तमिति । तं यान् प्रागजनिष्ठाः ते वयं प्रजायामहै तत्तस्मात् उख्यमस्मभ्यं प्रयच्छेति प्रजाकामाः वसवोऽब्रुवन् । प्रजापतिरथ उख्यं तेभ्यः

---

*सं. ४-२-९.

भ्यः प्रायच्छत्तं त्रीण्यहान्यबिभरुस्ते-
नं ॥ १२ ॥ त्रीणि च शतान्यसृज-
न्त त्रयस्त्रिꣳशतं च तस्मात्त्र्यहं
भार्यः प्रैव जायते तान्रुद्रा अब्रुवन्प्र
यूयमजनिढ्वं वयं प्र जायामहा इ-
ति तꣳ रुद्रेभ्यः प्रायच्छन्तꣳ षडहा-

तम् । वसुभ्य इति वसु—भ्यः । प्रेति । अयच्छत् ।
तम् । त्रीणि । अहानि । अबिभरुः । तेन ॥ १२ ॥
त्रीणि । च । शतानि । असृजन्त । त्रयस्त्रिꣳशतमि-
ति त्रयः—त्रिꣳशतम् । च । तस्मात् । त्र्यहमिति
त्रि—अहम् । भार्यः । प्रेति । एव । जायते । [7]तान् ।
रुद्राः । अब्रुवन् । प्रेति । यूयम् । अजनिढ्वम् । व-
यम् । प्रेति । जायामहै । इति । तम् । रुद्रेभ्यः । प्रे-
ति । अयच्छन् । तम् । षट् । अहानि । अबिभरुः ।

प्रायच्छत् । ते च त्रीण्यहान्यबिभरुः । चेत्यवधारणे । तेन यत् त्रयस्त्रिꣳशदधिकशतत्रयसंख्याः प्रजा असृजन्त तस्मात्त्र्यहं भार्य इति विध्यन्तरम् ॥

[7]तानित्यादिः षडहविधिः । तान्वसून्रुद्रा अब्रुवन् । शेषं समानम् ॥

न्यबिभरुस्तेन त्रीणि च शतान्यसृंज-
न्त त्रयस्त्रिꣳशतं च तस्मात्षडहं
भार्यः प्रैव जायते तानादित्या अ-
ब्रुवन्प्र यूयमजनिढ्वं वयम् ॥ १३ ॥
प्र जायामहा इति तमादित्येभ्यः
प्रायच्छन्तं द्वादशाहान्यबिभरुस्तेन
त्रीणि च शतान्यसृंजन्त त्रयस्त्रिꣳ-
शतं च तस्माद्द्वादशाहं भार्यः प्रैव

तेन । त्रीणि । च । शतानि । असृंजन्त । त्रयस्त्रिꣳ-
शतमिति त्रयः–त्रिꣳशतम् । च । तस्मात् । षडह-
मिति षट्–अहम् । भार्यः । प्रेति । एव । जायते ।
[8]तान् । आदित्याः । अब्रुवन् । प्रेति । यूयम् । अज-
निढ्वम् । वयम् ॥ १३ ॥ प्रेति । जायामहै । इति ।
तम् । आदित्येभ्यः । प्रेति । अयच्छन् । तम् । द्वा-
दश । अहानि । अबिभरुः । तेन । त्रीणि । च । श-
तानि । असृंजन्त । त्रयस्त्रिꣳशतमिति त्रयः–त्रिꣳ-
शतम् । च । तस्मात् । द्वादशाहमिति द्वादश–अ-

---

[8]तानादित्या इत्यादिः द्वादशाहविधिः । तान् रुद्रानादित्या अब्रुवन् । समानमन्यत् ॥

जायते तेन वै ते सहस्रमसृजन्तो-
खाꣳ सहस्रतमीं य एवमुख्यꣳ सा-
हस्रं वेद प्र सहस्रं पशूनाप्नोति ॥ १४

हम् । भार्यः । प्रेति । एव । जायते । [9]तेन । वै । ते । सहस्रम् । असृजन्त । उखाम् । सहस्रतमी-मिति सहस्र–तमीम् । यः । एवम् । उख्यम् । साहस्रम् । वेद । प्रेति । सहस्रम् । पशून् । आ-प्नोति ॥ १४ ॥

अग्निवान्पशुमानसानीति वा अग्निर्धीविष्ये
मृशेत्प्रजापतिस्त्वा सादयतु तया देवत-
याऽङ्गिरस्वद्ध्रुवा सीद तेन तानादि-
त्या अब्रुवन्प्र यूयमजनिढ्वं वयं
चत्वारिꣳशच्च ॥ २ ॥

---

[9]तेन वा इत्यादि ॥ तेनोख्येनाग्निना वस्वादयः सहस्रं प्रजा असृजन्त एकोनाः । उखां तु तत्सहस्रतमीं तत्सहस्रपूरणीं असृजन्त । य एवमित्यादिः विदुषस्तुतिः । साहस्रं सहस्रयोगस्य निमित्तम् । 'शतमानविंशतिक' इत्यण् । एवं विद्वानपि सहस्रं पशून्प्राप्नोति किं पुनः कर्तेति क्रियास्तुतिरेव वा ॥

इति पञ्चमे पञ्चमे द्वितीयोनुवाकः.

यजुंषा वा एषा क्रियते यजुंषा प-
च्यते यजुंषा वि मुंच्यते यदुखा सा
वा एषैतर्हि यातयांम्नी सा न पुनः
प्रयुज्येत्याहुरग्ने युक्ष्वा हि ये तवं
युक्ष्वा हि देवहूतमाꣳ इत्युखायां

[1]यजुंषा । वै । एषा । क्रियते । यजुंषा । प-
च्यते । यजुंषा । वीतिं । मुच्यते । यत् । उखा ।
सा । वै । एषा । एतर्हि । यातयाम्नीतिं यात-
याम्नी । सा । न । पुनः । प्रयुज्येतिं प्र-युज्यां ।
इतिं । आहुः । अग्ने । युक्ष्व । हि । ये । तवं ।
युक्ष्व । हि । देवहूतमानितिं देव-हूतमान् । इतिं ।
उखायांम् । जुहोति । तेनं । एव । एनाम् । पुनः ।
प्रेतिं । युङ्क्ते । तेनं । अयातयाम्नीत्ययांत-याम्नी ।

---

[1]यजुषा वा इत्यादि ॥ उखानाम मन्त्रेण 'वि पाजसा'* इत्यादिना क्रियते । 'धिषणास्त्वा'† इत्यादिना पच्यते । 'मित्र'† इत्यादिना विमुच्यते । सेयमेतर्हि इदानीं उपधानकाले यातयाम्नी निर्गतरसा पुनर्मन्त्रोपयोगात् । 'अन उपधालोपिनः' इति ङीप् । न सा पुनरपि प्रयोज्या पुनरपि तां न प्रयोक्तुमर्हति । अयातयाम्नी चैवं भवति ॥

---

*सं. ४-१-५.

†सं. ४-१-६.

जुहोति तेनैवैनां पुनः प्र युङ्क्ते तेना-
यांतयाम्नी यो वा अग्निं योग आ-
गंते युनक्ति युङ्क्ते युञ्जानेष्वग्नेंा॥१५॥
युक्ष्वा हि ये तवं युक्ष्वा हि देवहू-
तंमाꣳ इत्यांहैष वा अग्नेर्योगस्तेनै-
वैनं युनक्ति युङ्क्ते युञ्जानेषु ब्रह्म वा-
दिनों वदन्ति न्यङ्ङग्निश्चेतव्या३

[2]यः । वै । अग्निम् । योगे । आगंत इत्या—गते ।
युनक्ति । युङ्क्ते । युञ्जानेषु । अग्नेः ॥ १५ ॥ युक्ष्व ।
हि । ये । तवं । युक्ष्व । हि । देवहूतंमानितिं
देव—हूतंमान् । इतिं । आह । एषः । वै । अग्नेः ।
योगंः । तेनं । एव । एनम् । युनक्ति । युङ्क्ते ।
युञ्जानेषु । [3]ब्रह्मवादिन इतिं ब्रह्म—वादिनंः ।
वदन्ति । न्यङ् । अग्निः । चेतव्या३ः । उत्ताना३

[2]यो वा इत्यादयो अग्नियोगकाले आगते युनक्ति स युञ्जानेषु आत्मानं युङ्क्ते योक्तृव्यपदेशं लभते । कर्त्रभिप्रायमात्मनेपदम् । एते ऋचौ अग्नियोगसंज्ञे । अस्मिन्काले अब्रुवन् अग्निं युनक्ति युञ्जानेषु चात्मानं युङ्क्ते ॥

[3]अथ उत्तानपुरुषशीर्षोपधानार्थं ब्रह्मचारिभिर्विचारं प्रस्तौति—ब्रह्मवादिन इति ॥ ब्रह्मवादिनो विचारं वदन्ति, किं अधोमुखो-

उत्ताना३ इति वयसां वा एष प्र-
तिमया चीयते यदग्निर्यन्न्यञ्चं चि-
नुयात्पृष्टित एनमाहुतय ऋच्छेयु-
र्यदुत्तानं न पतितुꣳ शक्नुयादसुव-
र्ग्यास्य स्यात्प्राचीनमुत्तानम् ॥१६॥

इत्युत्–ताना३ः । इति । वयसाम् । वै । एषः । प्रतिमयेति प्रति–मया । चीयते । यत् । अग्निः । यत् । न्यञ्चम् । चिनुयात् । पृष्टितः । एनम् । आहुतय इत्या–हुतयः । ऋच्छेयुः । यत् । उत्ता-नमित्युत्–तानम् । न । पतितुम् । शक्नुयात् । असुवर्ग्य इत्यसुवः–ग्यः । अस्य । स्यात् । [4]प्रा-चीनम् । उत्तानमित्युत्–तानम् ॥ १६ ॥ पुरुषशी-

---

ग्निश्चेतव्यः ? उत ऊर्ध्वमुखः ? इति । 'विचार्यमाणानाम्' इति प्लुतः । ....पक्षद्वयमिति । वयसामित्यादि । अयमग्निः पक्षिणां प्रतिमया प्रतिच्छन्देन चीयते, नेष्टकासङ्घातमात्रम् । विकृत्यर्थं बहुवचनम् । तत्र तत्तत्प्रतिमान्नातं अग्निमयं चिनुयात् पृष्टितः पृष्टितयः एनमाहुतयः प्राप्नुयुः । यदुत्तानमिति । चिनुयादित्येव । चयनप्रातिकूल्यात् पतितुं न शक्नुयात् । ततश्चायं यजमानस्य असुवर्ग्यस्स्यात् । 'गोद्व्यचः' इति यत् ॥

[4]समाधत्ते—प्राचीनमित्यादि ॥ पुरुषशीर्षमात्रं प्राचीनमुत्तान-

पुरुषशीर्षमुप दधाति मुखत एवैनमाहुतय ऋच्छन्ति नोत्तानं चिनुते सुवर्ग्यास्य भवति सौर्या जुहोति चक्षुरेवास्मिन्प्रतिं दधाति द्विर्जुहोति द्वे हि चक्षुषी समान्या जुहोति

रुषमितिं पुरुष–शीर्षम् । उपेतिं । दधाति । मुखतः । एव । एनम् । आहुतय इत्या–हुतयः । ऋच्छन्ति । न । उत्तानमित्युत्–तानम् । चिनुते । सुवर्ग्य इतिं सुवः–र्ग्यः । अस्य । भवति । [5]सौर्या । जुहोति । चक्षुः । एव । अस्मिन् । प्रतीतिं । दधाति । [6]द्विः । जुहोति । द्वे इतिं । हि । चक्षुषी इ-

---

मुपदधाति । मुखत एवाहुतयः प्राप्नुवन्ति । अग्निं तु नोत्तानं चिनुते न्यञ्चमेव च चिनुयात् । तेनायं स्वर्ग्यो भवति ॥

[5]सौर्येति ॥ ‘ चित्रं देवानां ’* इति । ऋचा तस्मिन्पुरुषशिरसि जुहोति । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वे ‘ उदात्तयणः ’ इति तृतीयाया उदात्तत्वम् ॥

[6]द्विरिति ॥ द्वित्वाच्चक्षुषः । समान्येति । एकयैवर्चा द्वयोश्चक्षुषोः जुहोति । ‘ केवलमामक ’ इति ङीप्, पूर्ववत्तृतीयाया उदात्तत्वम् । समानं एकमेव हि चक्षुरिन्द्रियं अधिष्ठानभेदात्तु

---

*सं. १-४-४३.

समानꣳ हि चक्षुस्समृंह्यै देवासु-
रास्संयत्ता आसन्ते वामं वसु सं
न्यदधत तद्देवा वाम्भृतांऽवृञ्जत त-
द्वाम्भृतो वामभृत्वं यद्वाम्भृतमुप
दधाति वाममेव तया वसु यजमा-

ति । समान्या । जुहोति । समानम् । हि । चक्षुः । समृंह्या इति सं-ऋंह्यै । देवासुरा इति देव-असुराः । संयत्ता इति सं-यत्ताः । आसन्न् । ते । वामम् । वसु । सम् । नीति । अदधत । तत् । देवाः । वाम्भृतेति वाम-भृता । अवृञ्जत । तत् । वाम्भृत इति वाम-भृतः । वाम्भृत्वमिति वामभृत्-त्वम् । यत् । वाम्भृतमिति वाम-भृतम् । उपदधातीत्यु-प-दधाति । वामम् । एव । तया । वसु । यज-

---

भिन्नमिव लक्ष्यते । समृंह्या इति । अनुरूपत्वाय भवति । 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् ॥

[7]देवासुरा इत्याद्वि ॥ असुराः वामं वननीयं चयनरसं न्यदधत गूढं क्वचित्संभूय स्थापितवन्तः । देवास्तु तद्वामभृन्नाम्न्या इष्टकया अवृञ्जत आददत । तत् वामं वसु भ्रियतेऽनयेति वामभृत् । करणे क्विप्, 'ह्यग्रहोर्भः' इति भत्वम् ॥

नो भ्रातृव्यस्य वृक्ण हिरण्यमूर्धी भवति ज्योतिर्वै हिरण्यं ज्योतिर्वामं ज्योतिषैवास्य ज्योतिर्वामं वृङ्क्ते द्वियजुर्भवति प्रतिष्ठित्यै ॥ १७ ॥

मानः । भ्रातृव्यस्य । वृङ्क्ते । [8]हिरण्यमूर्धीति हिरण्य—मूर्धी । भवति । ज्योतिः । वै । हिरण्यम् । ज्योतिः । वामम् । ज्योतिषा । एव । अस्य । ज्योतिः । वामम् । वृङ्क्ते । द्वियजुरिति द्वि—यजुः । भवति । प्रतिष्ठित्या इति प्रति—स्थित्यै ॥ १७ ॥

युञ्जानेष्वग्नें प्राचीनमुत्तानं वामभृतं चतुर्विंशतिश्च ॥ ३ ॥

---

[8]हिरण्यमूर्धीति ॥ हिरण्यं मूर्ध्नि उपरिभागे यस्याः । पूर्ववत् ङीप् । ज्योतिरिति । हिरण्यं द्योतनशीलं वामं वसु । तस्मात्तादृशेन तादृशं वसु भ्रातृव्यस्यादद्दते । द्वियजुरिति । द्वाभ्यां मन्त्राभ्यां 'यास्ते अग्ने सूर्ये रुचः '* 'या वो देवाः सूर्ये रुचः '* इत्येताभ्यां यजुष्कृता-वयजुष्कृति वा । त्रिचक्रादित्वादुत्तरपदान्तोदात्तत्वम् । प्रतिष्ठित्या इति । द्वित्वलाभाद्गतेः प्रकृतिस्वरत्वम् ॥

इति पञ्चमे पञ्चमे तृतीयोनुवाकः.

---

*सं. ४-२-९.

आपो वरुणस्य पत्नय आसन्ता अग्निरभ्यध्यायत्तास्समभवत्तस्य रेतः परापतत्तदियमभवद्यद्वितीयं परापतत्तदसावभवदियं वै विराडसौ स्वराड्यद्विराजावुपदधातीमे एवोप

[1]आपः । वरुणस्य । पत्नयः । आसन्न् । ताः । अग्निः । अभीति । अध्यायत् । ताः । समिति । अभवत् । तस्य । रेतः । परेति । अपतत् । तत् । इयम् । अभवत् । यत् । द्वितीयम् । परापतदिति परा-अपतत् । तत् । असौ । अभवत् । इयम् । वै । विराडिति वि-राट् । असौ । स्वराडिति स्व-राट् । यत् । विराजाविति वि-राजौ । उपदधातीत्युप-दधाति । इमे इति । एव । उपेति । धत्ते ।

---

[1]उक्ताः 'विराट् ज्योतिरधारयत्'* इत्याद्यास्तिस्र इष्टकाः। आपो वरुणस्येत्यादिभिः विराट्स्वराजोस्स्तुतिः । अभ्यध्यायत् अकामयत समभवत् मिथुनभावेन अभुङ्क्त । तस्येत्यादि। गतम् । द्यावापृथिवीत्वेन विराट्स्वराजोरिष्टकयोस्स्तुतिः । तस्माद्विराजोपधानेन द्यावापृथिव्यावेव उपहिते । इमे इति । इयञ्चासौ च इमे । 'त्यदादीनां यत्परम्' इति इदमशेषः ॥

---

*सं. ४-२-९.

धत्ते यद्वा असौ रेतस्सिञ्चति तद्-
स्यां प्रति तिष्ठति तत्र जायते ता
ओषधयः ॥ १८ ॥ वीरुधो भवन्ति
ता अग्निरत्ति य एवं वेद प्रैव जा-
यतेऽन्नादो भवति यो रैतस्वी स्या-
त्प्रथमायां तस्य चित्यामुभे उप
दध्यादिमे एवास्मै समीची रेतस्सि-

[2]यत् । वै । असौ । रेतः । सिञ्चति । तत् । अ-
स्याम् । प्रतीति । तिष्ठति । तत् । प्रेति । जायते ।
ताः । ओषधयः ॥ १८ ॥ वीरुधः । भवन्ति । ताः ।
अग्निः । अत्ति । यः । एवम् । वेद । प्रेति । ए-
व । जायते । अन्नाद इत्यन्न—अदः । [3]भवति । यः ।
रेतस्वी । स्यात् । प्रथमायाम् । तस्य । चित्याम् ।
उभे इति । उपेति । दध्यात् । इमे इति । एव ।
अस्मै । समीची इति । रेतः । सिञ्चतः । यः ।

---

[2]यद्वा इत्यादि ॥ तत उदकं तत्पृथिव्यां प्रतिष्ठितं ओषध्यादिभावेन जायते ता अग्नेरदनीया भवन्तीति विराडुपधानेन अग्निरेव उपधार्य इति । य एवमिति । विदुषा विदित्वा वा कर्तव्यमिति ॥

[3]रेतस्वीति ॥ प्रजननसमर्थः । प्रजायत इत्येके । प्रभूतरेता इवेत्यन्ये । प्रथमायामित्यादि । गतम् । समीची इति । संगते

श्वेतो यस्सिक्तरेतास्स्यात्प्रथमायां त-
स्य चित्यामन्यामुप दध्यादुत्तमायां-
मन्याꣳ रेत एवास्य सिक्तमाभ्या-
मुभयतः परिं गृह्णाति संवथ्सरं न
कम्न ॥ १९ ॥ चन प्रत्यवरोहेन्न हि-
मे कं चन प्रत्यवरोहंतस्तदेनयोर्व्रतं

सिक्तरेता इतिं सिक्त–रेताः । स्यात् । प्रथमा-
यांम् । तस्यं । चित्यांम् । अन्याम् । उपेतिं । द-
ध्यात् । उत्तमायामित्युंत्–तमायांम् । अन्याम् ।
रेतंः । एव । अस्य । सिक्तम् । आभ्याम् । उभयतंः ।
परीतिं । गृह्णाति । [4]संवत्सरमितिं सं–वत्सरम् ।
न । कम् ॥ १९ ॥ चन । प्रत्यवरोहेदितिं प्रति–
अवरोहेत् । न । हि । इमे इतिं । कम् । चन ।
प्रत्यवरोहंत इतिं प्रति–अवरोहंतः । तत् । एन-

द्यावापृथिव्यौ सम्यग्वा रेतस्सेचयतः । 'वा छन्दसि' इति पूर्व-सवर्णदीर्घत्वम् । सिक्तरेता इति । बहुप्रजाः स्थविरो वा । आभ्या मिति । द्यावापृथिवीभ्यां उभयतःस्वसिक्तं रेतः प्रजारूपं परिगृह्णाति ॥

[4]संवत्सरमित्यादि ॥ न किञ्चिदपि प्रत्युत्तिष्ठेत् एते उपधाय । हेतुमाह—न हीति । द्यावापृथिव्यौ न कञ्चिदपि प्रत्युद्गच्छतः ।

यो वा अपशीर्षाणमग्निं चिनुतेऽ-
पशीर्षाऽमुष्मिन्लोके भवति य-
स्सशीर्षाणं चिनुते सशीर्षाऽमु-
ष्मिन्लोके भवति चित्तिं जुहोमि
मनसा घृतेन यथा देवा इहागम-
न्वीतिहोत्रा ऋतावृधस्समुद्रस्य व-

योः । व्रतम् । [5]यः । वै । अपशीर्षाणमित्यप-
शीर्षाणम् । अग्निम् । चिनुते । अपशीर्षेत्यप-
शीर्षा । अमुष्मिन्न् । लोके । भवति । यः । स-
शीर्षाणमिति स-शीर्षाणम् । चिनुते । सशीर्-
षेति स-शीर्षा । अमुष्मिन्न् । लोके । भवति ।
[6]चित्तिम् । जुहोमि । मनसा । घृतेन । यथा । दे-
वाः । इह । आगमन्नित्या-गमन्न् । वीतिहोत्रा इति
वीति-होत्राः । ऋतावृध इत्यृत-वृधः । समुद्रस्य ।

तत्खल्वनयोर्व्रतं नियतं चेष्टितम् । तस्मात्तयोरुपधात्राऽपि तद्वृत्तेन युक्तं भवितुमिति भावः ॥

[5]यो वा इत्यादि ॥ स्वयमातृण्णामुपधाय तदवकाशे होमविधिः । 'शीर्षञ्छन्दसि' इति शिरसश्शीर्षन्भावः ॥

[6]'चित्तिं जुहोमि' इत्यादिना होमोऽग्नेश्शिरःप्राधान्यात् । मन्त्रार्थस्तु—इयञ्चातिजगती पञ्चपदा । चित्तिं जुहोमि आददे वशी-

युनक्स्य पत्मञ्जुहोमि विश्वकर्मणे
विश्वाऽहाऽमर्त्यꣳ हविरिति स्वयमा-
तृण्णामुपधायं जुहोति ॥२०॥ ए-
तद्वा अग्नेश्शिरस्सशीर्षाणमेवाग्निं
चिनुते सशीर्षाऽमुष्मिन्लोके भव-

वयुनक्स्य । पत्मन्न् । जुहोमि । विश्वकर्मण इति वि-श्व-कर्मणे । विश्वा । अहा । अमर्त्यम् । हविः । इति । स्वयमातृण्णामिति स्वयं-आतृण्णाम् । उपधायेत्युप-धायं । जुहोति ॥ २० ॥ एतत् । वै । अग्नेः । शिरः । सशीर्षाणमिति स-शीर्षाणम् ।

करोमि देवानां तेषां वक्ष्यमाणत्वान्मननीयेन मनोहरेणानेन घृतेन यथा देवा वशीकृतचित्ताः इहास्मिन् आगमन् आगच्छेयुः तदनुरूपम् । छान्दसो लुङ् । देवा विशेष्यन्ते—वीतिहोत्राः वेतिर्गतिकर्मा होतव्यं होत्रं हविः कमनीयहविषः ऋतस्य यज्ञस्य वर्धयितारः । अन्येषामपि दृश्यते । किमर्थं समुद्रस्य उदक-स्य वयुनस्य कमनीयस्य पत्मन् पतननिमित्तं वृष्ट्यर्थं जुहोमि । निमित्तात् सप्तम्याः 'सुपां सुलुक्' इति लुक् । यद्वा—समुद्र-मन्तरिक्षं, इह तु समुद्रशब्देन स्वयमातृण्णोच्यते 'अन्तरिक्षं वै स्वयमातृण्णा'* इति । तस्याः पतनार्थं स्थैर्यार्थं जुहोमि; यथा मशकार्थो धूम इति मशकार्थत्वं धूमस्य नोपपद्यत इति तन्नि-वृत्तौ मशकशब्दः; एवमत्रापि तन्निवृत्तौ पत्मशब्दः । वि-

*सं. ५-३-२.

त्रि य एवं वेदं सुवर्गाय वा एष लोकाय चीयते यद्ग्निस्तस्य यदयंथापूर्वं क्रियतेऽसुवर्ग्यमस्य तथ्सुव-र्ग्योंऽग्निश्चितिंमुपधायाभि मृशेच्चित्ति-एव । अग्निम् । चिनुते । सशीर्षेति स-शीर्षा । अमुष्मिन्न् । लोके । भवति । यः । एवम् । वेद । [7]सुवर्गायेति सुवः-गायं । वै । एषः । लोकायं । चीयते । यत् । अग्निः । तस्यं । यत् । अयंथापूर्व-मित्ययंथा-पूर्वम् । क्रियतें । असुवर्ग्यमित्यसुवः-ग्यम् । अस्य । तत् । सुवर्ग्यं इतिं सुवः-ग्यंः । अग्निः । चितिंम् । उपधायेत्युंप-धायं । अभीतिं ।

श्वकर्मणे विश्वस्य कर्त्रे देवाय विश्वाहा विश्वान्यहानि अमर्त्य-मविनाशशीलमिदं हविर्जुहोमीति । 'शेच्छन्दसि' इति लोपः ॥

[7]सुवर्गायेत्यादिश्चित्यभिमर्शनविधिः । अयथापूर्वं अयथाविधि यथार्हधर्मैर्न कृतं* तथा यत्क्रियते अग्नेः ततः असुवर्ग्यं अस्वर्गनिमित्तं स्यात् यजमानस्य । अग्निश्चायमस्य स्वर्ग इष्यते, तदर्थं चीयमान-त्वात् । तस्याश्चितिं 'चित्तिं' इति त्रिष्टुभा चितिमुपधायानन्तरं अभिमृशेच्चितिकल्पतिरित्याख्या । अर्थस्तु—चित्तिमचित्तिं प्रतीतिं अप्र-तीतिं चास्माकं विचिनवत् विचिनुयात् स्खलितास्खलितं निरूप्य स्वयमेव परिहरत्विति भावः । पूर्ववच्छेट्टाडागमः । यस्मादयं विद्वान् ज्ञातुं समर्थः वीतानि वृजिनानि च । कानि तानि—विकलानि कर्माणि वृजिनानि

*यथाहादुर्वै निकृतं.

मचित्तिं चिनवद्वि विद्वान्पृष्ठेव वीता
वृजिना च मर्तान्राये चं नस्स्वप-
त्यायं देव दितिं च रास्वादितिमुरु-
ष्येतिं यथापूर्वमेवैनामुपं धत्ते प्राञ्चं-
मेनं चिनुते सुवर्ग्योंस्य भवति॥२१॥

मृशेत् । चित्तिम् । अचित्तिम् । चिनवत् । वीतिं । विद्वान् । पृष्ठा । इव । वीता । वृजिना । च । मर्तान् । राये । च । नः । स्वपत्यायेतिं सु-अपत्यायं । देव । दितिम् । च । रास्व । अदितिम् । उरुष्य । इतिं । यथापूर्वामितिं यथा-पूर्वम् । एव । एनाम् । उपेतिं । धत्ते । प्राञ्चम् । एनम् । चिनुते । सुवर्ग्यं इतिं सुवः-र्ग्यः । अस्य । भवति ॥ २१ ॥

ओषंधयः कं जुंहोति स्वपत्यायाष्टादंश च ॥४॥

च । उभयत्र 'छन्दसि' इति लोपः । किञ्च—मर्ता मरणधर्मश्च अस्मान् भाव्यमानप्रमादान्विद्वान् क्षमाकारणमिदम् । किमिव पृष्ठा पृष्ठानि उपलक्षणत्वात् स्वाङ्गानि च सर्वाणि अपकर्माणि प्रत्यक्षं वेदितुं समर्थ इति । स त्वं हे देव नः अस्माकं राये धनवत्त्वाय स्वपत्याय शोभनापत्यत्वाय दितिं रास्व यद्देयं तद्देहि । दृदातेः कर्मणि क्तिन् छान्दसमित्त्वम् । रातेर्व्यत्ययेन आत्मनेपदम् । अदितिं अखण्डनं च उरुष्य रक्ष कुरुष्वेति यावत् । उरुष्यतिः कण्ड्वादिः । 'द्यतिस्यति' इत्यादिना द्यतेरित्त्वम् । प्राञ्चमिति । प्राञ्चमग्निं चिनुते स्वर्ग्यो भवति ॥

इति पञ्चमे पञ्चमे चतुर्थोनुवाकः.

विश्वकर्मा दिशां पतिस्स नः पशून्पातु सोस्मान्पातु तस्मै नमः प्रजापतो रुद्रो वरुणोग्निर्दिशां पतिस्स नः पशून्पातु सोस्मान्पातु तस्मै नम एता वै देवता एतेषां पशूनामधिपतयस्ताभ्यो वा एष आ वृश्च्यते यः पशुशीर्षाण्युपदधाति

[1]विश्वकर्मेति विश्व–कर्मा । दिशाम् । पतिः । सः । नः । पशून् । पातु । सः । अस्मान् । पातु । तस्मै । नमः । प्रजापतिरिति प्रजा–पतिः । रुद्रः । वरुणः । अग्निः । दिशाम् । पतिः । सः । नः । पशून् । पातु । सः । अस्मान् । पातु । तस्मै । नमः । [2]एताः । वै । देवताः । एतेषाम् । पशूनाम् । अधिपतय इत्यधि–पतयः । ताभ्यः । वै । एषः । एति । वृश्च्यते । यः । पशुशीर्षाणीति

---

[1]पशुशीर्षेषु क्रमेण हिरण्येष्टकोपधानमन्त्राः—विश्वकर्मा दिशां पतिरित्यादयः । विश्वकर्मा वायुरादित्यो वा दिशां पतिः सोस्माकं पशून्पातु अस्मांश्च पातु तस्मै नमः । एवं प्रजापत्यादिचतुर्ष्वपि दिशां पतिरित्यनुषज्यते ॥

[2]एता वा इत्यादि ॥ एतेषां ब्राह्मणम् । एता विश्वकर्मादयो

हिरण्येष्टका उप दधात्येताभ्य एव देवताभ्यो नमस्करोति ब्रह्मवादिनः ॥ २२ ॥ वदन्त्यग्नौ ग्राम्यान्पशून्प्र धीयति शुचाऽऽरण्यानर्पयति किं तत-त उच्छिष्यतीति यद्धिरण्येष्टका उपदधात्यमृतं वै हिरण्यममृतेनैव

पशु–शीर्षाणि । उपदधातीत्युप–दधाति । हिर-ण्येष्टका इति हिरण्य–इष्टकाः । उपेति । दधाति । एताभ्यः । एव । देवताभ्यः । नमः । करोति । [3]ब्रह्मवादिन इति ब्रह्म–वादिनः ॥ २२ ॥ वदन्ति । अग्नौ । ग्राम्यान् । पशून् । प्रेति । दधाति । शु-चा । आरण्यान् । अर्पयति । किम् । ततः । उदि-ति । शिष्यति । इति । यत् । हिरण्येष्टका इति हिरण्य–इष्टकाः । उपदधातीत्युप–दधाति । अमृ-तम् । वै । हिरण्यम् । अमृतेन । एव । ग्राम्ये-

---

देवाः एतेषां पशूनां अधिपतयः एषां शिरांस्युपस्थितानि । ताभ्य इत्यादि । गतम् ॥

[3]ब्रह्मवादिन इत्यादि ॥ ग्राम्याः पशवोऽग्नौ निधीयन्ते दह्यन्ते आरण्याश्शोकेन योज्यन्ते । यथोक्तं—'ग्राम्येभ्य एव पशुभ्य आ-रण्यान् पशून् शुचमनूत्सृजति'* इति । तदिदानीं (दनेन) ग्राम्यार-

---

*सं. ५-२-९.

ग्राम्येभ्यः पशुभ्यो भेषजं करोति नैनान् हिनस्ति प्राणो वै प्रथमा स्वयमातृण्णा व्यानो द्वितीयाऽपानस्तृतीयाऽनु प्राण्यात्प्रथमाꣳ स्वयमातृण्णामुपधायं प्राणेनैव प्राणꣳ समर्धयति व्यन्यात् ॥ २३ ॥ द्वितीयामुपधायं व्यानेनैव व्यानꣳ

म्यः । पशुभ्य इतिं पशु—भ्यः । भेषजम् । करोति । न । एनान् । हिनस्ति । [4]प्राण इतिं प्र—अनः । वै । प्रथमा । स्वयमातृण्णेतिं स्वयं—आतृण्णा । व्यान इतिं वि—अनः । द्वितीया । अपान इत्यंप—अनः । तृतीया । अनु । प्रेतिं । अन्यात् । प्रथमाम् । स्वयमातृण्णामितिं स्वयं—आतृण्णाम् । उपधायेत्युंप—धायं । प्राणेनेतिं प्र—अनेनं । एव । प्राणमितिं प्र—अनम् । समितिं । अर्धयति । वीतिं । अन्यात् ॥ २३ ॥ द्वितीयाम् । उपधायेत्युंप—धायं । व्यानेनेतिं वि—अनेनं । एव । व्यानमि-

---

ण्येभ्यः किमुच्छिषति किं पशुजातं शेषयति पशुशिरसामुपधाने । हन्त सर्वमपि पशुजातं विनाशितं भवतीति । यदित्यादि समाधानं गतम् ॥

[4]प्राणो वा इत्यादिना स्वयमातृण्णानां प्राणादित्वेन स्तुतिः ।

समर्धयत्यपान्यात्तृतीयामुपधायापा-
नेनैवापानꣳ समर्धयत्यथो प्राणैरे-
वैनꣳ समिन्धे भूर्भुवस्सुवरिति स्व-
यमातृण्णा उप दधातीमे वै लोका-
स्स्वयमातृण्णा एताभिः खलु वै
व्याहृतीभिः प्रजापतिः प्राजायत

ति वि–अनम् । समिति । अर्धयति । अपेति । अन्यात् । तृतीयाम् । उपधायेत्युप–धायं । अपा-
नेनेत्यप–अनेनं । एव । अपानमित्यप–अनम् । समिति । अर्धयति । अथो इति । प्राणैरिति प्र–
अनैः । एव । एनम् । समिति । इन्धे । [5]भूः । भु-
वः । सुवः । इति । स्वयमातृण्णा इति स्वयं–
आतृण्णाः । उपेति । दधाति । इमे । वै । लोकाः ।
स्वयमातृण्णा इति स्वयं–आतृण्णाः । एताभिः ।
खलु । वै । व्याहृतीभिरिति व्याहृति–भिः । प्र-
जापतिरिति प्रजा–पतिः । प्रेति । अजायत ।

प्राणादय इत्युक्ताः अनुप्राण्यादिविधिः । अथो इति । यज-
मानं च प्राणैस्समृद्धं करोति ॥

[5]भूरित्यादि ॥ लोकत्रयात्मिका व्याहृतयः स्वयमातृण्णा च य-
थोक्ता । किञ्चैताभिर्व्याहृतीभिः प्रजापतिः प्राजायत इत्यादि । गतम् ॥

यदेताभिर्व्याहृतीभिस्स्वयमातृण्णा उपदधाति मानेव लोकानुपधायैषु ॥ २४ ॥ लोकेष्वधि प्र जायते प्राणायं व्यानायापानायं वाचे त्वा चक्षुषे त्वा तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदाग्निना वै देवास्सुवर्गं लोकमयत् । एताभिः । व्याहृतीभिरिति व्याहृति—भिः । स्वयमातृण्णा इति स्वयं—आतृण्णाः । उपदधातीत्युप—दधाति । इमान् । एव । लोकान् । उपधायेत्युप—धायं । एषु ॥ २४ ॥ लोकेषु । अधि । प्रेति । जायते । [6]प्राणायेति प्र—अनायं । व्यानायेति वि—अनायं । अपानायेत्यप—अनायं । वाचे । त्वा । चक्षुषे । त्वा । तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद । [7]अग्निना । वै । देवाः । सुवर्गमिति

---

[6]प्राणायेत्यादिस्तयादेवतस्य विशेषो गतः ॥

[7]अग्निनेत्यादि ॥ अजिगांसन् गन्तुमैच्छन् । एतैः 'सनि च' इति गमिरादेशः, 'अज्झनगमां सनि' इति दीर्घत्वम् । तेन स्वयमातृण्णारहितेन । एता इति । प्राणाय व्यानाय वाच इति प्राणादिषु प्रत्येकत्वाच्चक्षुषे त्वेत्यादेः अनुषङ्गः । तेन सर्वतश्चक्षुषेत्यनेन दिक्शूपहितचतुस्स्वयमातृण्णेन सर्वास्वपि दिक्षु 'चक्षुषे त्वा'

जिगाꣳस्न्तेन पतितुं नाशक्नुवन्त एताश्चतस्रस्स्वयमातृण्णा अपश्यन्ता दिक्षूपादधत तेन सर्वतश्चक्षुषा सुवर्गं लोकमायन् यच्चतस्रस्स्वयमातृण्णा दिक्षूपदधाति सर्वतश्चक्षुषैव तदग्निना यजमानस्सुवर्गं लोकमेति ॥ २५ ॥

सुवः—गम् । लोकम् । अजिगाꣳसन् । तेन । पतितुम् । न । अशक्नुवन् । ते । एताः । चतस्रः । स्वयमातृण्णा इति स्वयं—आतृण्णाः । अपश्यन् । ताः । दिक्षु । उपेति । अदधत । तेन । सर्वतश्चक्षुषेति सर्वतः—चक्षुषा । सुवर्गमिति सुवः—गम् । लोकम् । आयन् । [8]यत् । चतस्रः । स्वयमातृण्णा इति स्वयं—आतृण्णाः । दिक्षु । उपदधातीत्युप—दधाति । सर्वतश्चक्षुषेति सर्वतः—चक्षुषा । एव । तत् । अग्निना । यजमानः । सुवर्गमिति सुवः—गम् । लोकम् । एति ॥ २५ ॥

ब्रह्मवादिनो वयन्यादेषु यजमानस्त्रीणि च ॥५॥

इत्यादिचक्षुष्मन्मन्त्रसहितेन एतेन चक्षुषे त्वेत्यादेः सर्वानुषङ्गतां दर्शयति ॥

[8]यदित्यादि ॥ गतम् ॥

इति पञ्चमे पञ्चमे पञ्चमः.

अग्न आ याहि वीतय इत्याहाह्वै-
तैवैनमग्निं दूतं वृणीमह इत्याह हू-
त्वैवैनं वृणीतेऽग्निनाऽग्निरसमिध्यत
इत्याह समिन्ध एवैनमग्निर्वृत्राणि
जङ्घनदित्याह समिद्ध एवास्मिन्नि-
न्द्रियं दधात्यग्नेस्तोमं मनामह

[1]अग्नेऽ । एतिं । याहि । वीतयेऽ । इतिं । आह । अह्वत । एव । एनम् । अग्निम् । दूतम् । वृणीमहे । इतिं । आह । हूत्वा । एव । एनम् । वृणीते । अग्निना । अग्निः । समितिं । इध्यते । इतिं । आह । समितिं । इन्धे । एव । एनम् । अग्निः । वृत्राणि । जङ्घनत् । इतिं । आह । समिद्ध इति सं-इद्धे । एव । अस्मिन् । इन्द्रियम् । दधाति । अग्नेः ।

[1]अग्न आ याहीत्यादिर्विभक्तीनां विधिः । पञ्चस्वहस्सु पञ्च चितयः । तत्रान्वहं चितेर्विभागार्था एता ऋचः । तत्र 'अग्न आयाहि'* इत्यनया प्रथमेऽह्नि प्रथमायां चितौ चयनादेनमग्निमाह्वयते आह्वयति । छान्दसो लुङ्, 'आत्मनेपदेष्वन्यतरस्याम्' इत्यङ् । ततो हूत्वा आहूय द्वितीयायां चितौ अग्निं दूतं वृणीते अग्निमात्मसात्करोति । ततस्तृतीयायां 'अग्निनाऽग्निस्समिध्यते'† इति एनमग्निं समिन्धे दीपयति ततश्चतुर्थ्यां 'अग्निर्वृत्राणि'‡ इति समिन्धेऽग्नौ इन्द्र-

*तै. ब्रा. ३-५-२. †सं. ३-५-११. ‡सं. ४-३-१३.

इत्याह मनुत एवैनमेतानि वा अ-
ह्नाꣳ रूपाणि ॥ २६ ॥ अन्वहमेवै-
नं चिनुतेऽवाह्नाꣳ रूपाणि रुन्धे ब्र-
ह्मवादिनो वदन्ति कस्मात्सत्याद्या-
तयाम्नीरन्या इष्टका अयातयाम्नी

स्तोमम् । मनामहे । इति । आह । मनुते । एव । एनम् । [2]एतानि । वै । अह्नाम् । रूपाणि ॥ २६ ॥ अन्वहमित्यनु—अहम् । एव । एनम् । चिनुते । अवेति । अह्नाम् । रूपाणि । रुन्धे । [3]ब्रह्मवादिन इति ब्रह्म—वादिनः । वदन्ति । कस्मात् । सत्यात् । यातयाम्नीरिति यात—याम्नीः । अन्याः । इष्टकाः । अयातयाम्नीत्ययात—याम्नी । लोकंपृणेति लोकं—पृ-

---

यं वीर्यं दधाति । ततः पञ्चम्यामग्नेस्स्तोमं मनामहे इति एतं महावीर्यं मनुते जानाति स्तोतुं धारयितुं वा ॥

[2]एतानि वा इत्यादि ॥ अहस्सम्बन्धीनि चितिरूपाणि चितिवैलक्षण्यात्मकानि । अन्वहमिति । अन्वहमेताभिश्चयनादह्नां रूपाण्यवरुन्धे विशिष्टां शरीरावस्थां लभते यजमानः ॥

[3]ब्रह्मवादिन इत्यादि ॥ अत्र यत्र यातयाम्न्यो गतरसाः अन्या इष्टका अपस्यादयः सकृदुपहिता न पुनरुपधीयन्ते लोकंपृणा तु अयातयाम्नी यतः पुनःपुनरुपधीयते तदेतद्वैचित्र्यं कस्मात्कारणादिति ब्रह्मवादिनः प्रश्नं वदन्ति । 'अन उपधालोपिनः' इति ङीप् ॥

लोकंपृणेत्यैन्द्राग्नी हि बार्हस्पत्ये-
ति ब्रूयादिन्द्राग्नी च हि देवानां बृह-
स्पतिश्चायातयामानोऽनुचरवती भ-
वत्यजामित्वायानुष्टुभाऽनु चरत्या-
त्मा वै लोकंपृणा प्राणोनुष्टुप्तस्मा-

णा । इति । [4]ऐन्द्राग्नीत्यैन्द्र—अग्नी । हि । बार्हस्प-
त्या । इति । ब्रूयात् । इन्द्राग्नी इतीन्द्र—अग्नी । च ।
हि । देवानाम् । बृहस्पतिः । च । अयातयामान इ-
त्ययात—यामानः । [5]अनुचरवतीत्यनुचर—वती । भ-
वति । अजामित्वायेत्यजामि—त्वाय । अनुष्टुभेत्य-
नु—स्तुभा । अन्विति । चरति । आत्मा । वै । लो-
कंपृणेति लोकं—पृणा । प्राण इति प्र—अनः । अ-

[4]ऐन्द्राग्नी इत्यादि ॥ ऐन्द्राग्नी बार्हस्पत्या च लोकंपृणा । इन्द्राग्नी बृहस्पतिश्च देवानां मध्ये अयातयामानः तस्मादयातयाम्नी लोकंपृणेति तेभ्य उत्तरं ब्रूयात् ॥

[5]अनुचरवतीति ॥ सूददोहसा तद्वती भवति । अजामित्वा-येति । एकाकिनो हि पुनःपुनः प्रवृत्तौ जामित्वमालस्यं स्यात् । अ-नुष्टुभेति । अनुचरो विशेष्यते । 'ता अस्य सूददोहसः '* इत्येतया अनुष्टुभा पश्चादुच्चार्यमाणया लोकंपृणामनुवर्तते अध्वर्युरुपधीयमानाम् ।

*सं. ४-२-४.

त्प्राणस्सर्वाण्यङ्गान्यनु॑ चरति॒ ता
अ॑स्य॒ सूद॑दोहसः ॥ २७ ॥ इत्या॑ह॒
तस्मात्परु॑षिपरुषि॒ रस॒स्सोम॑ꣳ श्री-
णन्ति॒ पृभ॑य॒ इत्याहा॒न्नं॑ वै पृभ॑यन्न॑-
मे॒वाव॑ रुन्धे॒ऽर्को वा अ॒ग्निर॒र्कोन्न॑म-

नु॒ष्टुवि॒त्यनु॒-स्तुप्। तस्मा॑त्। प्रा॒ण इ॒ति॑ प्र॒-अ॒नः। सर्वा॑णि। अङ्गा॑नि। अ॒न्वि॒ति॑। चर॑ति। [6]ताः। अ॒स्य॒। सूद॑दोहस॒ इति॒ सूद॑-दोहसः ॥ २७ ॥ इ॒ति॑। आ॒ह॒। तस्मा॑त्। परु॑षिपरुषी॒ति॒ परु॑षि-परुषि। र॒सः। सोम॑म्। श्री॒णन्ति॒। [7]पृभ॑यः। इ॒ति॑। आ॒ह॒। अन्न॑म्। वै। पृभ॑यि॑। अन्न॑म्। एव। अव॑ इ॒ति॑। रु॒न्धे॒। अ॒र्कः। वै। अ॒ग्निः। अ॒र्कः। अन्न॑म्। अन्न॑म्। एव। अव॑ इ॒ति॑। रु॒न्धे॒।

आत्मा वा इत्यादि । आत्मस्थानीयां लोकंपृणां प्राणस्थानीया अनुष्टुक् यस्मादनुचरति तस्मात्प्राणस्सर्वाण्यङ्गान्यनुचरति ॥

[6]ता अस्येति ॥ मन्त्रावयवानां स्तुतिः । परुषिपरुषीति । पर्वणिपर्वणि सोमस्य रसो दुह्यते 'सूददोहसः'* इति लिङ्गात् ॥

[7]अन्नं वा इति ॥ शुक्रत्वात् अन्नाख्या वा तत्र साधनत्वात् सूददोहस उच्यन्ते । अर्को वा इति । अर्चनीयत्वादग्निरर्कः । अर्चनत्वादन्नम् ॥

---

*सं. ४-२-४.

ब्रह्मैवावं रुन्धे जन्मन्देवानां विशा-
स्त्रिष्वा रोचने दिव इत्याहेमानेवा-
स्मै लोकाञ्ज्योतिष्मतः करोति यो
वा इष्टकानां प्रतिष्ठां वेद प्रत्येव
तिष्ठति तयां देवतयाऽङ्गिरस्वद्ध्रुवा

[8]जन्मन्न्। देवानाम्। विशः। त्रिषु। एति। रोचने। दिवः। इति। आह। इमान्। एव। अस्मै। लोकान्। ज्योतिष्मतः। करोति। [9]यः। वै। इष्टकानाम्। प्रतिष्ठामिति प्रति-स्थाम्। वेद। प्रतीति। एव। तिष्ठति। तया। देवतया। आङ्गिरस्वत्। ध्रुवा। सीद। इति। आह। एषा। वै। इष्टकानाम्।

---

[8]इमानेवेति ॥ 'त्रिष्वा रोचने'* इति लिङ्गात्। अनुचरवतीलोकंपृणयोः इतरेभ्यो विशेषवचनादेताद्विषयेव सूद्दोहाः। यो वा इष्टकानामिति सामान्यवचनात्तद्देवतं सर्वविषयमिति वेदितव्यम् ॥

[9]यो वा इत्यादि ॥ गतम्। एतेनोपाहिता इष्टकाः प्रतिष्ठिता भवन्ति। एषेति। प्रतिष्ठापेक्षया लिङ्गनिर्देशः ॥

इति पञ्चमे पञ्चमे षष्ठोनुवाकः ॥

---

*सं. ४-२-४.

सीदेत्यार्हैषा वा इष्टकानां प्रतिष्ठा य
एवं वेद प्रत्येव तिष्ठति ॥ २८ ॥
सुवर्गाय वा एष लोकाय चीयते
यदग्निर्वज्रं एकादशिनी यदग्नावेका-
दशिनीं मिनुयाद्वज्रेणैनꣳ सुवर्गा-
ल्लोकादन्तर्दध्याद्यन्न मिनुयात्स्वरु-

प्रतिष्ठेति प्रति—स्था । यः । एवम् । वेद । प्रतीति । एव । तिष्ठति ॥ २८ ॥

रूपाणि सूददोहस्तया षोडश च ॥ ६ ॥

[1]सुवर्गायेति सुवः—गाय । वै । एषः । लोकाय । चीयते । यत् । अग्निः । वज्रः । एकादशिनी । यत् । अग्नौ । एकादशिनीम् । मिनुयात् । वज्रेण । एनम् । सुवर्गादिति सुवः—गात् । लोकात् । अन्तः । दध्यात् । यत् । न । मिनुयात् ।

---

[1]सुवर्गायेत्यादि ॥ वज्रस्थानीया एकादशिनी एकादशानां यूपानां संहतिः । एकादशावयवा अस्येति 'शन्शतोर्डिनिः' इति डिनिप्रत्ययः । यदग्नौ ताम्मिनुयात् प्रक्षिपेत् । डुमिञ् प्रक्षेपणे । वज्रेणान्तर्धायकेन यजमानमग्निं वा सुवर्गादन्तर्दध्यात् स्वर्गादन्तर्हितं कुर्यात् । तया मितया स्वर्गोन्तर्हितस्स्यात् । अथ यदि न मिनुयात् स्वरुमद्भिर्यूपैः पशुसाधनैः निवर्तमानैः पशून्व्यर्धयेत्

स्वरुभिः पशून्व्यर्धयेदेकयूपं मिनोति नैनं वज्रेण सुवर्गाल्लोकादन्तर्दधाति न स्वरुभिः पशून्व्यर्धयति वि वा एष इन्द्रियेण वीर्येणर्ध्यते योऽग्निं चिन्वन्नधि क्रामत्यैन्द्रिया ॥ २१ ॥

स्वरुभिरिति स्वरु-भिः । पशून् । वीति । अर्ध-येत् । एकयूपमित्येक-यूपम् । मिनोति । न । ए-नम् । वज्रेण । सुवर्गादिति सुवः-गात् । लोकात् । अन्तर्दधातीत्यन्तः-दधाति । न । स्वरुभिरिति स्वरु-भिः । पशून् । वीति । अर्धयति । [2]वीति । वै । एषः । इन्द्रियेण । वीर्येण । ऋध्यते । यः । अग्निम् । चिन्वन् । अधिक्रामतीत्यधि-क्रामति ।

अवयवशः कुर्यात् । स्वरुशब्दान्मत्वर्थीयो लुप्यते । स्वरणादेव वाऽग्राणि तेषामपि पशुसाधनत्वात् । तस्मादेकयूपं मिनोति एको यूपः एकयूपः तं मित्वा तत्रैकादशिनानालभेत । तेन दोषद्वयाभावः, एकयूपस्याभावादेकादशिन्यभावाच्च ॥

[2]वि वा एष इत्यादि ॥ इन्द्रियेण वीर्येण व्यृद्धचते कः चिन्वन् हेतौ शता । चयनेन हेतुना योग्निमारोहति । ऐन्द्रचर्चेति । 'इन्द्रं विश्वा अवीवृधन्'* इत्यनया । 'उदात्तयणः'

---

*सं. ४-६-३.

ऋचाऽऽक्रमंणं प्रतीष्टंकामुपं दध्या-
नेन्द्रियेणं वीर्येण व्यृंध्यते रुद्रो वा
एष यदग्निस्तस्यं तिस्रश्शंरव्यांः
प्रतीचीं तिरश्चयनूची ताभ्यो वा ए-

ऐन्द्रिया ॥ २१ ॥ ऋचा । आक्रमंणमित्यां--क्रमं-
णम् । प्रतीतिं । इष्टंकाम् । उपेतिं । दध्यात् । न ।
इन्द्रियेणं । वीर्येण । वीतिं । ऋध्यते । [3]रुद्रः । वै ।
एषः । यत् । अग्निः । तस्यं । तिस्रः । शरव्यांः ।
प्रतीचीं । तिरश्चीं । अनूचीं । ताभ्यंः । वै । एषः ।

इति तृतीयाया उदात्तत्वम् । क्रमणं प्रतीति आक्रम्यते येन मार्गेण तं प्रति तेन लक्षितां पश्चादुत्तरतो वा इष्टकामुपदध्यात्; नेन्द्रियादिना व्यृद्ध्यते ॥

[3]रुद्रो वा इत्यादि ॥ रुद्रस्य तिस्रः शरव्याः शरस्थानीया हेतयः सन्ति लक्ष्ये मोक्तव्याः । तत्र काचित्प्रतीची प्रतिमुख-मागत्य देवाय सन्निधत्ते । काचित्तिरश्ची तिर्यगागत्यात्मानं दर्श-यति । काचिदनूची पृष्ठतः कृतानुगमना देवमनुसेवते । ताभ्य इति । ताभ्यश्शरव्याभ्यः एष आवृश्च्यते छिद्यते तासां रक्ष्यो न भवति कः योग्निं चिनुते । हेतुरयमावृश्चनस्य चयननिरो-धमसहमाना एवमभिभवेयुरिति । तस्मादग्निं चित्वा तिसृधन्वं ति-सृभिरिषुभिर्युक्तं धनुरयाचितमेव लक्षणाय विशिष्टाय दद्यात् । 'वा संज्ञायाम्' इति धनुषो नङादेशः, 'अनसन्तान्नपुंसकात्'

ष आ वृश्चयते योऽग्निं चिनुतेऽग्निं चित्वा तिसृधन्वमयाचितं ब्राह्मणाय दद्यात्ताभ्य एव नमस्करोत्यथो ताभ्य एवात्मानं निष्क्रीणीते यत्ते रुद्र पुरः ॥ ३० ॥ धनुस्तद्वातो अनु

एतं । वृश्चयते । यः । अग्निम् । चिनुते । अग्निम् । चित्वा । तिसृधन्वमिति तिसृ—धन्वम् । अयाचितम् । ब्राह्मणाय । दद्यात् । ताभ्यः । एव । नमः । करोति । अथो इति । ताभ्यः । एव । आत्मानम् । निरितं । क्रीणीते । [4]यत् । ते । रुद्र । पुरः॥३०॥ धनुः । तत् । वातः । अन्वितं । वातु । ते । त-

---

इत्यच् समासान्तः । तेन प्रसादनहेतुः नमस्कार एव ताभ्यः कृतो भवति । एवं शत्रुभ्यो अभिभवितृभ्यो निष्क्रीणीते रक्षणीय एव तासां भवति ॥

[4]उत्तरे श्रोण्यन्ते तिष्ठन् साञ्चितमग्निमुपतिष्ठते, अनुपरिक्रामं वा—यत्ते रुद्र इत्यादि ॥ हे रुद्र! अग्न्यात्मन् यत्ते पुरः पूर्वस्यां दिशि धनुः तत्तदीयं धनुः वातोऽनुवातु अनुकूलं वर्तमानोऽन्यत्र नयतु यथाऽस्मान्न बाधते । तद्वात इत्युपमानपदं तद्धनुर्वातवत् शीघ्रगतिः तमेवानुवातु अनुगच्छतु माऽत्र स्थितिः अस्मान् बाधिष्ठेति । कर्मणस्संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । हे रुद्र! तस्मै ते धनुषे तुभ्यमेव

वातु ते तस्मै ते रुद्र संवथ्सरेण
नमस्करोमि यत्ते रुद्र दक्षिणा धनु-
स्तद्वातो अनु वातु ते तस्मै ते रुद्र
परिवथ्सरेण नमस्करोमि यत्ते रुद्र
पश्चाद्धनुस्तद्वातो अनु वातु ते त-
स्मै ते रुद्रेदावथ्सरेण नमस्करोमि
यत्ते रुद्रोत्तराद्धनुस्तत् ॥ ३१ ॥ वा-
तो अनु वातु ते तस्मै ते रुद्रेदुव-

स्मै । ते । रुद्र । संवत्सरेणेति सं–वत्सरेण । नमः । करोमि । यत् । ते । रुद्र । दक्षिणा । धनुः । तत् । वातः । अन्विति । वातु । ते । तस्मै । ते । रुद्र । परिवत्सरेणेति परि–वत्सरेण । नमः । करोमि । यत् । ते । रुद्र । पश्चात् । धनुः । तत् । वातः । अन्विति । वातु । ते । तस्मै । ते । रुद्र । इदावत्सरेण । नमः । करोमि । यत् । ते । रुद्र । उत्तरादित्युत्–तरात् । धनुः । तत् ॥३१॥ वातः । अन्विति । वातु । ते । तस्मै । ते । रुद्र । इदुवत्सरेणेतीदु–वत्सरेण । नमः ।

वा अपनीतधनुषे संवत्सरेण नमस्करोमि आसंवत्सरभाविनं तन्नमस्कारं करोमि । एवमितरेऽपि व्याख्येयाः । प्रथमादिपञ्चमान्तानां समानां संवत्सरादयः आख्याः ॥

थ्सरेण नमस्करोमि यत्ते रुद्रोपरि धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्र वथ्सरेण नमस्करोमि रुद्रो वा एष यदग्निस्स यथा व्याघ्रः क्रुद्धस्तिष्ठत्येवं वा एष एतर्हि संचितमेतैरुप तिष्ठते नमस्कारैरेवैनꣳ शा-

करोमि । यत् । ते । रुद्र । उपरि । धनुः । तत् । वातः । अन्विति । वातु । ते । तस्मै । ते । रुद्र । वत्सरेण । नमः । करोमि । रुद्रः । वै । एषः । यत् । अग्निः । सः । यथा । व्याघ्रः । क्रुद्धः । तिष्ठति । एवम् । वै । एषः । एतर्हि । साञ्चितामिति सं-चितम् । एतैः । उपेति । तिष्ठते । नमस्कारैरिति नमः-कारैः । एव । एनम् । शमयति ।

---

[5]रुद्रो वा एष यदित्यादि ॥ एषां मन्त्राणां ब्राह्मणं मन्त्रगतरुद्रपदव्याख्यानायाग्नेः रुद्रत्वेन स्तुतिः । यथा व्याघ्रः कुतश्चित्कारणात् क्रुद्धः प्रसादनीयस्तिष्ठति सोयमग्निरपि एवं क्रुद्ध इव नमस्कारादिभिः प्रसादनीयः एतर्हि अस्मिन्काले भवति । 'इदमोर्हित्' 'एतेतौ रथोः' इति एतादेशः । तस्मात्संचितं समाप्तचितिकमग्निमेतैः 'यत्ते रुद्र' इत्यादिभिरुपतिष्ठते । नमस्कारैरेनं शमयत्येव ॥

मयति येऽग्नयः ॥ ३२ ॥ पुरीष्याः प्रविष्टाः पृथिवीमनु । तेषां त्वमस्युत्तमः प्रणो जीवातवे सुव । आपं त्वाऽग्ने मनसाऽऽपं त्वाऽग्ने तपसाऽऽपं त्वाऽग्ने दीक्षयाऽऽपं त्वाऽग्न उपसद्भिरापं त्वाऽग्ने सुत्ययाऽऽपं त्वाऽग्ने दक्षिणाभिरापं त्वाऽग्नेऽवभृथेनापं त्वा-

[6]ये।अग्नयः॥३२॥ पुरीष्याः । प्रविष्टा इति प्र—विष्टाः । पृथिवीम् । अनु । तेषाम् । त्वम् । असि । उत्तमइत्युत्—तमः । प्रेति । नः । जीवातवे । सुव । आपम् । त्वा । अग्ने । मनसा । आपम् । त्वा । अग्ने । तपसा । आपम् । त्वा । अग्ने । दीक्षया । आपम् । त्वा । अग्ने । उपसद्भिरित्युपसत्—भिः । आपम् । त्वा । अग्ने । सुत्यया ।

---

[6]येऽग्नयः पुरीष्या इत्यादिभिः प्रयास्यन्नग्निमुपतिष्ठते यजमानः। येऽग्नय इत्यनुष्टुप् ॥ अन्यानि यजूंषि । पुरीष्याः पुरीषार्हाः पुरीषवन्तः पृथिवीमनुप्रविष्टाः तेषां मध्ये उत्तमस्त्वमसि । उत्तमशब्द उच्चादिरन्तोदात्तः । तस्मादस्मान् जीवातवे जीवनाय प्रसुव प्रेरय अनुजानीहि वा । त्वामहमापं आप्तवानस्मि मनसा श्रद्धया तपसा एकस्तनव्रतादिना दीक्षया मौञ्जचादिलक्षणया उप-

ऽग्ने वशयाऽऽपं त्वाऽग्ने स्वगाकारे-
णेत्याहैषा वा अग्नेराप्तिस्तयैवैनं-
माप्नोति ॥ ३३ ॥

आपम् । त्वा । अग्ने । दक्षिणाभिः । आपम् । त्वा । अग्ने । अवभृथेनेत्यव—भृथेन । आपम् । त्वा । अग्ने । वशया । आपम् । त्वा । अग्ने । [7]स्वगाकारेणेति—स्वगा—कारेण । इति । आह । एषा । वै । अग्नेः । आप्तिः । तया । एव । एनम् । आप्नोति ॥ ३३ ॥

ऐन्द्रिया पुर उत्तराह्नुस्तदग्नय आह्वाष्टौ च ॥७॥

सदादियागतः वशाया अनुबन्ध्यायागेन स्वगाकारेण यज्ञस्य यथास्वभागकल्पनया । किं बहुना एवं सर्वात्मनाऽपि त्वामेवाहं प्रापं त्वमपि मय्येव भवितुमर्हसीति ॥

[7]इत्याहेत्यादीनां ब्राह्मणम् ॥ एते मन्त्राः आप्तिसंज्ञाः अग्नेराप्तिहेतवः । आप्त्यपेक्षं स्त्रीत्वमेकत्वं च । अनयोपतिष्ठते इति सामर्थ्यात् गम्यते । तयाऽग्निं आप्नोतीत्येवोपस्थाता ॥

इति पञ्चमे पञ्चमे सप्तमः.

गायत्रेण पुरस्तादुपं तिष्ठते प्राण-
मेवास्मिन्दधाति बृहद्रथन्तराभ्यां प-
क्षावोजं एवास्मिन्दधात्यृतुस्था यं-
ज्ञायज्ञियेन पुच्छमृतुष्वेव प्रतिं ति-
ष्ठति पृष्ठैरुपं तिष्ठते तेजो वै पृष्ठा-

[1]गायत्रेणं । पुरस्तात् । उपेतिं । तिष्ठते । प्रा-
णमितिं प्र–अनम् । एव । अस्मिन्न् । दधाति । बृहद्रथन्तराभ्यामितिं बृहत्–रथन्तराभ्यांम् । प-
क्षौ । ओजंः । एव । अस्मिन्न् । दधाति । ऋतु-
स्थायंज्ञायज्ञियेंन । पुच्छंम् । ऋतुषुं । एव । प्रती-
तिं । तिष्ठति । [2]पृष्ठैः । उपेतिं । तिष्ठते । तेजंः ।
वै । पृष्ठानिं । तेजंः । एव । अस्मिन्न् । दधाति ।

---

[1]गायत्रेणेत्यादि ॥ गायत्रेण साम्ना पुरस्तात् पूर्वस्यां दिशि शिर उपतिष्ठते । बृहद्रथन्तराभ्यां पक्षौ उत्तरदक्षिणौ । ऋतुस्था यज्ञायज्ञीयं नाम साम यज्ञायज्ञीयमिति छन्दोगाः । 'वसन्तम्'* इत्यादियोनिकम् । वनस्पत्यादित्वात् पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् । बहुव्युत्पत्तिकत्वादनवग्रहः ॥

[2]पृष्ठैरिति ॥ सर्वैः पृष्ठसामभिः ॥

---

*सं. १-६-२.

नि तेज एवास्मिन्दधाति प्रजापतिरग्निमसृजत सोऽस्माथ्सृष्टः पराङैत्तं वारवन्तीयेनावारयत तद्वारवन्तीयस्य वारवन्तीयत्वꣳ श्यैतेन श्येती अकुरुत तच्छ्यैतस्य श्यैतत्वम् ॥ ३४ ॥ यद्वारवन्तीयेनोपतिष्ठते वा-

[3]प्रजापतिरिति प्रजा-पतिः । अग्निम् । असृजत । सः । अस्मात् । सृष्टः । पराङ् । ऐत् । तम् । वारवन्तीयेनेति वार-वन्तीयेन । अवारयत । तत् । वारवन्तीयस्येति वार-वन्तीयस्य । वारवन्तीयत्वमिति वारवन्तीय-त्वम् । श्येतेन । श्येती । अकुरुत । तत् । श्यैतस्य । श्यैतत्वमिति श्यैत-त्वम् ॥ ३४ ॥ [4]यत् । वारवन्तीयेनेति वार-वन्ती-

[3]प्रजापतिरित्यादि ॥ पराङ् अपुनरावृत्त एवागच्छत् । तं वारवन्तीयेन साम्ना अवारयत् न्यवर्तयत् परागमनात् । तस्माद्वारणहेतुत्वाद्वारवन्तीयम्, 'अश्वं नत्वा वारवन्तं'* इति लिङ्गात् । श्यैतेन साम्ना 'अभिप्रवस्सुराधसं'† इत्येतद्योनिना अग्निं श्येती अकुरुत आत्मगामिनमकरोत्, वशीकृतवानिति यावत् । श्यायतेर्गतिकर्मणः श्येतः अभूततद्भावे च्विः । ईषा अक्षादित्वाद्यणादेशाभावः । तस्मात् श्यानहेतुत्वात् श्यैतम् ॥

[4]यदित्यादि ॥ कर्तुः फलम् । प्रजापतेर्हृदयेन साम्ना इमाः

*ऋ. सं. १-२७-१. †ऋक्सं. ८-४९-१.

र्यत एवैनꣳ श्येतेन श्येती कुरुते प्रजापतेरहृदयेनापिपक्षं प्रत्युप ति-
ष्ठते प्रेमाणमेवास्य गच्छति प्रा-
च्यां त्वा दिशा सादयामि गायत्रे-
ण छन्दसाऽग्निना देवतयाऽग्नेश्शी-
र्ष्णाऽग्नेश्शिर उप दधामि दाक्षिणया
त्वा दिशा सादयामि त्रैष्टुभेन छन्द-

येन । उपतिष्ठत इत्युप–तिष्ठते । वारयते । एव । एनम् । श्येतेन । श्येती । कुरुते । प्रजापतेर्हृदये-
न । अपिपक्षमित्यपि–पक्षम् । प्रति । उपेति । तिष्ठते । प्रेमाणम् । एव । अस्य । गच्छति । [5]प्रा-
च्यां । त्वा । दिशा । सादयामि । गायत्रेण । छ-
न्दसा । अग्निना । देवतया । अग्नेः । शीर्ष्णा । अग्नेः । शिरः । उपेति । दधामि । दाक्षिणया ।
त्वा । दिशा । सादयामि । त्रैष्टुभेन । छन्दसा ।

प्रजाः 'प्रजापतेर्हृदयं' इत्येतत्प्रभवेन अविपक्षं अविहतपक्षं दक्षिणपूर्वं च कोणं उत्तरपूर्वं च प्रत्येकमुपतिष्ठते । प्रजापतेः हृदयमिव प्रजापतेः हृदयं समाख्यैषा । छान्दसः षष्ठ्या अलुक् । पूर्ववत् पूर्वोत्तरपदयो-र्युगपत्प्रकृतिस्वरत्वम् । पूर्ववदनवग्रहः । प्रियत्वमग्नेर्गच्छति ॥

[5]आत्मेष्टकाः—प्राच्या त्वेत्याद्याः॥ आत्मापेक्षं पुल्लिङ्गमेकवचनं च॥

सेन्द्रेण देवतयाऽग्नेः पक्षेणाग्नेः पक्ष-
मुप दधामि प्रतीच्या त्वा दिशा
सादयामि ॥ ३५ ॥ जागतेन छन्द-
सा सवित्रा देवतयाऽग्नेः पुच्छेनाग्नेः
पुच्छमुप दधाम्युदीच्या त्वा दिशा
सादयाम्यानुष्टुभेन छन्दसा मित्रा-
वरुणाभ्यां देवतयाऽग्नेः पक्षेणाग्नेः
पक्षमुप दधाम्यूर्ध्वया त्वा दिशा सा-
दयामि पाङ्क्तेन छन्दसा बृहस्पतिना
इन्द्रेण । देवतया । अग्नेः । पक्षेण । अग्नेः । पक्षम् ।
उपेति । दधामि । प्रतीच्या । त्वा । दिशा । साद-
यामि ॥ ३५ ॥ जागतेन । छन्दसा । सवित्रा ।
देवतया । अग्नेः । पुच्छेन । अग्नेः । पुच्छम् । उपे-
ति । दधामि । उदीच्या । त्वा । दिशा । साद-
यामि । आनुष्टुभेनेत्यानु-स्तुभेन । छन्दसा ।
मित्रावरुणाभ्यामिति मित्रा-वरुणाभ्याम् । दे-
वतया । अग्नेः । पक्षेण । अग्नेः । पक्षम् । उपेति ।
दधामि । ऊर्ध्वया । त्वा । दिशा । सादयामि ।
पाङ्क्तेन । छन्दसा । बृहस्पतिना । देवतया । अ-

देवतयाऽग्नेः पृष्ठेनाग्नेः पृष्ठमुप दधामि यो वा अपात्मानमग्निं चिनुतेऽपात्माऽमुष्मिंल्लोके भवति यस्सात्मानं चिनुते सात्माऽमुष्मिंल्लोके भवत्यात्मेष्टका उप दधात्येष वा अग्नेरात्मा सात्मानमेवाग्निं चिनुते सात्माऽमुष्मिंल्लोके भवति य एवं वेद ॥ ३६ ॥

अग्नेः । पृष्ठेन । अग्नेः । पृष्ठम् । उपेति । दधामि । [6]यः । वै । अपात्मानमित्यप-आत्मानम् । अग्निम् । चिनुते । अपात्मेत्यप-आत्मा । अमुष्मिन्न् । लोके । भवति । यः । सात्मानमिति स-आत्मानम् । चिनुते । सात्मेति स-आत्मा । अमुष्मिन्न् । लोके । भवति । आत्मेष्टका इत्यात्म-इष्टकाः । उपेति । दधाति । एषः । वै । अग्नेः । आत्मा । सात्मानमिति स-आत्मानम् । एव । अग्निम् ।

---

[6]सात्मानामिति ॥ आसामुपधाता सात्मेति विदुषस्स्तुतिः ॥

इति पञ्चमे पञ्चमे अष्टमोनुवाकः.

अग्न उदधे या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्माग्ने दुध्र ग-

चिनुते । सात्मेति स—आत्मा । अमुष्मिन्ने । लोके । भवति । यः । एवम् । वेद ॥ ३६ ॥

इयैतत्वं प्रतीच्यां त्वा दिशा सादयामि य-

स्सात्मानं चिनुते द्वाविꣳशतिश्च ॥ ८ ॥

[1]अग्ने । उदध इत्युद—धे । या । ते । इषुः । युवा । नाम । तया । नः । मृड । तस्याः । ते । नमः । तस्याः । ते । उपेति । जीवन्तः । भूयास्म ।

---

[1]पञ्चस्वपि चितिषु साञ्चिताहुतिमन्त्राः*—अग्न उदध इत्याद्याः ॥ हे अग्ने उदधे समुद्रवदपरिच्छेद्या या ते तव संबन्धिनी इषुः इच्छा युवा नाम हविषा देवैर्मिश्रियतीति प्रसिद्धा तयाऽस्मान् मृडय सुखय । तस्यास्सम्बन्धिने महानुभावाय तुभ्यं नमः । तस्यास्सम्बन्धिनं त्वामुपजीवन्तो वयं भूयास्म भूतिमन्तस्स्यामेति । कर्मभि व्यत्ययेन षष्ठी । एवं दुध्रादिष्वपि योज्यम् । तत्र सर्वेष्वपि 'अग्ने' इत्यादावनुषङ्गः, 'या त इषुः' इत्यादेरन्ते । 'नामन्त्रिते समानाधिकरणे' इति सामान्यवचनस्य 'अग्ने' इत्यामन्त्रितस्य विद्यमानत्वनिषेधात् दुध्रादीनि विशेषवचनानि विन्यस्यन्ते । दुध्रो दुर्धरः ।

---

*पञ्चमस्या विचितिषु साञ्चितामाहुतिमन्त्राः.

ह्य किꣳशिल वन्य या त इषुर्युवा
नाम तया नो मृड तस्यास्ते नम-
स्तस्यास्त उप जीवन्तो भूयास्म प-
श्च वा एतेऽग्नयो यच्चितय उदधिरेव
नाम प्रथमो दुध्रः॥३७॥ द्वितीयो ग-
ह्यस्तृतीयः किꣳशिलश्चतुर्थो वन्यः
पञ्चमस्तेभ्यो यदाहुती र्न जुहुयादध्व-

अग्ने । दुध्र । गह्य । किꣳशिल । वन्य । या । ते ।
इषुः । युवा । नाम । तया । नः । मृड । तस्याः ।
ते । नमः । तस्याः । ते । उपेति । जीवन्तः ।
भूयास्म । [2]पञ्च । वै । एते । अग्नयः । यत् । चि-
तयः । उदधिरित्युद–धिः । एव । नाम । प्रथमः ।
दुध्रः ॥ ३७ ॥ द्वितीयः । गह्यः । तृतीयः । किꣳ-
शिलः । चतुर्थः । वन्यः । पञ्चमः । [3]तेभ्यः । यत् ।

खलि गुणाभावः, पृषोदरादिः । गह्यः सर्वैर्गृहीतव्यः । गाहेर्यक्प्रत्ययः छान्दसः, ह्रस्वत्वं च । किंशीलः दुर्निरूपशीलः । पृषोदरादिः । वन्यः । सर्वैर्भजनीयः । छान्दसो यत् ॥

[2]पञ्च वा इत्यादि ॥ अत्रैव ब्राह्मणम् अग्न उदध्यादिनामानः पञ्चाग्नयः ॥

[3]तेभ्य इत्यादि ॥ गतम् । आहुतयः सञ्चिताहुतयः 'अग्न उदधे' इत्याद्याः ॥

युं च यजमानं च प्र दहेयुर्यदेता आहुती र्जुहोति भागधेयेनैवैनाञ्छमयति नार्तिमार्छत्यध्वर्युर्न यजमानो वाङ्म आसन्नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोश्श्रोत्रं बाहुवोर्बलमूरुवोरोजो-

आहुतीरित्या—हुतीः । न । जुहुयात् । अध्वर्युम् । च । यजमानम् । च । प्रेति । दहेयुः । यत् । एताः । आहुतीरित्या—हुतीः । जुहोति । भागधेयेनेति भाग—धेयेन । एव । एनान् । शमयति । न । आर्तिम् । एति । ऋच्छति । अध्वर्युः । न । यजमानः । [4]वाक् । मे । आसन् । नसोः । प्राण इति प्र—अनः । अक्ष्योः । चक्षुः । कर्णयोः । श्रोत्रम् । बाहुवोः । बलम् । ऊरुवोः । ओजः । अरिष्टा ।

---

[4]अथ चितेराद्रवणमन्त्रः—वाङ्म आसन्नित्यादि ॥ मम आसन् आस्ये वागिन्द्रियमविकलं तिष्ठतु आधाराधेययोरवियोगं प्रार्थयते। एवं सर्वत्र । 'पद्दन्' इत्यादिना आसन्भावः। नसोः नासिकयोः। 'ऊडिदम्' इति विभक्तेरुदात्तत्वम् । अक्ष्योरिति । 'ईचाद्विवचने' इतीकारस्योदात्तत्वात् 'उदात्तयणः' इति विभक्तेरुदात्तत्वम् । बाहुवोरूरुवोरिति । 'तन्वादीनां छन्दसि बहुलम्' इत्युवङ् । पूर्वबद्विभक्त्युदात्तत्वम्। ओजो वेगः । किं बहुना—विश्वानि उक्तव्यति-

ऽरिष्टा विश्वान्यङ्गानि तनूः ॥३८॥
तनुवा मे सह नमस्ते अस्तु मा मा
हिꣳसीरप वा एतस्मात्प्राणाः क्रा-
मन्ति योऽग्निं चिन्वन्नधि क्रामति वा-
ङ्म आसन्नसोः प्राण इत्याह प्राणा-
नेवात्मन्धत्ते यो रुद्रो अग्नौ यो अ-

विश्वानि । अङ्गानि । तनूः ॥ ३८ ॥ तनुवा । मे । सह । नमः । ते । अस्तु । मा । मा । हिꣳसीः । [5]अपेति । वै । एतस्मात् । प्राणा इति प्र–अनाः । क्रामन्ति । यः । अग्निम् । चिन्वन् । अधिक्राम-तीत्यधि–क्रामति । वाक् । मे । आसन् । नसोः । प्राण इति प्र–अनः । इति । आह । प्राणानिति प्र–अनान् । एव । आत्मन् । धत्ते । [6]यः । रुद्रः । अग्नौ । यः । अप्स्वित्यप्–सु । यः । ओषधीषु ।

रिक्तान्यपि ममाङ्गानि अरिष्टानि अहिंसितानि अक्षीणशक्तीनि सन्तु । तनूश्च मे तनुवा तन्ववयवैः हस्तपादादिभिः सहैव सर्वदा भवतु । पूर्ववदुवङ् । नमस्ते अस्तु मा मा हिंसीः यथोक्तमेव संपादय ॥

[5]अप वा एतस्मादित्यादि ॥ अत्रैव ब्राह्मणम् । अनेन मन्त्रेणाद्रवणात् आत्मति पुनः प्राणान् धत्ते ॥

[6]गावीधुकं चरुं चरमायामिष्टकायां निदधाति यस्यां शतरुद्रीयं

प्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्त्वाहुतिभागा वा अन्ये रुद्रा हविर्भागाः ॥ ३९ ॥ अन्ये शतरुद्रीयꣳ हुत्वा गावीधुकं चरुमेतेन यजुषा चरमायामिष्टकायां नि दध्याद्भागधेयेनैवैनꣳ शमयति तस्य वै शत-

यः । रुद्रः । विश्वा । भुवना । आविवेशेत्या—विवेश । तस्मै । रुद्राय । नमः । अस्तु । [7]आहुति-भागा इत्याहुति—भागाः । वै । अन्ये । रुद्राः । हविर्भागा इति हविः—भागाः ॥ ३९ ॥ अन्ये । शतरुद्रीयमिति शत—रुद्रीयम् । हुत्वा । गावीधुकम् । चरुम् । एतेन । यजुषा । चरमायाम् । इष्टकायाम् । नीति । दध्यात् । भागधेयेनेति भाग—धेयेन । एव । एनम् । शमयति । तस्य । तु । वै ।

जुहोति—यो रुद्र इत्यनुष्टुभा ॥ यो देवोग्न्यादिष्ववस्थितः ततश्च विश्वान्यपि भूतजातानि विवेश तस्मै नम इति ॥

[7]आहुतिभागा इत्यादि ॥ अत्रैव ब्राह्मणम् । आहुतिभागानां शतरुद्रीयहविर्भागाः । शतरुद्रीयानन्तरं गावीधुकं चरुनिधानं अं-

रुद्रीयꣳ हुतमित्याहुर्यस्यैतदग्नौ क्रि-
यत इति वसवस्त्वा रुद्रैः पुरस्तात्-
पान्तु पितरस्त्वा यमराजानः पि-
तृभिर्दक्षिणतः पान्त्वादित्यास्त्वा वि-
श्वेदेवैः पश्चात्पान्तु द्युतानस्त्वा मा-
रुतो मरुद्भिरुत्तरतः पातु ॥ ४० ॥
देवास्त्वेन्द्रज्येष्ठा वरुणराजानोऽध-

शतरुद्रीयमिति शत-रुद्रीयम् । हुतम् । इति । आहुः । यस्य । एतत् । अग्नौ । क्रियते । इति । [8]वसवः । त्वा । रुद्रैः । पुरस्तात् । पान्तु । पितरः । त्वा । यमराजान इति यम-राजानः । पितृभिरिति पितृ-भिः । दक्षिणतः । पान्तु । आदित्याः । त्वा । विश्वैः । देवैः । पश्चात् । पान्तु । द्युतानः । त्वा । मारुतः । मरुद्भिरिति मरुत्-भिः । उत्तरत इत्युत्-तरतः । पातु ॥ ४० ॥ देवाः । त्वा । इन्द्रज्येष्ठा इतीन्द्र-ज्येष्ठाः । वरुणराजान इति वरुण-राजानः । अधस्तात् । च । उपरिष्टात् । च । पा-

---

शाराधनेनांशमेव शमयति । तस्य त्वा इति । तस्यैव शतरुद्रीयं हुतं भवति तस्यैतच्चरुनिधानं क्रियत इत्याहुः यज्ञविदः ॥

[8]सञ्चितमग्निं आज्येन प्रोक्षति—वसवस्त्वेत्यादिभिः ॥ त्वामेवमेतैस्सह पान्त्विति ॥

स्तांश्चोपरिष्टाच्च पान्तु न वा एतेनं पूतो न मेध्यो न प्रोक्षितो यदेनम-तः प्राचीनं प्रोक्षति यथ्संचितमाज्येन प्रोक्षति तेनं पूतस्तेन मेध्यस्तेन प्रोक्षितः ॥ ४१ ॥

न्तु । [9]न । वै । एतेनं । पूतः । न । मेध्यः । न । प्रोक्षितं इति प्र–उक्षितः । यत् । एनम् । अतः । प्राचीनम् । प्रोक्षतीति प्र–उक्षति । यत् । सञ्चितमिति सं–चितम् । आज्येन । प्रोक्षतीति प्र–उक्षति । तेनं । पूतः । तेनं । मेध्यः । तेनं । प्रोक्षित इति प्र–उक्षितः ॥ ४१ ॥

दुध्रस्तनूर् हविर्भागाः पातु द्वात्रिꣳशच्च ॥ १ ॥

---

[9]न वा एतेनेत्यादि ॥ अत्रैव ब्राह्मणं—नायमग्निरेतेन प्रोक्षणेन पूतो नैव पूतः नैव मेध्यः मेधार्हः । किं बहुना प्रोक्षित एव न भवति । द्वितीयस्तुत्यर्थं प्रथमस्य निन्दा । केनेत्याह—अतः अस्माच्चरुनिधानात् प्राचीनं पूर्वं यदेनं प्रोक्षति 'सहस्रस्य प्रमा असि'* इति हिरण्यशल्कैः तदुक्तसममेवैतदृष्ट्या भवति । तस्माद्यत्सञ्चितमिदानीं चरुनिधानानन्तरं आज्येन प्रोक्षति वसवस्त्वादिभिः एतैर्मन्त्रैः । तेनैव पूतत्वादिभाव इति चरुनिधानस्यैव स्तुतिः; आज्यप्रोक्षणस्यैव वा ॥

इति पञ्चमे पञ्चमे नवमोनुवाकः.

---

*सं. ४-४-११.

समीची नामासि प्राची दिक्तस्यास्ते ऽग्निरधिपतिरसितो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जम्भे दधाम्योजस्विनी नामासि दक्षिणा दिक्तस्यास्त इ-

[1]समीची । नाम । असि । प्राची । दिक् । तस्याः । ते । अग्निः । अधिपतिरित्यधि–पतिः । असितः । रक्षिता । यः । च । अधिपतिरित्यधि–पतिः । यः । च । गोप्ता । ताभ्याम् । नमः । तौ । नः । मृडयंताम् । ते । यम् । द्विष्मः । यः । च । नः । द्वेष्टि । तम् । वाम् । जम्भे । दधामि । ओजस्विनी । नाम । असि । दक्षिणा । दिक् । तस्याः । ते । इन्द्रः । अधिपतिरित्यधि–पतिः । पृ-

---

[1]सर्पाहुतीः जुहोति—समीची नामासीत्याद्याः ॥ अनुपरिक्रामम् । समीची नाम त्वमसि सम्यग्गमना प्राची दिक् । तस्यास्तेऽग्निरधिपतिः असितो नाम कृष्णः सर्पो रक्षिता । तस्यास्तव योधिपतिः अग्निः यश्च गोप्ता ताभ्यां अधिपतिरक्षितृभ्यां नमः । तौ नः अस्माकं मृडयतां सुखयताम् । ते वयं यं द्विष्मः यश्च नः अस्मान् द्वेष्टि तं वां जम्भे युवयोरास्ये दधामि भक्षयितुम् । ओजस्विनी नाम त्वमसि

न्द्रोऽधिपतिः पृदाकुः प्राची नामासि
प्रतीची दिक्स्यास्ते ॥ ४२ ॥ सो-
मोऽधिपतिस्स्वजोऽवस्थावा नामा-
स्युदीची दिक्स्यास्ते वरुणोऽधिप-
तिस्तिरश्चीराजिरधिपत्नी नामासि बृ-
हती दिक्स्यास्ते बृहस्पतिरधिप-

दाकुः । प्राची । नाम । असि । प्रतीची । दिक् । तस्याः । ते ॥ ४२ ॥ सोमः । अधिपतिरित्यधि—प-
तिः । स्वज इति स्व—जः । अवस्थावेत्यव—स्थावा ।
नाम । असि । उदीची । दिक् । तस्याः । ते ।
वरुणः । अधिपतिरित्यधि—पतिः । तिरश्चीराजि-
रिति तिरश्चि—राजिः । अधिपत्नीत्यधि—पत्नी । ना-
म । असि । बृहती । दिक् । तस्याः । ते । बृह-
स्पतिः । अधिपतिरित्यधि—पतिः । श्वित्रः । वशि-

दक्षिणा दिक् । तस्यास्ते तव इन्द्रोधिपतिः । पृदाकुर्नाम सर्पोऽजगरः । रक्षितेत्यादिकं सर्वत्रानुषज्यते । प्राची नामासि त्वम् । प्रकृष्टगमना प्रतीची दिक् । तस्यास्ते सोमोधिपतिः स्वजो नाम सर्पो रक्षिता । स्वस्मिन् जायत इति स्वजः स्वायत्तबलः । स्वजनशील इत्येके । अवस्थावा नामासि त्वं अवस्थापयित्री उदीची दिक् । 'आतो मनिन्' इति वनिप्, व्यत्ययेन ङीप्रेफयोरभावः, मत्वर्थीयो

तिश्श्वित्रो वाशिनी नामासीयं दि-
क्तस्यास्ते यमोऽधिपतिः कल्माष-
ग्रीवो रक्षिता यश्चाधिपतिर्यश्च गो-
प्ता ताभ्यां नमस्तौ नो मृडयतां ते
यं द्विष्मो यश्च ॥ ४३ ॥ नो द्वेष्टि तं
वां जम्भे दधाम्येता वै देवता अ-

नी । नाम । असि । इयं । दिक् । तस्याः । ते । यमः । अधिपतिरित्यधि—पतिः । कल्माषग्रीव इति कल्माष—ग्रीवः । रक्षिता । यः । च । अधिपतिरित्यधि—पतिः । यः । च । गोप्ता । ताभ्याम् । नमः । तौ । नः । मृडयताम् । ते । यम् । द्विष्मः । यः । च ॥ ४३ ॥ नः । द्वेष्टि । तम् । वाम् । जम्भे । दधामि । [2]एताः । वै । देवताः । अग्निम् ।

वा वकारः । तस्यास्ते वरुणोधिपतिः तिरश्चराजिर्नाम सर्पो रक्षिता तिरश्चीनाः राजयोऽस्य सन्तीति । अधिपत्नी नामासि त्वं बृहती ऊर्ध्वा दिक् । तस्यास्ते बृहस्पतिरधिपतिः श्वित्रो नाम सर्पो रक्षिता श्वयनशीलः श्वित्रः । वशिनी नाम त्वमसि वशवतीति । इयं अधरा दिक् । तस्यास्ते यमोधिपतिः कल्माषग्रीवो नाम सर्पो रक्षिता ॥

[2]एता वा इत्यादि ॥ अत्रैव ब्राह्मणम् । आहुतीः एतास्सर्पाहुतीः हुत्वा एनान् शमयति ॥

ग्निं चित꣡ꣳ र꣡क्षन्ति ताभ्यो यदा꣡हु꣡ती-
र्न जु꣡हु꣡यादध्व꣡र्यु꣡ च꣡ यज꣡मानं च ध्या-
येयुर्यदे꣡ता आहु꣡तीर्जु꣡होति꣡ भाग꣡धेये꣡-
नै꣡वैना꣡꣯ञ्छमयति नार्ति꣡मार्छ꣡त्यध्व꣡र्युर्न
यज꣡मानो हे꣡तयो नाम꣡ स्थ꣡ तेषा꣡ं
वः पु꣡रो गृ꣡हा अ꣡ग्निर्व꣡ इष꣡वस्सालि꣡लो

चितम् । रक्षन्ति । ताभ्यः । यत् । आहुतीरित्या—
हुतीः । न । जुहुयात् । अध्वर्युम् । च । यजमा-
नम् । च । ध्यायेयुः । यत् । एताः । आहुतीरि-
त्या—हुतीः । जुहोति । भागधेयेनेति भाग—धेयेन।
एव । एनान् । शमयति । न । आर्तिम् । एति ।
ऋच्छति । अध्वर्युः । न । यजमानः । [3]हेतयः ।
नाम । स्थ । तेषाम् । वः । पुरः । गृहाः । अग्निः ।

---

[3]अथ गन्धर्वाहुतीः जुहोति—हेतयो नाम स्थेत्याद्याः ॥ यथा सर्पाहुतिः तथा गन्धर्वा हेतयो हन्तारो नाम शत्रूणाम् । तेषां वः युष्माकं पुरः पूर्वस्यां दिशि गृहाः । 'पूर्वाधर' इत्यसिप्रत्ययः । अग्नितुल्या युष्माकमिषवः तान्हर्म्यात्ताच्छब्द्यम् । सलिल इति वातनामं वातस्य नाम । येऽस्याग्नेः प्रेरयितारः । 'अनसन्तान्नपुंसकात्' इत्यच् समासान्तः । वातनाममित्यादि सर्वत्रानुषज्यते । अन्यतरतोनुषङ्गान्नाना एते । उभयतोनुषङ्गान्नानाः

निलिम्पा नाम ॥ ४४ ॥ स्थ तेषां वो दक्षिणा गृहाः पितरो व इषवः सगरो वज्रिणो नाम स्थ तेषां वः पश्चाद्गृहास्स्वप्नो व इषवो गह्वरोऽवः । इषवः । सलिलः । [4]निलिम्पा इति नि–लिम्पाः । नाम ॥ ४४ ॥ स्थ । तेषाम् । वः । दक्षिणा । गृहाः । पितरः । वः । इषवः । सगरः । [5]वज्रिणः । नाम । स्थ । तेषाम् । वः । पश्चात् । गृहाः । स्वप्नः । वः । इषवः । [6]गह्वरः । अवस्थावान इत्यव–स्थावानः । नाम । स्थ । तेषाम् । वः । उत्तरादित्युत्–तः

सर्पाहुतयः । तेभ्यो वो नम इत्यादि व्याख्यातमेव ॥

[4]निलिम्पा नाम गन्धर्वास्स्थ नितरां लिप्ताः । तेषां वो दक्षिणस्यां दिशि गृहाः । दक्षिणादाच् । पितरः पातारो युष्माकमिषवः । सगर इति वातस्य नाम ॥

[5]वज्रिणो नाम गन्धर्वास्स्थ ॥ तेषां पश्चादपरस्यां दिशि गृहाः । 'पश्चपश्चात्' इति निपात्यते । स्वप्नः स्वापनकारिणः शत्रूणां व इषवः ॥

[6]गह्वर इति वातस्य नाम । अवस्थावानो नाम गन्धर्वास्स्थ अवस्थापयितारः । पूर्ववद्वनिप् । तेषामुत्तरादुत्तरस्यां दिशि गृहाः । 'उत्तराधरदक्षिणादातिः' । आपः व्यापनशीलाः इषवः ॥

वस्थावानो नाम स्थ तेषां व उत्त-
राद्गृहा आपो व इषवस्समुद्रोऽधि-
पतयो नाम स्थ तेषां व उपरि गृ-
हा वर्षं व इषवोऽवस्वान्क्रव्या ना-
म स्थ पार्थिवास्तेषां व इह गृहाः
॥४५॥ अन्नं व इषवो निमिषो वा-
तनामं तेभ्यो वो नमस्ते नो मृड-

रात् । गृहाः । आपः । वः । इषवः । [7]समुद्रः । अ-
धिपतय इत्यधि-पतयः । नाम । स्थ । तेषाम् । वः ।
उपरि । गृहाः । वर्षम् । वः । इषवः । अवस्वान् ।
[8]क्रव्याः । नाम । स्थ । पार्थिवाः । तेषाम् । वः । इ-
ह । गृहाः ॥ ४५ ॥ अन्नम् । वः । इषवः । निमिष
इति नि-मिषः । वातनाममिति वात-नामम् । ते-
भ्यः । वः । नमः । ते । नः । मृडयत । ते । यम् ।

---

[7]समुद्र इति वातनाम । अधिपतयो नाम गन्धर्वास्स्थ । तेषां व उपरि ऊर्ध्वायां दिशि गृहाः । 'उपर्युपरिष्टात्' इति निपात्यते। वर्षं वृष्यमाणा वा वृष्टिहेतवो वा इषवः । अवस्वानिति वातस्य नाम ॥

[8]गन्धर्वाः [क्रव्या नाम गन्धर्वाः] पार्थिवास्स्थ तेषां वः इह पृथिव्यां गृहाः । 'इदमो हः' । अन्नं अन्नहेतवो युष्माकामिषवः । निमिष इति वातस्य नाम ॥

यत् ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि हुतादो वा अन्ये देवा अहुतादोऽन्ये तानग्निचिदेवोभयान्प्रीणाति दध्ना मधुमिश्रेणैता आहुतीर्जुहोति भागधेयेनैवैनान्प्रीणात्यथो खल्वाहुरिष्टका वै देवा अहुताद इति ॥४६॥ अनुपरिक्रामं जु-

द्विष्मः । यः । च । नः । द्वेष्टि । तम् । वः । जम्भे । दधामि । [9]हुताद इति हुत–अदः । वै । अन्ये । देवाः । अहुताद इत्यहुत–अदः । अन्ये । तान् । अग्निचिदित्यग्नि–चित् । एव । उभयान् । प्रीणाति । दध्ना । मधुमिश्रेणेति मधु–मिश्रेण । एताः । आहुतीरित्या–हुतीः । जुहोति । भागधेयेनेति भाग–धेयेन । एव । एनान् । प्रीणाति । अथो इति । खलु । आहुः । इष्टकाः । वै । देवाः । अहुताद इत्यहुत–अदः । इति ॥ ४६ ॥ अनुपरिक्रामामित्यनु–परि-

---

[9]हुतादो वा इत्यादि ॥ अत्रैव ब्राह्मणम् । एता गन्धर्वाहुतीः । अथो अपि च खल्वाहुः इष्टका अहुतादो देवा इति । अनुपरिक्रामं अनुपरिक्रम्यानुपरिक्रम्य अपरिवर्गं न किञ्चिदपि अपरिवृज्य ॥

ह्येत्यपरिवर्गमेवैनान्प्रीणातीमꣳ स्तनमूर्जस्वन्तं धयापां प्रप्यातमग्ने सरिरस्य मध्ये । उत्सं जुषस्व मधुमन्तमूर्व समुद्रियꣳ सदनमा विशस्व । यो वा अग्निं प्रयुज्य न

क्रामम् । जुहोति । अपरिवर्गमित्यपरि–वर्गम् । एव । एनान् । प्रीणाति । [10]इमम् । स्तनम् । ऊर्जस्वन्तम् । धय । अपाम् । प्रप्यातमिति प्र–प्यातम् । अग्ने । सरिरस्य । मध्ये । उत्सम् । जुषस्व । मधुमन्तमिति मधु–मन्तम् । ऊर्व । समुद्रियम् । सदनम् । एति । विशस्व । [11]यः । वै । अग्निम् । प्र-

---

[10]आज्यस्य पूर्णां स्रुचमग्नेर्विमोकं जुहोति—इमं स्तनमिति त्रिष्टुभा ॥ इमं स्तनं उत्पादकत्वेन मातृस्थानीयानामासां स्तनस्थानीयं स्रुक्स्थमाज्यं ऊर्जस्वन्तं रसवन्तं धय पिब । प्रप्यातं प्रवृद्धं हे अग्ने सरिरस्य सलिलस्य मध्ये यथा सलिलस्य मध्ये उत्सं प्रप्यायते न क्षीयते उत्सं उत्सस्थानीयं उत्स्यन्दनं जुषस्व सेवस्व मधुमन्तं मधुररसवन्तं ऊर्व वर्धयस्व च । ऊर्व पूरणे । यद्वा—हे ऊर्व महन् ते समुद्रियं समुद्रे भवं सदनं स्थानं आविशस्व आत्मीयमेव स्थानं अस्माभिर्विमुक्तो भजस्वेति । 'समुद्राभ्राद्धः' ॥

[11]यो वा अग्निमिति ॥ अत्रैव ब्राह्मणम् । कर्मसमाप्तावप्यवि-

वि मुञ्चति यथाऽश्वो युक्तोऽविमुच्य-
मानः क्षुध्यन्पराभवत्येवमस्याग्निः
परा भवति तं पराभवन्तं यजमानो-
ऽनु परा भवति सोऽग्निं चित्वा लु-
क्षः ॥ ४७ ॥ भवतीमꣳ स्तनमूर्ज-
स्वन्तं धयापामित्याज्यस्य पूर्णाꣳ

युज्येति प्र–युज्य । न । विमुञ्चतीति वि–मुञ्चति । यथा । अश्वः । युक्तः । अविमुच्यमान इत्यवि–मुच्यमानः । क्षुध्यन् । पराभवतीति परा–भवति । एवम् । अस्य । अग्निः । परेति । भवति । तम् । पराभवन्तमिति परा–भवन्तम् । यजमानः । अनु । परेति । भवति । सः । अग्निम् । चित्वा । लूक्षः ॥४७॥ भवति । इमम् । स्तनम् । ऊर्जस्वन्तम् । धय । अपाम् । इति । आज्यस्य । पूर्णाम् । स्रु-चम् । जुहोति । एषः । वै । अग्नेः । विमोक इति

मुक्तश्चेत् रथादौ यत्तोश्व इवास्याग्निः पराभवति नश्यति भागाभावात् । ततश्च यजमानोपि नश्येत् । स चित्वाऽग्निं लूक्षो दुर्गतो भवति । तस्मादेष होमोग्नेः विमोकाय भवति । विमुक्ताय वाऽन्नमपि दत्तं भवति । तस्मादित्यादि । यश्चैवमिमं वृत्तान्तं वेद यश्च न वेद लौकिकः । हितमेव सर्वेऽप्याहुः । कथं—सुहितः सुतृप्तो वाजी अश्वश्च सुधायं आभीक्ष्ण्येण शोभनं ददातीति । अ-

स्रुचं जुहोत्येष वा अग्नेर्विमोको वि-
मुच्यैवास्मा अन्नमपि दधाति तस्मा-
दाहुर्यश्चैवं वेद यश्च न सुधायꣳ ह
वै वाजी सुहितो दधातीत्यग्निर्वाव
वाजी तमेव तत्प्रीणाति स एनं प्री-
तः प्रीणाति वसीयान्भवति ॥४८॥

वि–मोकः । विमुच्येति वि–मुच्य । एव । अस्मै । अन्नम् । अपीति । दधाति । तस्मात् । आहुः । यः । च । एवम् । वेद । यः । च । न । सुधाय-मिति सु–धायम् । ह । वै । वाजी । सुहित इति सु–हितः । दधाति । इति । अग्निः । वाव । वा-जी । तम् । एव । तत् । प्रीणाति । सः । एनम् । प्रीतः । प्रीणाति । वसीयान् । भवति ॥ ४८ ॥

प्रतीची दिक्तस्यास्ते द्विष्मो यश्च निलिम्पा नामेह
गृहा इति लूक्षो वसीयान्भवति ॥१०॥

ग्निश्चायमश्वस्थानीयः । तमेव तेन भागेन प्रीणाति । स चैनं प्रीतः प्रीणाति । ततो वसीयान् वसुमत्तरो भवति यजमानः । 'वि-न्मतो लुक्' ॥

इति पञ्चमे पञ्चमे दशमोनुवाकः.

इन्द्रा॑य॒ राज्ञे॑ सू॒क॒रो वरु॑णाय॒ राज्ञे॒
कृ॒ष्णो॑ य॒माय॒ राज्ञ॒ ऋश्य॑ ऋ॒ष॒भाय॒
राज्ञे॑ गव॒यश्शा॑र्दू॒लाय॒ राज्ञे॑ गौ॒रः पु॑-
रुष॒राजाय॑ म॒र्कटः॑ क्षिप्र॒श्ये॒नस्य॒ व-
र्ति॑का॒ नील॑ङ्गोः॒ क्रिमि॒स्सोम॑स्य॒ रा-

[1]इन्द्रा॑य । राज्ञे॑ । सू॒क॒रः । वरु॑णाय । राज्ञे॑ । कृ॒ष्णः॑ । य॒माय॑ । राज्ञे॑ । ऋश्यः॑ । ऋ॒ष॒भाय॑ । राज्ञे॑ । गव॒यः । शा॒र्दू॒लाय॑ । राज्ञे॑ । गौ॒रः । पु॒रु॒ष॒-रा॒जायेति॑ पुरुष–रा॒जाय॑ । म॒र्कटः॑ । क्षि॒प्र॒श्ये॒न॒-स्येति॑ क्षिप्र–श्ये॒नस्य॑ । वर्ति॑का । नील॑ङ्गोः । क्रि-

---

[1]अथाश्वमेधिकाः पशवो विधीयन्ते । वैश्वदेवं काण्डम् । 'इन्द्राय राज्ञे सूकरः' इत्यारभ्य एकाशीत्यः एकादशानुवाकास्ताता आरण्या वेदितव्याः । आद्या एकादशिनी—दुर्ग्रहांस्तान् सिंहादीन् चित्रपटे लिखित्वा उपाकरणादि कुर्यात् इत्येके । ग्राम्याणां साधारण्येऽप्यारण्या एव ग्रहीतव्याः । तत्र चतुर्थ्या षष्ठचन्तेन च देवतासम्बन्धः प्रतिपाद्यते । इन्द्राय देवानां राज्ञे सूकरो वराह आलभ्यते । वरुणाय अपां राज्ञे कृष्णः कृष्णमृगः । यमाय धर्माणां राज्ञे ऋश्यः मृगविशेषः । गुणविहीनवान् [विहीनो वा] । ऋषभाय गवां राज्ञे गवयः गोसदृशः सास्नारहितः । शार्दूलाय आरण्यानां राज्ञे गौरः गौरमृगः । रक्त इत्येके । शुक्ल इत्यन्ये । पुरुषाणां राज्ञे प्रधानाय म-

श्ञः कुलुङ्गस्सिन्धोश्शिꣳशुमारो हि-
मवतो हस्ती ॥ ४९ ॥
मयुः प्राजापत्य ऊलो हलीक्ष्णो वृ-
षदꣳशस्ते धातुस्सरस्वत्यै शारि-

मिः । सोमस्य । राज्ञः । कुलुङ्गः । सिन्धोः । शि-
ꣳशुमारः । हिमवत इति हिम–वतः । हस्ती॥४९

इन्द्रायाष्टाविꣳशतिः ॥ ११ ॥

[1]मयुः । प्राजापत्य इति प्राजा–पत्यः । ऊलः।
हलीक्ष्णः । वृषदꣳशः । ते । धातुः । सरस्वत्यै ।
शारिः । श्येता । पुरुषवागिति पुरुष–वाक् । सर-

र्कटः वानरः । क्षिप्रश्येनस्य क्षिप्रगतेश्शकुनराजस्य श्येनविशे-
षस्य वर्तिका याअक[चटका]सदृशी । नीलङ्गोः नीलप्र-
भस्य सर्पविशेषस्य सरीसृपाणां राज्ञे क्रिमिः गोमयपिण्डकरी ।
सोमस्य राज्ञः ओषधीनां कुलुङ्गः चित्ता*कटुकस्वनः । सिन्धोः
शिंशुमारः ग्राहः । हिमवतो हस्ती गजः ॥

इति पञ्चमे पञ्चमे एकादशोनुवाकः.

---

[1]मयुः किंपुरुष इत्येके । आरण्यमयूर इत्यन्ये । स
प्राजापत्यः । ऊलादयस्त्रयो धातुः । ऊलः कुररः । कङ्क इत्य-

*चित्का.

इ॒ये॒ता पु॑रुष॒वाक्सर॑स्वते॒ शुक॑इ॒ये॒-
तः पु॑रुष॒वागा॑र॒ण्यो॑जो न॑कु॒लश्शाका॒
ते पौ॒ष्णा वा॒चे क्रौ॒ञ्चः ॥५०॥
अ॒पां नप्त्रे॑ ज॒षो ना॒क्रो मक॑रः कु-
ली॒क॒य॒स्तेऽकू॑पारस्य वा॒चे पै॒ङ्ग॒रा॒जो

स्वते । शुकः । इयेतः । पुरुषवागिति पुरुष—वाक् । आरण्यः । अजः । नकुलः । शाकाः । ते । पौष्णाः । वाचे । क्रौञ्चः ॥ ५० ॥

मयुस्त्रयोविंशतिः ॥ १२ ॥

[1]अपाम् । नप्त्रे । जषः । नाक्रः । मकरः । कुलीकयः । ते । अकूपारस्य । वाचे । पैङ्गराज इति

न्ये । दीर्घकर्ण इत्यपरे । यच्छब्दश्रवणान्मत्स्या उत्तिष्ठन्ति । हलीक्षणः तृणसिंह इत्यन्ये । हरितचटक इत्येके । वृषदंशो मार्जारः तत्सदृश इत्येके । दीर्घकर्णो मृगसदृश इत्यन्ये । शार्यादयस्सरस्वते । शुकादयस्सप्त पौष्णाः । वाचे सरस्वत्याः क्रौञ्चः खञ्जरीटः दारुणरवः ॥

इति पञ्चमे पञ्चमे द्वादशोनुवाकः.

---

[1]अपां नप्त्रे चतुर्थाय और्वायाग्नये जषः अवट्टुण्डो [जषवत्तुण्डो] मकरः । झषो भाषायाम् । झष हिंसायाम् । पचाद्यच् । नक्रा-

भगाय कुषीतक आती वाहसो दर्वि-
दा ते वायव्या दिग्भ्यश्चक्रवाकः॥५१
बलायाजगर आखुस्सृजया शय-
ण्डकस्ते मैत्रा मृत्यवेऽसितो मन्य-

पैङ्ग—राजः । भगाय । कुषीतकः । आती । वाहसः। दर्विदा । ते । वायव्याः । दिग्भ्य इति दिक्—भ्यः। चक्रवाकः ॥ ५१ ॥

अपामेकान्न विꣳशतिः ॥ १३ ॥

[1]बलाय । अजगरः । आखुः । सृजया । शय-ण्डकः । ते । मैत्राः । मृत्यवे । असितः । मन्यवे।

दयः त्रयः अकूपारस्य समुद्रस्य । नक्रः दीर्घतुण्डो ग्राहः । दीर्घ-पुच्छो मत्स्य इत्येके । मकरः पर्यस्ततुण्डः । कुलीकयः बहुपान्म-त्स्यविशेषः नाकावर्तो नाम । वाचे पैङ्गराजः भारद्वाजः रक्ताकारः। समुद्रतरङ्गचारी महापक्षीत्यन्ये । चकोर इत्यपरे । भगाय कुषीतकः समुद्रकाकः । आत्यादयस्त्रयो वायव्याः । पूर्ववत् पुंसः शेषः । आती आतिः चाषः इत्येके । वाहसः मात्रहकः नक्तनायकः (?) धूमालेख इत्यन्ये । दर्विदा दर्वा श्येनात्मा जलपक्षी । द्रुमकुक्कुट इत्यन्ये । दिग्भ्यः चक्रवाकः दिवाविरही ॥

इति पञ्चमे पञ्चमे त्रयोदशोनुवाकः.

---

[1]बलायाजगरः प्रसिद्धः । आख्वादयस्त्रयो मैत्राः । आखुः प्रसिद्धः । सृजया नीलमक्षिका, शुक्लसर्प इत्येके । नीलमहिष इत्यपरे । शयण्डकः

वै स्वजः कुम्भीनसः पुष्करसादो
लोहिताहिस्ते त्वाष्ट्राः प्रतिश्रुत्कायै
वाहसः ॥ ५२ ॥
पुरुषमृगश्चन्द्रमसे गोधा कालका

स्वज इति स्व–जः । कुम्भीनस इति कुम्भी–नसः । पुष्करसाद इति पुष्कर–सादः । लोहिताहिरिति लोहित–अहिः । ते । त्वाष्ट्राः । प्रतिश्रुत्काया इति प्रति–श्रुत्कायै । वाहसः ॥ ५२ ॥

बलायाष्टादश ॥ १४ ॥

[1]पुरुषमृग इति पुरुष–मृगः । चन्द्रमसे । गोधा । कालका । दार्वाघाट इति दारु–आघातः । ते ।

कृकलासः । मृत्यवे असितः कृष्णसर्पः । मन्यवे स्वजः सर्पविशेषः । स्वयं जायते पलालादिषु । कुम्भीनसादयः त्रयस्त्वाष्ट्राः । कुम्भीनसः घोणः स्वापशीलः । पुष्करसादः पुष्करसर्प इत्यन्ये । भ्रमर इत्येके । लोहिताहिः श्वेतलोहितसर्पः । प्रतिश्रुत्कायै प्रतिश्रुत्यै वाहसः अल्पगात्रस्सर्पः ॥

इति पञ्चमे पञ्चमे चतुर्दशोनुवाकः.

---

[1]पुरुषमृगः पुरुषमुखो मृगः चन्द्रसमे । गोधादयः त्रयो वनस्पतीनाम् । गोधा मुसलिका । महागोधा इत्येके । कालका लाटा* । स्वा-

*सरटा इति माधवीये.

दार्वाघाटस्ते वनस्पतीनामेण्यह्वे कृ-
ष्णो रात्र्यै पिकः क्ष्विङ्का नील-
शीर्ष्णी तेऽर्यम्णे धातुः कृत्कटः॥५३
सौरी बलाकाऽर्यो मयूरऽश्येनस्ते ग-
न्धर्वाणां वसूनां कपिञ्जलो रुद्राणां

वनस्पतीनाम् । एणी । अह्वे । कृष्णः । रात्र्यै । पिकः । क्ष्विङ्का । नीलशीर्ष्णीति नील—शीर्ष्णी । ते । अर्यम्णे । धातुः । कृत्कटः ॥ ५३ ॥

पुरुषमृगोऽष्टादश ॥ १५ ॥

[1]सौरी । बलाका । ऋश्यः । मयूरः । श्येनः । ते । गन्धर्वाणाम् । वसूनाम् । कपिञ्जलः । रुद्राणाम् ।

दुफलखण्डिनी । दार्वाघाटः द्रुमकुक्कुटः । एणी मृगः अह्वे । कृष्णो मृगः रात्र्यै । पिकादयः त्रयः अर्यम्णे । पिकः कोकिलः । क्ष्विङ्का रक्तमुखी वानरी । नीलशीर्ष्णी कृष्णमुखी वानरी । 'अन उपधालोपिनः' इति ङीप् । धातुः कृत्कटः बिलवासी ॥

इति पञ्चमे पञ्चमे पञ्चदशोनुवाकः.

---

[1]सौरी बलाका प्रावृट्प्रिया । ऋश्यादयस्त्रयो गन्धर्वाणाम् । गन्धर्वा देवताः प्रसिद्धाः । वसूनां कपिञ्जलः तित्तिरिजातीयः अधो निपात्यः* रुद्राणां तित्तिरिः पुरुषस्वरः । रोहिताद्याः तिस्रः

---

*काट्टुक्कविळनरि इति द्रामिडभाषया प्रतिपदं क्वचित्कोशे दृश्यते.

तित्तिरी रोहित्कुण्डृणाचीं गोलत्तिका
ता अप्सरसामरण्याय सृमरः॥५४
पृषतो वैश्वदेवः पित्वो न्यङ्कुः क-
शस्तेऽनुमत्या अन्यवापोऽर्धमासा-
नां मासां कश्यपः क्रयिः कुटरुर्दा-

तित्तिरिः। रोहित्। कुण्डृणाचीं। गोलत्तिका। ताः। अप्सरसाम्। अरण्याय। सृमरः॥ ५४॥

सौर्यष्टादश॥ १६॥

[1]पृषतः। वैश्वदेव इति वैश्व—देवः। पित्वः। न्य-
ङ्कुः। कशाः। ते। अनुमत्या इत्यनु—मत्यै। अन्य-
वाप इत्यन्य—वापः। अर्धमासानामित्यर्ध—मासा-

अप्सरसाम्। रोहित् ऋश्यस्त्री कुण्डृणाची ग्रहगौळिका*। गोल-त्तिका खञ्जरीटका। पीतशुक्लेति केचित्†। अरण्याय सृमरः चमरः॥

इति पञ्चमे पञ्चमे षोडशोनुवाकः.

---

[1]पृषतः श्वेतः श्वेतबिन्दुशबलाङ्गो मृगः। पित्वादयस्त्रयोऽनुमत्यै। न्यङ्कुः हरिणः। ऋक्ष इत्येके। कशः सूतवशा नकुल-जातिः लोमवपुश्श्वा। अन्यवापः पुष्ट[क्षुद्र]विशेषः। मासां कश्यपः कच्छपः। क्रय्यादयस्त्रयस्सिनीवाल्यै। क्रयिः जलकुक्कुटः। हि-

---

*नच्चुप्पल्ली. †मंजट्टी.

त्यौहस्ते सिनीवाल्यै बृहस्पतये शि-
त्पुटः ॥ ५५ ॥
शका भौमी पान्त्रः कशो मान्थी-
लवस्ते पितृणामृतूनां जहका संव-

नाम् । मासाम् । कृश्यपः । कायिः । कुटरुः । दा-
त्यौहः । ते । सिनीवाल्यै । बृहस्पतये । शित्पुटः ॥

पृषतोऽष्टादश ॥ १७ ॥

[1]शका । भौमी । पान्त्रः । कशः । मान्थीलवः ।
ते । पितृणाम् । ऋतूनाम् । जहका । संवत्सरायेति
सं-वत्सराय । लोपा । कपोतः । उलूकः ।

रण्याशीत्येके । कुटरुः मृगसिंहः । उलूकविशेष इत्यन्ये । दात्यूहः जलकुक्कुट इत्येके । पुष्करिणीवसतिरित्यन्ये । बृहस्पतये शित्पुटः मार्जारसदृशो जातिविशेषः । वीतपूर इत्येके ॥

इति पञ्चमे पञ्चमे सप्तदशोनुवाकः.

---

[1]शका उक्ता* पान्त्रादयस्त्रयः पितृणाम् । शकुनिनिघातः कशः गतः† । मान्थीलवः महाउदभुक्‡ । शकुनिकुट्टक इत्येके । ऋतूनां जहका बिलवासी§ । क्रोष्टा शललिजातीयः । क्षुद्रविशेष इत्येके । संवत्सराय लोपा मृगविशेषः । लोमाविकेत्ये-

---

*सं. ५-५-१२. †सं. ५-५-१७. ‡पेरुवव्वाल्. §नोळनरी.

थ्सराय लोपा कपोत उलूकश्शश-
स्ते नैर्ऋताः कंकवाकुस्साविंत्रः ॥
रुरूं रौद्रः कंकलासश्शकुनिः पिप्पं-
का ते शंरव्यायै हरिणो मारुतो ब्र-
ह्मंणे शार्गस्तरक्षुंः कृष्णश्श्वा चंतुर-

शशः । ते । नैर्ऋता इतिं नैः-ऋताः । कृकवाकुंः । सावित्रः ॥ ५६ ॥

शकाऽष्टादंश ॥ १८ ॥

[1]रुरुंः । रौद्रः । कृकलासः । शकुनिंः । पिप्पंका । ते । शरव्यायै । हरिणः । मारुतः । ब्रह्मंणे । शार्गः । तरक्षुंः । कृष्णः । श्वा । चतुरक्ष इतिं चतुः-

---

के । श्मशानशकुनिरित्यन्ये । कपोतादयस्त्रयो नैर्ऋताः । कपोतो रक्तपादः । उलूको दिवाभीतः । शशः मृगविशेषः । उद्गत्य कुट्टिका ककवाकुः अरण्यकुक्कुटः ॥

इति पञ्चमे पञ्चमे अष्टादशोनुवाकः.

---

[1]रुरुः मृगविशेषः । ककलासादयः त्रयश्शरव्यायै । ककलासः कामरूपी* । शकुनिः काकः । पिप्पका कुलाली शकुन्तिका । हरिणो मारुतः गतः । ब्रह्मणे शार्गः आरण्यचटकः । तरक्ष्वादयः

---

*पचोरलि.

क्षो गर्दभस्त इतरजनानामग्नये धूं-
क्षणा ॥ ५७ ॥
अलज आन्तरिक्ष उद्रो मद्गुः प्लुव-
स्तेऽपामदित्यै हꣳससाचिरिन्द्राण्यै
कीरिशा गृध्रशितिकक्षी वार्ध्रा-

अक्षः । गर्दभः । ते । इतरजनानामितीतर—जनानाम् । अग्नये । धूंक्षणा ॥ ५७ ॥

रुरुर्विꣳशतिः ॥ १९ ॥

[1]अलजः । आन्तरिक्षः । उद्रः । मद्गुः । प्लुवः । ते । अपाम् । अदित्यै । हꣳससाचिरिति हꣳस—साचिः । इन्द्राण्यै । कीरिशा । गृध्रः । शितिकक्षीति शिति—कक्षी । वार्ध्राणसः । ते । दिव्याः । द्या-

त्रयः इतरजनानाम् । तरक्षुः व्याघ्रविशेषो गर्दभाकारः कृष्णवर्णः । चतुरक्षः श्वा अक्षणोरुपरि बिन्दुद्वयवान् । गर्दभः प्रसिद्धः । अग्नये धूंक्षणा श्वेतकाकी ॥

इति पञ्चमे पञ्चमे एकोनविंशोनुवाकः.

[1]अलजः भासः ॥ उद्रादयस्त्रयोपाम् । उद्रो जलबिडालः । मद्गुः जलकाकः । प्लुवः शकटबिलः । अदित्यै हंससाचिः सर्वश्वेतो हंसः । इन्द्राण्यै कीरिशा कुलाली शकुन्तिका । गृध्रादयस्त्रयो दिव्याः । गृध्रः प्रसिद्धः । शितिकक्षी पाण्डुरोदरः गृध्रः ।

णसस्ते दिव्या द्यावापृथिव्यां श्वा-
वित् ॥ ५८ ॥
सुपर्णः पार्जन्यो हꣳसो वृको वृष-
दꣳशस्त ऐन्द्रा अपामुद्रोऽर्यम्णे
लोपाशस्सिꣳहो नकुलो व्याघ्रस्ते
महेन्द्राय कामाय परस्वान् ॥५९॥

द्यावापृथिव्येति द्यावा-पृथिव्यां । श्वाविदिति श्व-
वित् ॥ ५८ ॥

अलजोऽष्टादश ॥ २० ॥

[1]सुपर्ण इति सु-पर्णः । पार्जन्यः । हꣳसः । वृकः । वृषदꣳशः । ते । ऐन्द्राः । अपाम् । उद्रः । अर्यम्णे । लोपाशः । सिꣳहः । नकुलः । व्याघ्रः । ते । महेन्द्रायेति महा-इन्द्राय । कामाय । पर-स्वान् ॥ ५९ ॥

सुपर्णोऽष्टादश ॥ २१ ॥

वार्ध्राणसः* कङ्कणचारीक इत्येके । खड्गमृग इत्येके । द्यावा-पृथिव्या श्वावित् । शलली सूचीरोमा ॥

इति पञ्चमे पञ्चमे विंशोनुवाकः.

सुपर्णः प्रसिद्धः हंसादयस्त्रय ऐन्द्राः । हंसो गतः । वृकः लोहितश्वा । वृषदंशः मार्जारसदृशः । अपामुद्र उक्तः† । अर्यम्णे

*अणराल्.

†सं.५-५-२०.

आग्नेयः कृष्णग्रीवस्सारस्वती मेषी बभ्रुस्सौम्यः पौष्णश्श्यामश्शितिपृष्ठो बार्हस्पत्यश्शिल्पो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नस्सꣳहितोऽघोरोमस्सावित्रो वारुणः पेत्वः ॥ ६० ॥

[1]आग्नेयः । कृष्णग्रीव इति कृष्ण—ग्रीवः । सारस्वती । मेषी । बभ्रुः । सौम्यः । पौष्णः । श्यामः । शितिपृष्ठ इति शिति—पृष्ठः । बार्हस्पत्यः । शिल्पः । वैश्वदेव इति वैश्व—देवः । ऐन्द्रः । अरुणः । मारुतः । कल्माषः । ऐन्द्राग्न इत्यैन्द्र—

लोपाशः क्रोष्टा । सिंहादयस्त्रयो महेन्द्राय गताः । कामाय परस्वान्महिषः । गर्दभ इत्येके ॥

इति पञ्चमे पञ्चमे एकविंशोनुवाकः.

अतः परं ग्राम्या एकादशिन्यः—आग्नेयः कृष्णग्रीवः । गतः* । सारस्वती मेषी । गता* । मेषवर्णेत्येके । बभ्रुः पाण्डरकपिलः । सौम्यः पौष्णः । श्यामः रक्तकृष्णः । शितिपृष्ठः श्वेतपृष्ठः । 'शिर्नित्याबह्वज्बहुव्रीहौ' इत्युत्तरपदान्तोदात्तत्वम् । शिल्पः बहुरूपः । ऐन्द्रो वारुणः सन्ध्यावर्णः । मारुतः कल्माषः कृष्णबिन्दुचितः

---

*सं. २-१-२.

अश्वंस्तूपरो गोंमृगस्ते प्रांजापत्या आंग्नेयौ कृष्णग्रींवौ त्वाष्ट्रौ लोंमश-सक्थौ शिंतिपृष्ठौ बांर्हस्पत्यौ धा-

अग्रः । सꣳहित इतिं सं–हितः । अधोरांम इत्यधः–रामः । सांवित्रः । वारुणः । पेत्वंः ॥६०॥

आग्नेयो द्वाविꣳशतिः ॥ २२ ॥

[1]अश्वंः । तूपरः । गोमृग इतिं गो–मृगः । ते । प्राजापत्या इतिं प्राजा–पत्याः । आग्नेयौ । कृष्णग्रींवाविंतिं कृष्ण–ग्रीवौ । त्वाष्ट्रौ । लोमशसक्थाविंतिं लोमश–सक्थौ । शितिपृष्ठाविंतिं शि-

---

ऐन्द्राग्नः । संहितः शुक्लकृष्णशबलः अधोरामः श्वेतकृष्णोदरः वारुणः पेत्वः गठितमुष्को मेषः ॥

इति पञ्चमे पञ्चमे द्वाविंशोनुवाकः.

---

[1]अश्वादयः त्रयः प्राजापत्याः । अश्वो गतः । तूपरः शृङ्गहीनः । गोमृगः स्वेच्छाचारो लोक*पीडनरुचिः । (अङ्गपौ) । आग्नेयौ कृष्णग्रीवौ । गतौ† । त्वाष्ट्रौ लोमशसक्थौ बहुलोमकोरू । 'बहुव्रीहौ सक्थ्यक्ष्णोः' इत्यच् समासान्तः । 'सक्थ्यश्चाक्रान्तात्' इत्युत्तरपदान्तोदात्तत्वम् । शितिष्ठौ श्वेतष्ठौ । उक्त-

*लोम. †सं. २-१-२.

त्रे पृषोदरस्सौर्यो बलक्षः पेत्वः॥६१
अग्नयेऽनीकवते रोहिताञ्जिरनड्वान-
धोरामौ सावित्रौ पौष्णौ रजतना-
भी वैश्वदेवौ पिशङ्गौ तूपरौ मारुतः
कल्माषं आग्नेयः कृष्णोजस्सारस्व-

ति—पृष्ठौ । बारहस्पत्यौ । धात्रे । पृषोदर इति पृ-
ष—उदरः । सौर्यः । बलक्षः । पेत्वः ॥ ६१ ॥

अश्वष्षोडशा॥ २३ ॥

अग्नये । अनीकवत इत्यनीक—वते । रोहिता-
ञ्जिरिति रोहित—अञ्जिः । अनड्वान् । अधोरामावि-
त्यधः—रामौ । सावित्रौ । पौष्णौ । रजतनाभी इ-
ति रजत—नाभी । वैश्वदेवाविति वैश्व—देवौ । पि-
शङ्गौ । तूपरौ । मारुतः । कल्माषः । आग्नेयः । कृ-

मुत्तरपदान्तोदात्तत्वम् । धात्रे पृषोदरः श्वेताबिन्दुमद्बुरः । पृ-
षोदरादित्वादभीष्टरूपस्वरसिद्धिः । सौर्यो बलक्षः श्वेतः पेत्व उक्तः* ॥

इति पञ्चमे पञ्चमे त्रयोविंशोनुवाकः.

---

[1]अग्नयेऽनीकवते रोहिताञ्जिरनड्वान् रोहितलिङ्गः । रक्त इत्येके । अधोरामौ उक्तौ* । पौष्णौ रजतनाभी शुक्लनाभी । वैश्वदेवौ पिशङ्गौ तूपरौ उक्तौ† । मारुतः कल्माषः आग्नेयः कृष्णोजः ।

*सं. ५-५-२२. †सं. ५-५-२३.

तौ मेषौ वारुणः कृष्ण एकशिति-
पात्पेत्वः ॥ ६२ ॥

ष्णः । अजः । सारस्वती । मेषौ । वारुणः । कृष्णः । एकशितिपादित्येक—शितिपात् । पेत्वः ॥ ६२ ॥

अग्नयेऽनीकवते द्वाविꣳशतिः ॥ २४ ॥

यदेकेन प्रजापतिः प्रेणाऽनु यजुषाऽऽपो विश्व-
कर्माऽग्न आ याहि सुवर्गाय वज्रो गायत्रेणाग्नं उदधे
सर्मीच्चीन्द्राय मयुरपां बलाय पुरुषमृगस्सौरी पृष-
तऽशका रुरुरलजस्सुपर्ण आग्नेयोऽश्वोऽग्नयेऽनीक-
वते चतुर्विꣳशतिः ॥ २४ ॥

यदेकेन स पापीयानेतद्वा अग्नेर्धनु-
स्तद्देवास्त्वेन्द्रज्येष्ठा अपां न-
प्त्रेऽश्वस्तूपरो द्विषष्टिः॥६२॥

हरिः ओम्.

गतः । सारस्वती मेषी । गता* । वारुणः कृष्णः एकशितिपात् श्वेतैकपादः । पेत्व उक्तः† ॥

इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये
पञ्चमे काण्डे पञ्चमे प्रपाठके चतुर्विंशोनुवाकः.

समाप्तः प्रपाठकः.

हरिः ओम्.

---

*सं. २-१-२.

†सं. ५-५-२२.

अथ षष्ठप्रपाठकप्रारम्भः

हरिः ओम् ॥ हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः । अग्निं या गर्भं दधिरे विरूपास्ता न आपश्शꣳ स्योना भवन्तु । यासाꣳ राजा वरुणो याति

[1]हिरण्यवर्णा इति हिरण्य—वर्णाः । शुचयः । पावकाः । यासु । जातः । कश्यपः । यासु । इन्द्रः । अग्निम् । याः । गर्भम् । दधिरे । विरूपा इति वि—रूपाः । ताः । नः । आपः । शम् । स्यो-

---

[1]अतः परमग्निकाण्डमेवाग्नेयार्षेयम् ॥ तत्र कुम्भेष्टकोपधानमन्त्राः—हिरण्यवर्णा इत्याद्याः ॥ प्रथमा त्रिष्टुप् । हिरण्यवर्णाः हितरमणीयवर्णाः, हिरण्यसदृशवर्णा वा स्वच्छत्वात् । शुचयश्शुद्धाः । पावकाः शोधयित्र्यः । 'पावकादीनां छन्दसि' इतीत्वाभावः । यासु जातः कश्यपः प्रजापतिः 'तद्दशहोताऽन्वसृज्यत । प्रजापतिर्वै दशहोता'* इति । यासु चेन्द्रोजातः मध्यमो विद्युदात्मा, याश्चाग्निं गर्भं दधिरे धारयन्ति, यथा 'अग्ने गर्भो अपामसि'† इति । ता आपः विरूपाः नः अस्माकं शान्तिहेतवः स्योनास्सुखहेतवश्च भवन्तु ॥

---

*ब्रा. २-२-९. †सं. ४-२-३.

मध्ये सत्यानृते अवपश्यञ्जनानाम्।
मधुश्चुतश्शुचयो याः पावकास्ता न
आपश्शꣳ स्योना भवन्तु । यासाँ
देवा दिवि कृण्वन्ति भक्षं या अन्त-
रिक्षे बहुधा भवन्ति । याः पृथिवीं

नाः । भवन्तु । [2]यासाम् । राजा । वरुणः । याति।
मध्ये । सत्यानृते इति सत्य–अनृते । अवपश्य-
न्नित्यव–पश्यन् । जनानाम् । मधुश्चुत इति मधु–
श्चुतः । शुचयः । याः । पावकाः । ताः । नः ।
आपः । शम् । स्योनाः । भवन्तु । [3]यासाम् । दे-
वाः । दिवि । कृण्वन्ति । भक्षम् । याः । अन्तरि-
क्षे । बहुधेति बहु–धा । भवन्ति । याः । पृथिवीम् ।

---

[2]द्वितीया—यासां राजेति त्रिष्टुप् ॥ यासां मध्ये वरुणो राजा वरणीयो वा आदित्यो याति सत्यानृते जनानामवपश्यन् अवहितः पश्यन् मधुश्चुतः मधुरसस्य क्षारयित्र्यः शुचय इत्यादि । गतम् ॥

[3]यासां देवा इत्यादि ॥ तृतीया त्रिष्टुप् । यासामेकदेशममृतं सोमं वा देवा अपि भक्षं कृण्वन्ति । यद्वा—देवा आदित्यरश्मयः दिवि आदित्यमण्डले या भक्षं कुर्वन्ति स्थापयन्ति । कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी, 'धिन्विकृण्व्योरच' इत्युप्रत्ययः । याश्चान्तरिक्षे बहुधा भवन्ति बहुप्रकारा आविर्भवन्ति वर्षासु । याश्च

पयंसोन्दन्तिं ॥१॥ शुक्रास्ता न आ-
पश्शꣳ स्योना भंवन्तु । शिवेनं मा
चक्षुंषा पश्यतापश्शिवयां तनुवोपं
स्पृशत त्वचं मे । सर्वाꣳ अग्नीꣳ-
प्सुषदो हुवे वो मयि वर्चो बलमो-

पयंसा । उन्दन्तिं ॥ १ ॥ शुक्राः । ताः । नः । आ-
पंः । शम् । स्योनाः । भवन्तु । [4]शिवेनं । मा । चक्षुंषा । पश्यत । आपः । शिवयां । तनुवां । उ-
पेतिं । स्पृशत । त्वचंम् । मे । सर्वान्नं । अग्नीन्।
अप्सुषद इत्यंप्सु—सदंः । हुवे । वः । मयिं । व-

पृथिवीं पयसा स्वेनेत्यंशेन [स्वेनैवांशेन] ओदनेन वा हेतुना उन्दन्ति क्लेदयन्ति शुक्रा निर्मलाः । ता न इत्यादि । गतम् ॥

[4]चतुर्थी—शिवेनेति त्रिष्टुप् ॥ आप इति प्रथमपादान्तः । हे आपः! शिवेन शान्तेन चक्षुषा मां पश्यत । किञ्च—शिवया तनुवा शरीरेण मे त्वचमुपस्पृशत । तथा कृते अहमासादितात्मा सर्वान्नग्नीनप्सुषदः ये अप्सु युष्मासु सीदन्ति तान्युष्मत्सम्बन्धिनः युष्मदर्थं वा हुवे आह्वयामि । 'दीर्घादटि समानपादे' इत्युभयत्र रुत्वम्, 'तत्पुरुषे कृति बहुलम्' इति सप्तम्या अलुक् । यूयमपि मयि वर्च अन्नं बलं सामर्थ्यं ओजस्तेजश्च निधत्त नियमेन स्थापयत ॥

जो नि धत्त । यद्दस्संप्रयतीरहा-
वनंदता हते । तस्मादा नद्यो नाम
स्थ ता वो नामानि सिन्धवः । य-
त्प्रेषिता वरुणेन ताइशीभ꣡ꣳ समव-

र्चः । बलम् । ओजः । नीतिं । धत्त । [5]यत् । अ-
दः । सम्प्रयतीरितिं सं–प्रयतीः । अहौं । अनंदत ।
हते । तस्मात् । एतिं । नद्यः । नाम । स्थ । ता ।
वः । नामानि । सिन्धवः । [6]यत् । प्रेषिता इति

[5]पञ्चमी—यदद इत्यनुष्टुप् ॥ संप्रयतीरिति प्रथमपादान्तः । अद इति सप्तम्या अलुक् । अमुष्मिन्नहौ अहन्तव्ये मेघे हते ताडिते यद्यस्माद्यूयं संप्रयतीः संभूयेतश्चेतश्च प्रतियान्त्यः* अनदत शब्दं कृतवत्यस्स्थ । 'अन्येषामपि दृश्यते' इति संहितायां दीर्घत्वम् । एतेश्शतरि 'इणो यण्' 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम्, 'शतुरनुमः' इति नद्या उदात्तत्वम् । तस्मात्कारणादाभिमुख्येनाव्यवधानेनैव नद्यो नाम यूयं स्थ नदनान्नद्य इत्युच्यध्वे । नडिति पचादिषु पाठात्, दिवः 'उदात्तस्वरितयोः' इति विभक्तिस्स्वर्यते । हे सिन्धवः स्यन्दनशीलाः । 'स्यन्देः प्रसारणं धश्च' इत्युप्रत्ययः । ता तादृशानि वः युष्माकं नामानि अन्वर्थानीत्यर्थः ॥

[6]नामान्तराणामपि व्युत्पत्तिं प्रदर्शयिष्याम इति बहुवचननिर्देशेनोपक्षिप्तं तत्रापि इति नाम व्युत्पादयितुमाह—यदिति ॥

*धावन्त्यः.

लगत ॥ २ ॥ तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनु स्थन । अपकामꣳ स्यन्दमाना अवीवरत वो हि-

प्र–इषिताः । वरुणेन । ताः । शीभम् । समवल्गतेति सं–अवल्गत ॥ २ ॥ तत् । आप्नोत् । इन्द्रः । वः । यतीः । तस्मात् । आपः । अन्विति । स्थन । [7]अपकाममित्यप–कामम् । स्यन्दमानाः । अवीवरत । वः । हिकम् । इन्द्रः । वः । शक्तिभि-

---

षष्ठी—इयमप्यनुष्टुप् । यद्यदा वरुणेन राज्ञा प्रेषिता आदित्येन रश्मिभिर्वा नीताः सत्यस्ता यूयं शीभं शिवं शोभनं समवलगत सम्भूय नृत्यन्त इव शोभनं चेष्टितवत्यः । तदानीं वः युष्मान् यतीः गच्छतीः विलक्षणगतीः मध्यमस्थाने आप्नोदिन्द्रः । तस्मात्कारणात् अनु अनन्तरं ततः प्रभृति आपः स्थन अप्शब्दवाच्याः स्थ । आप्नोतेः कर्मणि क्विप्, 'तप्तनप्तनथनाश्च' इति तनपादेशः ॥

[7]सप्तमी—अपकाममित्यनुष्टुप् ॥ अत्र वारिति नाम व्याचष्टे—अपकामं विनैव कामेन स्यन्दमानाः सदा स्यन्दनं कुर्वाणाः वः युष्मान् इन्द्रः अवीवरत वृतवान् युष्मानात्मसात्कर्तुमैच्छत् । वः युष्माकं शक्तिभिः हेतुभिः । हिकमिति पादपूरणे, प्रसिद्धौ वा । वस ईप्सायाम्, चुरादिरदन्तः व्यत्ययेन सन्वद्भावः । वृणोतेर्वा स्वार्थिकोण् छान्दसः । देवीः देवनशीलाः तस्मात्कारणात्

कम् । इन्द्रो वज्रशक्तिभिर्देवीस्तस्मा-
द्वाणीमं वो हितम् । एको देवो अ-
प्यतिष्ठथ्स्यन्दमाना यथावशम् । उ-
दानिषुर्महीरिति तस्मादुदकमुच्यते ।

रिति शक्ति-भिः । देवीः । तस्मात् । वाः । नाम । वः । हितम् । [8]एकः । देवः । अपीति । अतिष्ठत् । स्यन्दमानाः । यथावशमिति यथा-वशम् । उदिति । आनिषुः । महीः । इति । तस्मात् । उदकम् । उच्यते । [9]आपः । भद्राः । घृतम् । इत् ।

वारिति नाम वः युष्माकं हितं निहितं, सर्वस्मै वा हितम् । वर्णव्यत्ययेन णत्वम् ॥

[8]अष्टमी—एक इत्यनुष्टुप् ॥ अत्रोदकं व्युत्पादयति—एको देव इन्द्रः अप्यतिष्ठत् स्वामित्वेनाध्यतिष्ठत् । अध्यर्थे अपिशब्दः । यथावशं यथेष्टं इतश्चेतश्च स्यन्दमाना आपः । यद्वा—स्यन्दमानास्सर्वास्स्रवन्तीरपः यथावशमप्यतिष्ठत् मध्यमे स्थाने आत्मनि आत्मनो वशं नीतवान् । तेन देवबहुमानेन आप उदानिषुः उच्छ्वसितवत्यः महीरिति महत्यो जाता वयमेतेनेति । 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । तस्मात्कारणादुदकमित्यपां नाम निरुच्यते उदानादुदकमिति । उत्पूर्वादनितेरौणादिकः कप्रत्ययः, नकारलोपश्च ॥

[9]नवमी—आपो भद्रा इति त्रिष्टुप् ॥ आपो भद्राः भन्दनीयाः

आपो भद्रा घृतमिदापं आसुरग्नी-
षोमौ बिभ्रत्याप इत्ताः । तीव्रो रसो
मधुपृचाम् ॥ ३ ॥ अरङ्गम आ मा
प्राणेन सह वर्चसा गन्न् । आदि-

आपः । आसुः । अग्नीषोमावित्यग्नी—सोमौ । बि-
भ्रति । आपः । इत् । ताः । तीव्रः । रसः । मधु-
पृचामिति मधु—पृचाम् ॥ ३ ॥ अरङ्गम इत्यरं—
गमः । एति । मा । प्राणेनेति प्र—अनेन । सह ।
वर्चसा । गन्न् । [10]आत् । इत् । पश्यामि । उत । वा ।

आप एव घृतमाज्यमासुः भवन्ति तृणादिनिष्पादनेन गवां धारक-
त्वात् । 'छन्दस्युभयथा' इति सार्वधातुकत्वात् असेर्लेटि न भू-
भावः । किञ्च—ता एव आपः अग्नीषोमौ बिभ्रति धारयन्ति
खुन्नादिहः [अन्नादिना] विद्युन्निष्पत्त्याऽग्निं रश्मिवृद्ध्या सोमम् । 'ईद-
ग्नेः' इतीत्वम्, 'अग्नेस्तुत् स्तोमसोमाः' इति षत्वम्, 'देवता-
द्वन्द्वे च' इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् । तादृशीनामपां
मधुपृचां मधुस्वादुना रसेन संपृक्तानां तीव्रः उद्भूतो रसः अर-
ङ्गमः पर्याप्तगमनः कदाचिदप्यक्षीणेन प्राणेन चक्षुरादिना वर्चसा
बलेन च सह मा आगन् आगच्छन्तु, तद्धेतुत्वात्प्राणादिस्थितेः ।
गमेः छान्दसे लुङि च्लेर्लुक् । 'मो नो धातोः' इति नत्वम् ॥

[10]दशमी—आदिति त्रिष्टुप् ॥ प्राणेन सहागन् इत्युक्तम् ।
तदिदानीं समर्थयते—आदित् अनन्तरमेवाहं पश्यामि । उत अपि

त्पश्यास्युत वां शृणोम्या मा घोषो
गच्छति वाङ्न आसाम् । मन्ये भे-
जानो अमृतस्य तर्हि हिरण्यवर्णा
अतृपं यदा वः । आपो हि ष्ठा मं-
योभुवस्ता न ऊर्जे दधातन । महे

शृणोमि । एतिं । मा । घोषः । गच्छति । वाक् ।
नः । आसाम् । मन्ये । भेजानः । अमृतस्य ।
तर्हि । हिरण्यवर्णा इति हिरण्य—वर्णाः । अतृ-
पम् । यदा । वः । [11]आपः । हि । स्थ । मयोभुव
इति मयः—भुवः । ताः । नः । ऊर्जे । दधातन ।

वा शृणोमि । घोषश्च मामागच्छति । अस्माकं वाग्रूपः आसां युष्माकमागमनेन रसेन वा । किं बहुना—तर्हि तदानीं अमृतस्य भेजान अमृतमेव भजन् अहं मन्ये तर्कयामि । पूर्ववत्कर्मणस्संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । कदा—यदाहि हे हिरण्यवर्णाः! वः युष्माकं अतृपं युष्मत्पानेन सुहितोभवम् । तृप तृंप तृप्तौ, तौदादिकः । सुहितार्थयोगे षष्ठी ॥

[11]आपो हिष्ठाद्यस्तिस्रः ' वि पाजसा '* इत्यत्र व्याख्याताः । आपः व्यापितास्स्थ मयोभुवः सुखस्य भावयित्र्यः ताः यूयं नः अस्मान् ऊर्जे रसाय दधातन स्थापयत ऊर्जं वा अस्मभ्यं दत्त महे महते रणाय रमणीयाय चक्षसे ज्ञानाय चेति प्रथमा ॥

---

*सं. ४-१-५.

रणा॑य॒ चक्ष॑से । यो व॑ शि॒वत॑मो
रस॒स्तस्य॑ भाजयते॒ह नः॑ । उ॒श॒ती-
रि॑व मा॒तरः॑ । तस्मा॒ अर॑ं गमाम
वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ । आपो॑
ज॒नय॑था च नः । दि॒वि श्र॑यस्वा-
न्तरि॑क्षे यतस्व पृथि॒व्या सं भ॑व ब्र-

म॒हे । रणा॑य । चक्ष॑से । [12]यः । वः । शि॒वत॑म॒ इ-
ति॑ शि॒व—त॒मः॑ । रसः॑ । तस्य॑ । भा॒ज॒य॒त॒ । इ॒ह ।
नः॑ । उ॒श॒तीः॑ । इ॒व॒ । मा॒तरः॑ । [13]तस्मै॑ । अर॑म् ।
ग॒मा॒म॒ । वः॑ । यस्य॑ । क्षया॑य । जिन्व॑थ । आपः॑ ।
ज॒नय॑थ । च॒ । नः॒ । [14]दि॒वि । श्र॒य॒स्व॒ । अ॒न्तरि॑-
क्षे । य॒त॒स्व॒ । पृ॒थि॒व्या । समिति॑ । भ॒व॒ । ब्रह्म॑व-

---

[12]यो वः युष्माकं शिवतमो रसः तं अस्मान् भाजयत इह कर्मणि । तस्य वा एकदेशमस्मान् प्रापयत उशतीः कामयमाना मातर इवेति द्वितीया ॥

[13]तस्मै युष्माकं रसाय पर्याप्तं गमाम तं गम्यास्म । यस्य रसस्य क्षयाय निवासभूतं पुरुषं जिन्वथ प्रीणयथ । किञ्च—अस्मान् हे आपः! जनयथ जातान्कुरुत युष्मद्रसवन्तो हि जाता भवन्तीति तृतीया ॥

[14]बार्हस्पत्ये उपदधाति—दिवि श्रयस्वेति यजुषा ॥ दिवि द्युलोके श्रयस्व धारकत्वेनास्व । अन्तरिक्षे च यतस्व धारकत्वेन व्याप्नि-

ह्मवर्चसमसि ब्रह्मवर्चसाय त्वा ॥४॥
अपां ग्रहान्गृह्णात्येतद्वाव राजसूयं
यदेते ग्रहास्सवोऽग्निर्वरुणसवो रा-

र्चसमिति ब्रह्म-वर्चसम् । असि । ब्रह्मवर्चसायेति ब्रह्म-वर्चसाय । त्वा ॥ ४ ॥

उन्दन्ति समवलगत मधुपृचां मातरो
द्वाविꣳशतिश्च ॥१॥

[1]अपाम् । ग्रहान् । गृह्णाति । एतत् । वाव । राजसूयमिति राज-सूयम् । यत् । एते । ग्रहाः । सवः । अग्निः । वरुणसव इति वरुण-सवः । रा-

---

यस्व । पृथिव्या च सह सम्भव एकीभव । एवं त्रीनपि लोकान्धारय ब्रह्मवर्चसमेव त्वमसि । तद्धेतुत्वात्ताच्छब्द्यम् । त्वा त्वां ब्रह्मवर्चसाय उपदधामीति शेषः ॥

इति पञ्चमे षष्ठे प्रथमोनुवाकः.

---

[1]अथासां ब्राह्मणं—अपां ग्रहान् गृह्णातीति विधिः ॥ गृह्यन्त इति ग्रहाः कुम्भाश्च कुम्भ्यश्च कुम्भेष्टका उच्यन्ते । 'ग्रहवृह-निश्चिगमश्च' इत्यप् । अपां सम्बन्धिन्यः कुम्भस्थाः आपोपां ग्रहाः ग्रहसंस्तवात् गृह्णाति चोदिताः एता उपदधातीति यावत् । वक्ष्यति च 'यस्यैता उपधीयन्ते'* इति । यद्वा—आपो गृह्यन्ते

---

*सं. ५-६-२.[2]

जसूर्यमग्निसवश्चित्यस्ताभ्यामेव सू-
यतेऽथो उभावेव लोकावभि जयति
यश्च राजसूयेनेजानस्य यश्चाग्निचि-
त आपो भवन्त्यापो वा अग्नेर्भ्रातृ-

जसूयमिति राज–सूयम् । अग्निसव इत्यग्नि–स-
वः । चित्यः । ताभ्याम् । एव । सूयते । अथो इ-
ति । उभौ । एव । लोकौ । अभीति । जयति ।
यः । च । राजसूयेनेति राज–सूयेन । ईजानस्य ।
यः । च । अग्निचित इत्यग्नि–चितः । [2]आपः । भ-

आसु ता अपां ग्रहाः कुम्भेष्टका उच्यन्ते । एतद्वावेति । त-
त्सादृश्यात्ताच्छब्द्यम् । सवोग्निरिति । सवो यज्ञविशेषः येनेश्वरो
भवति अग्निचित्या स्वयं स्व एवाग्निरिति । पूर्ववत्ताच्छब्द्यम् । उक्तं
कुम्भेष्टकानां राजसूयत्वम् । इदानीं तयोरेव विशेषमाह—वरुण-
सवः वरुणयज्ञो राजसूयं अग्निसवश्चित्योग्निरिति तत्प्रधानत्वात्
याभ्यां तावीश्वरावभूताम् । 'चित्याऽग्निचित्ये च' इति निपात्यते ।
चेतव्यश्चित्यः । ताभ्यामिति । अग्नीवरुणाभ्यामनुज्ञायते । यद्वा—
ईश्वरः स्तूयते । षु प्रसवैश्वर्ययोः, कर्मणि यत् । अपर आह—
ताभ्यामग्निसववरुणसवाभ्यां स्तूयते स्तोत्रीयते ताभ्यामुभाभ्यां अने-
नेष्टं भवतीति तद्वदीश्वरो भवतीत्यर्थः । अथो इत्यादि । गतम् ।
अग्निं चितवात् 'अग्नौ चेः' इति भूते क्विप् ॥

[2]आपो भवन्तीति इष्टकास्वरूपविधिः ॥ अत्र च 'अमृतं वा

व्या यदपोऽग्नेरधस्तादुपदधाति भ्रा-
तृव्याभिभूत्यै भवत्यात्मना परास्य
भ्रातृव्यो भवत्यमृतम् ॥ ५ ॥ वा
आपस्तस्मादद्भिरवतान्तमभिषिञ्च -
न्ति नार्तिमार्छीति सर्वमायुरेति य-
स्यैता उपधीयन्ते य उ चैना एवं

वन्ति । आपः । वै । अग्नेः । भ्रातृव्याः । यत् ।
अपः । अग्नेः । अधस्तात् । उपदधातीत्युप—दधा-
ति । भ्रातृव्याभिभूत्या इति भ्रातृव्य—अभिभूत्यै ।
भवति । आत्मना । परेति । अस्य । भ्रातृव्यः ।
भवति । [3]अमृतम् ॥५॥ वै । आपः । तस्मात् । अद्भिरि-
त्यत्—भिः । अवतान्तमित्यव—तान्तम् । अभीति ।
सिञ्चन्ति । न । आर्तिम् । एति । ऋच्छति । सर्वम् । आ-
युः । एति । यस्य । एताः । उपधीयन्त इत्युप—धीयन्ते ।

आपः '* इत्यादिस्तुतिर्भविष्यति । प्रागेवाधस्तात्त्वं विदधाति—आपो वा इत्यादि । यस्मादापोऽग्नेरशत्रवः तस्मादग्नेरधस्तादेना उपदधाति भ्रातृव्याभिभवाय भवति । ततः स्वयं भूतिमान् सम्पद्यते, भ्रातृव्यश्च विनष्टो भवति ॥

[3]अमृतं वा इत्यादिरपां स्तुतिः ॥ अवतान्तं मूर्छितं अद्भिरभिषिञ्चन्ति । सर्वमायुरेत्युपधाता आसां, यश्चैवं वेदिता ॥

---

*सं. ५-६-२.[3]

वेदान्नं वा आपः पशव आपोऽन्नं पशवोऽन्नादः पशुमान्भवति यस्यैता उपधीयन्ते य उ चैना एवं वेद द्वादश भवन्ति द्वादश मासास्संवथ्सरस्संवथ्सरेणैवास्मै ॥ ६ ॥ अन्नमवं रुन्धे पात्राणि भवन्ति पात्रे वा

यः । उ । च । एनाः । एवम् । वेद । [4]अन्नम् । वै । आपः । पशवः । आपः । अन्नम् । पशवः । अन्नाद इत्यन्न-अदः । पशुमानितिं पशु-मान् । भवति । यस्य । एताः । उपधीयन्त इत्युप-धीयन्तै । यः । उ । च । एनाः । एवम् । वेद । [5]द्वादश । भवन्ति । द्वादश । मासाः । संवत्सर इतिं सं-वत्सरः । संवत्सरेणेतिं सं-वत्सरेण । एव । अस्मै ॥ ६ ॥ अन्नम् । अवेतिं । रुन्धे । [6]पात्रा-

[4]अन्नं वा इत्यादि स्तुत्यन्तरमपाम् ॥ अन्नपशुसाधनात्वत्ताच्छब्व्यमपाम् । इदानीं प्रशस्ततरत्वं पशूनामाह—अन्नं पशव इति । अन्नस्यापि हेतवः पशव इति तेषामपि हेतव आप इति तासामुपधाता वेदिता च अन्नादः पशुमांश्च भवति ॥

[5]द्वादशेति ॥ सङ्ख्याविधिर्गतः* ॥

[6]पात्राणीति ॥ जलाधाररूपाणि । आद्वादशादिति । द्वादशमभि-

*सं. ५-४-८.

अन्नमद्यते सयोन्येवान्नमव रुन्ध आ द्वादशात्पुरुषादन्नमत्त्यथो पात्रान्न छिद्यते यस्यैता उपधीयन्ते य उ चैना एवं वेद कुम्भाश्च कुम्भीश्च मिथुनानि भवन्ति मिथुनस्य प्रजात्यै प्र प्रजया पशुभिर्मिथुनैर्जायते यस्यैता उपधीयन्ते य उ ॥ ७ ॥ चैना

णि । भवन्ति । पात्रैं । वै । अन्नम् । अद्यते । स-योनीति स-योनि । एव । अन्नम् । अवेतिं । रुन्धे । आ । द्वादशात् । पुरुषात् । अन्नम्। अत्ति । अथो इतिं । पात्रात् । न । छिद्यते । यस्यं । एताः । उपधीय-न्त इत्युप-धीयन्तें । यः । उ । च । एनाः । एवम् । वेदं । कुम्भाः । च । कुम्भीः । च । मिथुनानिं । भवन्ति । मिथुनस्यं । प्रजात्या इति प्र-जात्यै । प्रेतिं । प्रजयेतिं प्र-जया । पशुभिरितिं पशु-भिः । मिथुनैः । जायते । यस्यं । एताः । उपधीयन्त इत्युप-धीयन्तें । यः । उ ।

व्याप्य अन्नस्य अत्ता भवति । अपिं च पात्रत्वान्न छिद्यते उपधाता वेदिता च । विश्वजनादित्वात्तुगभावः ॥

[7]पात्राणि विशेष्यन्ते—कुम्भाश्चेत्यादि ॥ गतम् ॥

एवं वेद शुग्वा अग्निस्सोध्वर्युं यजमा-
नं प्रजाश्शुचाऽर्पयति यदुप उंपदधा-
ति शुचंमेवास्यं शमयति नार्तिमा-
र्छत्यध्वर्युर्न यजमानश्शाम्यन्ति प्र-
जा यत्रैता उंपधीयन्तेऽपां वा एतानि
हृदंयानि यदेता आपो यदेता अप उं-
पदधांति दिव्याभिरेवैनास्सꣳसृज-

॥७॥ च । एनाः । एवम् । वेदं । [8]शुक् । वै । अग्निः ।
सः । अध्वर्युम् । यजमानम् । प्रजा इतिं प्र—
जाः । शुचा । अर्पयति । यत् । अपः । उपदधा-
तीत्युंप—दधांति । शुचंम् । एव । अस्य । शमय-
ति । न । आर्तिंम् । एतिं । ऋच्छति । अध्वर्युः ।
न । यजमानः । शाम्यन्ति । प्रजा इतिं प्र—जाः ।
यत्र । एताः । उपधीयन्त इत्युंप—धीयन्तें । [9]अ-
पाम् । वै । एतानिं । हृदंयानि । यत् । एताः ।
आपंः । यत् । एताः । अपः । उपदधातीत्युंप—
दधांति । दिव्याभिः । एव । एनाः । समितिं । सृ-

[8]शुगित्यादि ॥ शोचयिता तापयिताऽग्निः अध्वर्युर्यजमानं प्रजाश्च शोकेन पीडयति । अपामुपधानेन स दोषः परिहृतो भवति ॥

[9]अपां वा इत्यादि ॥ समुदायावयवभावेन स्तुतिः । प्रियतरत्वा-

ति॒ वर्॒षुकः॒ प॒र्जन्यः॑ ॥ ८ ॥ भव॒ति॒
यो वा ए॒तासा॑मा॒यत॑नं क्लृ॒प्ति॒ वेद॒ा-
यत॑नवान्भवति॒ कल्प॑तेऽस्मा अनु-
सी॒तमुप॑ दधात्ये॒तद्वा आसा॒मा॒यत॑-
नमे॒षा क्लृ॒प्ति॒र्य ए॒वं वेद॒ायत॑नवान्भ-

ज॒ति॒ । वर्॒षुकः॒ । प॒र्जन्यः॑ ॥८॥ भव॒ति॒ । [10]यः । वै । ए॒तासा॑म् । आ॒यत॑नमित्या॑—यत॑नम् । क्लृ॒प्ति॒म्। वेद॑ । आ॒यत॑नवानित्या॒यत॑न—वान् । भव॒ति॒ । क॒ल्प॑ते । अ॒स्मै॒ । अ॒नु॒सी॒तमित्य॑नु—सी॒तम् । उप॑ । द॒धा॒ति॒ । ए॒तत् । वै । आ॒सा॒म् । आ॒यत॑नमित्या॑—यत॑नम् । ए॒षा । क्लृ॒प्तिः॑ । यः । ए॒वम् । वेद॑ । आ॒यत॑नवानित्या॒यत॑न—वान् । भव॒ति॒ । कल्प॑ते । अ॒-

---

ह्रदयत्वम् । दिव्याभिरिति । दिव्याभिर्वृष्ट्यादिभिः एना अवयवभूतात्मिकाः संसृजति मिश्रयति । ततो वर्षणशीलः पर्जन्यस्स्यात् हृदयस्थानीयानामासां इहोपहितत्वात् । 'लषपत' इत्यादिना उकञ् ॥

[10]यो वा इत्यादि ॥ आयतनं सीतात्मकं स्थानं क्लृप्तं उपधानविशेषं सामर्थ्यं वा एतदुभयं यो वेद स आयतनवान् भवति । कल्पते चास्मै अभिमतं सामर्थ्यं वा अस्मै जायते । अनुसीतमित्यादि । विभक्त्यर्थे अव्ययीभावः । सीतास्वित्यर्थः । एतदिति । सीताः ॥

वति कल्पतेऽस्मै द्वन्द्वमन्या उप दधाति चतस्रो मध्ये धृत्या अन्नं वा इष्टका एतत्खलु वै साक्षादन्नं यदेष चरुर्यदेतं चरुमुपदधाति साक्षात् ॥ ९ ॥ एवास्मा अन्नमव रुन्धे मध्यत उप दधाति मध्यत एवास्मा अस्मै । [11]द्वन्द्वमिति द्वं—द्वम् । अन्याः । उपेति । दधाति । चतस्रः । मध्ये । धृत्यै । [12]अन्नम् । वै । इष्टकाः । एतत् । खलु । वै । साक्षादिति स—अक्षात् । अन्नम् । यत् । एषः । चरुः । यत् । एतम् । चरुम् । उपदधातीत्युप—दधाति । साक्षादिति स—अक्षात् ॥ ९ ॥ एव । अस्मै । अन्नम् । अवेति । रुन्धे । [13]मध्यतः । उपेति । दधाति । मध्यतः ।

---

[11]द्वन्द्वमित्यादि ॥ यज्ञपात्रप्रयोगे 'द्वन्द्वम्' इति निपात्यते। अन्या आहुतयः प्राच्यादिषु मध्ये तु चतस्रः । तथा कृतं धारणाय भवति समर्थम् ॥

[12]अन्नं वा इति ॥ चरुविधिः । तत्साधनत्वात् ताच्छब्द्यम् । अपामित्यष्टकानां न मुख्यं, चरुस्तु साक्षादेव अव्यवधानेनान्नानामिति । यदेतमित्यादि । गतम् ॥

[13]मध्यत इति ॥ सर्वासामिष्टकानां मध्यत उदरे अन्नं दधाति तस्मान्मध्यत इति । मध्यमे वयसि भूयिष्ठं अन्नमद्यते ॥

न्नं दधाति तस्मान्मध्यतोऽन्नमद्यते
बार्हस्पत्यो भवति ब्रह्म वै देवा-
नां बृहस्पतिर्ब्रह्मणैवास्मा अन्नमवं
रुन्धे ब्रह्मवर्चसमसि ब्रह्मवर्चसाय
त्वेत्याह तेजस्वी ब्रह्मवर्चसी भवति
यस्यैष उपधीयते य उ चैनमेवं वेद ॥

एव । अस्मै । अन्नम् । दधाति । तस्मात् । मध्य-
तः । अन्नम् । अद्यते । [14]बार्हस्पत्यः । भवति ।
ब्रह्म । वै । देवानाम् । बृहस्पतिः । ब्रह्मणा । एव ।
अस्मै । अन्नम् । अवेति । रुन्धे । ब्रह्मवर्चसमिति
ब्रह्म–वर्चसम् । असि । ब्रह्मवर्चसायेति ब्रह्म–व-
र्चसाय । त्वा । इति । आह । तेजस्वी । ब्रह्मवर्च-
सीति ब्रह्म–वर्चसी । भवति । यस्य । एषः । उ-
पधीयत इत्युप–धीयते । यः । उ । च । एनम् ।
एवम् । वेद ॥ १० ॥

अमृतमस्मै जायते यस्यैता उपधीयन्ते य
उ पर्जन्यं उपदधाति साक्षात्सप्तर्च-
त्वारिꣳशच्च ॥ २ ॥

---

[14]बार्हस्पत्य इत्यादि ॥ गतम् ॥

इति पञ्चमे षष्ठे द्वितीयोनुवाकः.

भूतेष्टका उप दधात्यत्रात्र वै मृत्यु-
र्जायते यत्रयत्रैव मृत्युर्जायते तत
एवैनमव यजते तस्मादग्निचित्सर्व-
मायुरेति सर्वे ह्यस्य मृत्यवोऽवेष्टा-

[1]भूतेष्टका इति भूत–इष्टकाः । उपेति । दधाति । अत्रात्रेत्यत्र–अत्र । वै । मृत्युः । जायते । यत्रयत्रेति यत्र–यत्र । एव । मृत्युः । जायते । ततः । एव । एनम् । अवेति । यजते । तस्मात् । अग्निचिदित्यग्नि–चित् । सर्वम् । आयुः । एति । सर्वे । हि । अस्य । मृत्यवः । अवेष्टा इत्यव–इष्टाः । तस्मात् । अग्निचिदित्यग्नि–चित् । न । अभिचरि-

---

[1]भूतेष्टका इत्यादि ॥ भूतानि पृथिव्यादीनि तत्सम्बन्धिन्य इष्टकाः भूतेष्टकाः 'पृथिव्यै स्वाहा'* इत्येवं मन्त्राकारः । अत्रात्रेति । सर्वत्र पृथिव्या एकदेशे मृत्युर्जायते यत्रयत्र जायते तत्तस्सर्वस्मादेनं मृत्युमवयजते निवारयति भूतेष्टकाभिः । उभयत्रापि 'अनुदात्तञ्च' इति द्वितीयोऽनुदात्तः । तस्मादित्यत्रैव हेतुमाह—सर्वे हि मृत्यवोऽवेष्टाः निराकृताः । तत्सर्वमायुः पुरुषायुषं जीवति । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । तस्मादिति । एवं निरस्तमृत्युत्वादग्निचित् नाभिचरितव्यः न मारयितव्यः । कृत्यार्थे तवैप्रत्ययः । 'तवैचान्तश्च युगपत्' इति गतेः प्रकृतिस्वरत्वम्, प्रत्ययस्य चान्तोदात्तत्वम् । यद्यभिचरेदेनं

---

*सं. ७-५-११.

स्तस्मादग्निचिन्नाभिचरितवै प्रत्यगे-
नमभिचारस्स्तृणुते सूयते वा एष
योऽग्निं चिनुते देवसुवामेतानि ह-
वीꣳषि भवन्त्येतावन्तो वै देवानाꣳ
सवास्त एव ॥ ११ ॥ अस्मै सवा-

तवा इत्यभि—चरितवै । प्रत्यक् । एनम् । अभिचा-
र इत्यभि—चारः । स्तृणुते । [2]सूयते । वै । एषः ।
यः । अग्निम् । चिनुते । देवसुवामिति देव—सुवाम् ।
एतानि । हवीꣳषि । भवन्ति । एतावन्तः । वै । दे-
वानाम् । सवाः । ते । एव ॥ ११ ॥ अस्मै । सवान्।

अभिचरितारमेव अभिचारः प्रत्यक् स्तृणुते प्रतिमुखमागत्य मार-
यति ॥

[2]सूयते वा इत्यादि ॥ अग्निं चिन्वानो हि अग्निना सूयते ईश्वरः क्रियते । कर्मणि यत् । देवसुवामिति । देवानां सुवते ईशते इति देवसुत इति वक्तव्ये 'उगवादीनाम्' इति सुवते-स्तुगपवाद औकारः । ते च 'अग्नये गृहपतये'* इत्याम्नाताः अग्न्यादयोऽष्टौ देवाः । तेषामेतानि हवींषि भवन्ति 'अग्नये गृह-पतये पुरोडाशमष्टाकपालं'* इत्यादीनि । तान्यत्र कर्तव्यानीति ग-म्यते । एतावन्त इति । एतावन्त्येव देवतानामैश्वर्यसाधनानि या-न्यग्न्यादीनि हवींषि । सुवतेः करणे अप् । 'सवजवौ छन्दसि' इत्यन्तोदात्तत्वम् । तस्मात्ते सवाः स्वस्वामिनोग्न्यादयः अस्मै यज-

*सं. १-८-१०.

न्प्र यंच्छन्ति त एंनꣳ सुवन्ते स-
वोंऽग्निर्वंरुणसवो रांजसूयं ब्रह्मसव-
श्चित्यों दे॒वस्यं त्वा सावि॒तुः प्रंसव
इत्यांह सावि॒तृप्रंसूत एवैनं ब्रह्मंणा

प्रेतिं । यच्छन्ति । ते । एनम् । सुवन्ते । [3]सवः । अ-
ग्निः । वरुणसव इतिं वरुण–सवः । राजसूयमितिं
राज–सूयंम् । ब्रह्मसव इतिं ब्रह्म–सवः । चित्यंः ।
दे॒वस्यं । त्वा । सावि॒तुः । प्रसव इतिं प्र–सवे । इतिं ।
आह । सावि॒तृप्रंसूत इतिं सावि॒तृ–प्रसूतः । एव । ए-
नम् । ब्रह्मंणा । दे॒वतांभिः । अभीतिं । सिञ्चति ।
अन्नंस्यान्नस्येत्यन्नंस्य–अन्नस्य । अभीतिं । सिञ्चति ।
[4]अन्नंस्यान्नस्येत्यन्नंस्य–अन्नस्य । अवंरुद्ध्या इत्य-

मानाय सवान् ऐश्वर्याणि प्रयच्छन्ति । त एवाग्न्यादय एनं सुवन्ते अनुजानन्ति ऐश्वर्याय प्रेरयन्तीत्यर्थः । षू प्रेरणे ॥

[3]सवोग्निरित्यादिरभिषेकविधिः ॥ ऐश्वर्यहेतुरयमग्निः तत्र वरुणै-श्वर्यहेतुः राजसूयं, ब्रह्मैश्वर्यहेतुश्चित्योग्निः । तस्मात् 'देवस्य त्वा'* इत्यभिषेके ब्रह्मैश्वर्यलाभ इति । राजसूयग्रहणं तत्तुल्यतां चित्य-स्याग्नेः प्रदर्शयितुम् ॥

[4]अन्नस्यान्नस्येति ॥ सर्वौषधेनाभिषिञ्चति । विभक्तिव्यत्ययः । सर्वान्नाभिषेकः सर्वान्नलाभाय भवति ॥

---

*सं. १-७-१०.

देवताभिराभिषिञ्चत्यन्नंस्यान्नस्याभि-
षिञ्चत्यन्नंस्यान्नस्यावरुद्ध्यै पुरस्ता-
त्प्रत्यञ्चमाभिषिञ्चति पुरस्ताद्धि प्रती-
चीनमन्नंमद्यते शीर्षतोऽभिषिञ्चति
शीर्षतो ह्यन्नंमद्यत आ मुखादन्व-
वंस्रावयति ॥ १२ ॥ मुखत एवा-
स्मा अन्नाद्यं दधात्यग्नेस्त्वा साम्रा-
ज्येनाभिषिञ्चामीत्याहैष वा अग्नेस्स-
वं-रुद्ध्यै । [5]पुरस्तात् । प्रत्यञ्चम् । अभीति । सिञ्चति । पुरस्तात् । हि । प्रतीचीनम् । अन्नम् । अद्यते । [6]शी-र्षतः । अभीति । सिञ्चति । शीर्षतः । हि । अ-न्नम् । अद्यते । एति । मुखात् । अन्ववस्रावयतीत्यनु-अवस्रावयति ॥ १२ ॥ मुखतः । एव । अ-स्मै । अन्नाद्यमित्यन्न-अद्यम् । दधाति । [7]अग्नेः । त्वा । साम्राज्येनेति सां-राज्येन । अभीति । सि-

[5]पुरस्तादित्यादि । गतम् ॥

[6]शीर्षत इति ॥ शिरस्त आरभ्य आमुखादविच्छिन्नमन्ववस्राव-यति अस्य मुखे अन्नाद्यं स्थापितं भवति । 'आद्यादिभ्यस्तसिः' ॥

[7]अग्नेस्त्वेत्यादि ॥ मन्त्रावयवस्तुतिः । अग्नेः सवः अग्नेरैश्वर्यं ब्र-ह्मणैवोदितेन ब्रह्मैश्वर्यलाभः । गतमन्यत् ॥

वस्तेनैवैनंमभिषिञ्चति बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामीत्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवैनंमभिषिञ्चतीन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामीत्याहेन्द्रियमेवास्मिन्नुपरिष्टाद्धात्येतत् ॥ १३ ॥ वै राजसूयस्य रूपं य एवं विद्वानग्निं चिनुत उभावेव लोश्चामि । इति । आह । एषः । वै । अग्नेः । सवः । तेन । एव । एनम् । अभीति । सिञ्चति । बृहस्पतेः । त्वा । साम्राज्येनेति सां–राज्येन । अभीति । सिञ्चामि । इति । आह । ब्रह्म । वै । देवानाम् । बृहस्पतिः । ब्रह्मणा । एव । एनम् । अभीति । सिञ्चति । इन्द्रस्य । त्वा । साम्राज्येनेति सां–राज्येन । अभीति । सिञ्चामि । इति । आह । इन्द्रियम् । एव । अस्मिन्न् । उपरिष्टात् । दधाति । [8]एतत् ॥ १३ ॥ वै । राजसूयस्येति राज–सूयस्य । रूपम् । यः । एवम् । विद्वान् । अग्निम् । चिनुते । उभौ । एव । लोकौ ।

[8]एतद्वा इति ॥ राजसूयस्य स्वरूपमभिषेकाख्यं एतदग्नौ क्रि-

कावभि जयति यश्च राजसूयेनेजा-
नस्य यश्चाग्निचित इन्द्रस्य सुषुवा-
णस्य दशधेन्द्रियं वीर्यं परा ऽपतत्त-
देवास्सौत्रामण्या समभरन्थ्सूयते
वा एष योऽग्निं चिनुतेऽग्निं चित्वा
सौत्रामण्या यजेतेन्द्रियमेव वीर्यꣳ
संभृत्यात्मन्धत्ते ॥ १४ ॥

अभीति । जयति । यः । च । राजसूयेनेति राज-
सूयेन । इजानस्य । यः । च । अग्निचित इत्यग्नि-
चितः । [9]इन्द्रस्य । सुषुवाणस्य । दशधेति दश-
धा । इन्द्रियम् । वीर्यम् । परेति । अपतत् । तत् ।
देवाः । सौत्रामण्या । समिति । अभरन् । सूयते ।
वै । एषः । यः । अग्निम् । चिनुते । अग्निम् ।
चित्वा । सौत्रामण्या । यजेत । इन्द्रियम् । एव ।
वीर्यम् । सम्भृत्येति सं-भृत्य । आत्मन् । धत्ते ॥ १४ ॥

त एवान्ववस्रावयत्येतदृष्टाचत्वारिꣳशच्च ॥ ३ ॥

यते । तस्मादेवं विदित्वाऽग्निं चिन्वान उभौ लोकावभिजयति । राजसूययाजिनोऽग्निचितश्च ॥

[9]इन्द्रस्येत्यादि ॥ सौत्रामण्या विधिः । सुषुवाणस्य लब्धैश्वर्यस्य इन्द्रस्य दशधा विशीर्णमिन्द्रियं च पराऽपतत् । तन्मा पराऽपतदि-

सजूरब्दोऽयावभिस्सजूरुषा अरुंणीभिस्सजूस्सूर्य एतंशेन सजोषावश्विना

[1]सजूरितिं स—जूः । अब्दंः । अयांवभिरित्ययांव—भिः । सजूरितिं स—जूः । उषाः । अरुंणीभिः । सजूरितिं स—जूः । सूर्यंः । एतंशेन । स-

---

त्यग्निचयनानन्तरं सौत्रामण्या यजेत तत्तदिन्द्रियं वीर्यं च संभृत्याविशीर्णरूपं कृत्वा आत्मनि स्थापयति । 'सुपां सुलुक्' इति सप्तम्या लुक्, 'नडिसंबुद्ध्योः' इति नलोपाभावः ॥

इति पञ्चमे षष्ठे तृतीयोनुवाकः.

---

[1]दर्भस्तम्बे स्रुवाहुतीरभिजुहोति—सजूरब्द इत्यादिभिः ॥ वाक्यस्यापरिसमाप्तत्वात् घृतेन स्वाहेति सर्वत्रानुषज्यते । सर्वा एकपदाः त्रिष्टुभः । अन्त्याऽधिकाक्षरा । केचिद्घृतेनेत्यस्मादनुषङ्गाद्याश्वतस्रो गायत्रीराहुः । सजूस्समानप्रीतिरब्दः संवत्सरः । केन अयावभिः मासैः ते हि संवत्सरान्न यान्ति । तादृशो ह्यब्दः प्रजानां समृद्ध्यै भवति । 'संवत्सरो वा अब्दो मासा अयावाः' इति ब्राह्मणम् । यातेः 'आतो मनिन्' इति वनिप् । ब्राह्मणे त्वौणादिको वप्रत्ययः । जुषेः क्विपि 'ससजुषोरुः' इति रुत्वम् । 'समानस्य छन्दसि' इति सभावः, 'परादिश्छन्दसि' इत्युत्तरपदान्तोदात्तत्वम् । सजूरब्दो यावभिर्यथा भवति तदनुरूपं घृतेन स्वाहुतं करोति दर्भस्तम्बमभिजुहोति । एतेन शिष्टं व्याख्यातम् । उषाः प्रसिद्धाः अरुण्यो गावः ता हि तत्र मोदन्ते । सा च तादृशी प्रजानां भूतये

दꣳसोभिस्सजू रग्निर्वैश्वानर इडाभिर्घृतेन स्वाहा संवथ्सरो वा अब्दो मासा अर्यावा उषा अरुणीस्सूर्य एतशꣳ इमे अश्विना संवथ्सरोऽग्निर्वैश्वानरः पशव इडा पशवो घृतꣳ संव-

जोषाविति स—जोषौ । अश्विना । दꣳसोभिरिति दꣳसः—भिः । सजूरिति स—जूः । अग्निः । वैश्वानरः । इडाभिः । घृतेन । स्वाहा । [2]संवत्सर इति सं—वत्सरः । वै । अब्दः । मासाः । अर्यावाः । उषाः । अरुणीः । सूर्यः । एतशः । इमे इति । अश्विना । संवत्सर इति सं—वत्सरः । अग्निः । वैश्वानरः । पशवः । इडा । पशवः । घृतम् । संव-

---

भवति । एतशेन श्वेतेन सजूस्सूर्यः प्रजानां पुष्टयै भवति । अश्विनौ द्यावापृथिव्यौ व्यापकेनादित्येन तद्वत्यौ । 'इमे अश्विना' इति च ब्राह्मणम् । अश्वित्वेन स्तुतेः पुच्छिङ्गता । तौ सजोषसौ दंसोभिः आश्चर्यकर्मभिर्जन्तुभिः सजोषाः वैश्वानरोग्निस्संवत्सरात्मा इडाभिः पशुभिस्सजूः ॥

[2]अत्रैव ब्राह्मणं—संवत्सरो वा इत्यादि ॥ पदद्वयं व्याचष्टे—संवत्सरो वा अब्दो मासा अयावा इति । उषा अरुणीः सूर्य एतश इति । स्वरूपमात्रोपादानेन निगदसिद्धा एवैत इति दर्श-

थ्सरं पशवोऽनु प्र जायन्ते संवथ्स-
रेणैवास्मै पशून्प्र जनयति दर्भस्त-
म्बे जुहोति यत् ॥ १५ ॥ वा अस्या
अमृतं यद्वीर्यं तद्दर्भास्तस्मिंजुहोति
प्रैव जायतेऽन्नादो भवति यस्यैवं जु-
ह्वत्येता वै देवता अग्नेः पुरस्ताद्वा-

त्सरमिति सं—वत्सरम् । पशवः । अनु । प्रेति । जायन्ते । संवत्सरेणेति सं—वत्सरेण । एव । अस्मै । पशून् । प्रेति । जनयति । [3]दर्भस्तम्ब इति दर्भ—स्तम्बे । जुहोति । यत् ॥१५॥ वै । अस्याः । अमृतम् । यत् । वीर्यम् । तत् । दर्भाः । तस्मिन् । जुहोति । प्रेति । एव । जायते । अन्नाद इत्यन्न—अदः । भवति । यस्य । एवम् । जुह्वति । [4]एताः ।

यति । इमे इति । इयं चासौ च इमे द्यावापृथिव्यौ । 'त्यदादीनां यत्परम्' इतीदमश्शेषः । संवत्सरोग्निरित्यादि । गतम् । पशवो घृतमिति । तद्धेतुत्वात् संवत्सरमनुप्रजायन्ते पशवः । लक्षणेऽनोः कर्मप्रवचनीयत्वम् । संवत्सरेणेति । संवत्सरत्वाद्वैश्वानरस्य अग्नेः ॥

[3]दर्भस्तम्ब इति ॥ एतैर्मन्त्रैः । यद्वा इत्यादि । गतम् । अमृतं अमरणहेतुः ॥

[4]एता वा इति ॥ अब्दादयो देवता अग्नेरपि पूर्वभागभाजः

गास्ता एव प्रीणात्यथो चक्षुरेवाग्नेः पुरस्तात्प्रतिं दधात्यनंन्धो भवति य एवं वेदापो वा इदमग्रें सलिलमा-सीथ्स प्रजापंतिः पुष्करपुर्णे वातों भूतोंऽलेलायथ्सः ॥ १६ ॥ प्रतिष्ठां

वै । देवताः । अग्नेः । पुरस्ताद्भागा इतिं पुरस्ता-त्-भागाः । ताः । एव । प्रीणाति । अथो इतिं । चक्षुः । एव । अग्नेः । पुरस्तात् । प्रतीतिं । दधा-ति । अनंन्धः । भवति । यः । एवम् । वेदं । [5]आ-पंः । वै । इदम् । अग्रें । सलिलम् । आसीत् । सः । प्रजापंतिरितिं प्रजा-पतिः । पुष्करपर्ण इ-तिं पुष्कर-पर्णे । वातंः । भूतः । अलेलायत् । सः ॥ १६ ॥ प्रतिष्ठामितिं प्रति-स्थाम् । न । अ-

---

ताः प्रीणयत्यनेन होमेन । अपि च पुरस्ताद्धोमेनाग्नेः चक्षुः प्रतिदधाति । एवं वेदिताऽप्यनन्धो भवति, किं पुनः कर्ता ॥

[5]आपो वा इत्यादि ॥ चित्यत्वेन पृथिव्यास्तुतिः । इदं विश्वं अग्रे आदौ सलिलमात्रमासीत् प्रत्यस्तमितसमस्तविकारं सर्वमादौ सलिलमेवासीत् । यदिदमद्विकारं सर्वं आदौ सलिलमेवासीत् । तदानीं प्रजापतिः पुष्करपर्णे पद्मपत्रे तत्प्रभवे वातो भूतः वात इव भूत्वा अलेलायात् । लीयतेर्यङ्लुगन्तात् लुङि व्यत्य-

नाविन्दत् स एतदपां कुलायमप-
श्यत्तस्मिन्नग्निमचिनुत तदियमभव-
त्ततो वै स प्रत्यतिष्ठद्यां पुरस्तादुपा-
दधात्तच्छिरोऽभवथ्सा प्राची दिग्यां
दक्षिणत उपादधाथ्स दक्षिणः प-
क्षोऽभवथ्सा दक्षिणा दिग्यां पश्चादु-

विन्दत । सः । एतत् । अपाम् । कुलायम् । अ-
पश्यत् । तस्मिन्न् । अग्निम् । अचिनुत । तत् ।
इयम् । अभवत् । ततः । वै । सः । प्रतीति । अ-
तिष्ठत् । याम् । पुरस्तात् । उपादधादित्युप–अद-
धात् । तत् । शिरः । अभवत् । सा । प्राची ।
दिक् । याम् । दक्षिणतः । उपादधादित्युप–अद-
धात् । सः । दक्षिणः । पक्षः । अभवत् । सा । द-
क्षिणा । दिक् । याम् । पश्चात् । उपादधादित्युप–
अदधात् । तत् । पुच्छम् । अभवत् । सा । प्रती-

येन शप्, वृद्धिश्च । लेलेतिवा कण्ड्वादिः । तदानीं प्रतिष्ठामवस्थितां नाविन्दत नालभत पुष्करपर्णस्य लोलत्वादात्मनश्च वातभूतत्वात् । स तदानीमेव अपां कुलायं शैवलमित्यपश्यत् फेनमित्यमन्यत । तस्मिन्नग्निमचिनुत तदियं पृथिवी जाता । प्रजापतिश्च तत्र प्रतिष्ठितोऽभवत् । तत्र यामिष्टकां पूर्वस्यां दिश्युपादधात्

पादधात्तत्पुच्छमभवथ्सा प्रतीची दि-
ग्यामुत्तरत उपादधात् ॥ १७ ॥ स
उत्तरः पक्षोऽभवथ्सोदीची दिग्या-
मुपरिष्टादुपादधात्तत्पृष्ठमभवथ्सोर्ध्वा
दिगियं वा अग्निः पञ्चेष्टकस्तस्मा-
द्यदस्यां खनन्त्यभीष्टकां तृन्दन्त्यभि
शर्करा॰ सर्वा वा इयं वयोभ्यो

चीं । दिक् । याम् । उत्तरत इत्युत्–तरतः । उ-
पादधादित्युप–अदधात् ॥ १७ ॥ सः । उत्तर इ-
त्युत्–तरः । पक्षः । अभवत् । सा । उदीची । दि-
क् । याम् । उपरिष्टात् । उपादधादित्युप–अदधात् ।
तत् । पृष्ठम् । अभवत् । सा । ऊर्ध्वा । दिक् ।
[6]इयम् । वै । अग्निः । पञ्चेष्टक इति पञ्च–इष्टकः ।
तस्मात् । यत् । अस्याम् । खनन्ति । अभीति ।

तदस्याग्नेरिशरोभवत् प्रथमोऽत्पन्नत्वात् । ततः प्रभृति सा प्राची दिगासीत् । यां दक्षिणत इत्यादि । गतम् ॥

[6]इयं वा इति ॥ इयं पृथिवी पञ्चेष्टकोग्निः तस्मादस्यां यत्खनन्ति तदिष्टकामभिक्रन्दन्ति पूर्वं प्रजापतिनोपहितामच्छिद्रं यन्ति । उ तृदिर् हिंसानादरयोः, रौधादिकः । अभिशर्करामिति । तृन्दन्तीत्येव ॥

नक्तं दृशे दीप्यते तस्मादिमां वया-
ꣳसि नक्तं नाध्यासते य एवं वि-
द्वानग्निं चिनुते प्रत्येव ॥ १८ ॥ ति-
ष्ठत्यभि दिशो जयत्याग्नेयो वै ब्रा-
ह्मणस्तस्माद्ब्राह्मणाय सर्वासु दिक्ष्व-

इष्टंकाम्। तृन्दान्तिं। अभीतिं। शर्कराम्। [7]सर्वा। वै। इयम्। वयोभ्य इति वयः—भ्यः। नक्तम्। दृशे। दीप्यते। तस्मात्। इमाम्। वयाꣳसि। नक्तम्। न। अधीतिं। आसते। यः। एवम्। विद्वान्। अग्निम्। चिनुते। प्रतीतिं। एव ॥ १८ ॥ तिष्ठ-ति। अभीतिं। दिशः। जयति। [8]आग्नेयः। वै। ब्राह्मणः। तस्मात्। ब्राह्मणाय। सर्वासु। दिक्षु।

---

[7]इदानीं पृथिव्या अग्नित्वं लोकवृत्तान्तेन विप्रतिपन्नान् प्रति समर्थयते—सर्वा वा इति ॥ सर्वेयं पृथिवी रात्रौ पक्षिभ्यो दीप्यते प्रकाशते दृशे द्रष्टुं यथा सर्वां पृथिवीं वयांसि पश्यन्ति। तस्मादिमां रात्रौ नाध्यासते वयांसि वृक्षादावेव शेरते भयात्। तस्मादेवं ज्ञात्वा चिन्वानः प्रतितिष्ठत्येव, दिशश्चाभि जयति ॥

[8]आग्नेयो वा इत्यादि ॥ उक्तं 'इयं वा अग्निः'* इति। यस्मादेवं तस्मादाग्नेयस्य अग्निना सहोत्पन्नत्वात् नित्यमग्निना

---

*सं. ५-६-४.[6]

धुँक॒ꣳ स्वामे॒व तद्दिश॒मन्वे॑त्य॒पां वा
अ॒ग्निः कु॒लाय॑ं तस्मा॒दापो॒ऽग्निꣳ हारु॑-
का॒स्वामे॒व तद्योनिं॒ प्र वि॑शन्ति॥१९

अधुँकम् । स्वाम् । एव । तत् । दिशंम् । अन्वि-
तिं । एति । [9]अपाम् । वै । अग्निः । कुलायंम् ।
तस्मांत् । आपंः । अग्निम् । हारुंकाः । स्वाम् ।
एव । तत् । योनिंम् । प्रेतिं । विशन्ति ॥१९॥

यदं॑लेलाय॒त्स उं॑त्तर॒त उ॒पादं॑धादे॒व द्वात्रिꣳ॑-
शच्च ॥ ४ ॥

सम्बन्धोऽस्य ब्राह्मणस्य । 'सर्वत्राग्निकलिभ्याम्' इति ढक् । सर्वासु दिक्षु गमनमर्धुकं ऋद्धिशीलमग्नित्वात् सर्वासां दिशाम् । तदेवाह—स्वामेव आत्मभूतामेव दिशमत्येति अनु गच्छति । स्वार्थिक उकञ् ॥

[9]अपां वा इत्यादि ॥ उक्तमेवार्थं प्रत्यक्षेण समर्थयते । यस्मादपामग्निः कुलायं निवासस्थानं उक्तेन न्यायेन पृथिव्या अग्नित्वात् तादर्थ्याद्वा अपां 'अग्नेरापः'* इति ततो निर्गतत्वात् । तस्मादापोऽग्निं हारुकाः अग्निं हुत्वा तमनुप्रविशन्तीः पश्याम औष्ण्योपलम्भात् पृथिवीं चानुप्रविशन्तीः पश्यामः । पूर्ववदुकञ्, 'न लोकाव्यय' इति षष्ठीप्रतिषेधः । ततः स्वामेव योनिं निवासं कारणं वा अनुप्रविशन्ति । तस्मादुपपन्नमस्याग्नित्वमिति ॥

इति पञ्चमकाण्डे षष्ठप्रश्ने चतुर्थोनुवाकः.

---

*तै. उ. २-१.

संवथ्सरमुख्यं भृत्वा द्वितीयें संव-
थ्सर आग्नेयमष्टाकपालं निर्वपेदैन्द्र-
मेकादशकपालं वैश्वदेवं द्वादशक-
पालं बारहस्पत्यं चरुं वैष्णवं त्रि-
कपालं तृतीयें संवथ्सरेऽभिजितां
यजेत यदष्टाकपालो भवत्यष्टाक्षरा

[1]संवत्सरमिति सं—वत्सरम् । उख्यम् । भृत्वा। द्वितीयें । संवत्सर इति सं—वत्सरे । आग्नेयम् । अष्टाकपालमित्यष्टा—कपालम् । निरिति । वपेत् । ऐन्द्रम् । एकादशकपालमित्येकादश—कपालम् । वैश्वदेवमिति वैश्व—देवम् । द्वादशकपालमिति द्वादश—कपालम् । बारहस्पत्यम् । चरुम् । वैष्णवम् । त्रिकपालमिति त्रि—कपालम् । तृतीयें । संवत्सर इति सं—वत्सरे । अभिजितेत्यभि—जिता । यजेत । [2]यत् । अष्टाकपाल इत्यष्टा—कपा-

[1]संवत्सरमित्यादिस्तावः चितेऽग्नौ गुणविकारविधिः* । तत्रैवोख्यस्य संवत्सरभरणम्† । द्वितीये संवत्सरे आग्नेयादिनिर्वापः । तृतीये अभिजिता अग्निष्टोमेन यजेत ॥

[2]यदित्यादिरेषामष्टाकपालादीनां क्रमेण स्तुतिः । दाधार धारयति । छान्दसो लिट् । गायत्रीछन्दः दाधारेत्येव ॥

*गुणविकारः न विधिः. †भरणादि,

गायत्र्याग्नेयं गायत्रं प्रातस्सवनं प्रा-
तस्सवनमेव तेन दाधार गायत्रीं
छन्दो यदेकादशकपालो भवत्ये-
कादशाक्षरा त्रिष्टुगैन्द्रं त्रैष्टुभं माध्य-
न्दिनꣳ सवनं माध्यन्दिनमेव सवनं
तेन दाधार त्रिष्टुभम् ॥ २० ॥ छन्दो
यद्द्वादशकपालो भवति द्वादशाक्षरा
जगती वैश्वदेवं जागतं तृतीयसवनं

लः । भवति । अष्टाक्षरेत्यष्टा—अक्षरा । गायत्री । आग्नेयम् । गायत्रम् । प्रातस्सवनमिति प्रातः—सवनम् । प्रातस्सवनमिति प्रातः—सवनम् । एव । तेन । दाधार । गायत्रीम् । छन्दः । यत् । एकादशकपाल इत्येकादश—कपालः । भवति । एकादशाक्षरेत्येकादश—अक्षरा । त्रिष्टुक् । ऐन्द्रम् । त्रैष्टुभम् । माध्यंदिनम् । सवनम् । माध्यंदिनम् । एव । सवनम् । तेन । दाधार । त्रिष्टुभम् ॥ २० ॥ छन्दः । यत् । द्वादशकपाल इति द्वादश—कपालः । भवति । द्वादशाक्षरेति द्वादश—अक्षरा । जगती । वैश्वदेवमिति वैश्व—देवम् । जागतम् । तृतीयसवन-

[3]यदेकादशकपाल इत्यादि ॥ व्याख्यातमेतेन ॥

तृतीयसवनमेव तेन दाधार जगतीं छन्दो यद्बार्हस्पत्यश्चरुर्भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मैव तेन दाधार यद्वैष्णवस्त्रिकपालो भवति यज्ञो वै विष्णुर्यज्ञमेव तेन दाधार यत्तृतीये संवत्सरेऽभिजिता यजतेऽभिजित्यै यत्संवत्सरमुख्यं बिभर्तीममेव ॥२१॥ तेन लोकꣳ स्पृणोति ।

मिति तृतीय–सवनम् । तृतीयसवनमिति तृतीय–सवनम् । एव । तेन । दाधार । जगतीम् । छन्दः । यत् । बार्हस्पत्यः । चरुः । भवति । ब्रह्म । वै । देवानाम् । बृहस्पतिः । ब्रह्म । एव । तेन । दाधार । यत् । वैष्णवः । त्रिकपाल इति त्रि–कपालः । भवति । यज्ञः । वै । विष्णुः । यज्ञम् । एव । तेन । दाधार । यत् । तृतीये । संवत्सर इति सं–वत्सरे । अभिजितेत्यभि–जिता । यजते । अभिजित्या इत्यभि–जित्यै । [4]यत् । संवत्सरमिति सं–वत्सरम् । उख्यम् । बिभर्ति । इमम् । एव ॥ २१ ॥

[4]यत्संवत्सरमित्यादि ॥ संवत्सरकर्मस्तुतिः । इमं मनुष्यलोकं स्पृणोति प्रीणयति रक्षयतीत्यर्थः । स्पृ प्रीतौ । गतमन्यत् ॥

यद्द्वितीयें संवथ्सरेऽग्निं चिनुतेऽन्तरिक्षमेव तेन स्पृणोति यत्तृतीयें संवथ्सरे यजतेऽमुमेव तेन लोकꣳ स्पृणोत्येतं वै परं आङ्गारः कक्षीवाꣳ औशिजो वीतहव्यश्श्रायसस्त्रसदस्युः पौरुकुथ्स्यः प्रजाकामा अचिन्वत ततो वै ते सहस्रꣳसहस्रं पुत्रानविन्दन्त प्रथते प्रजया तेन । लोकम् । स्पृणोति । यत् । द्वितीये । संवत्सर इति सं-वत्सरे । अग्निम् । चिनुते । अन्तरिक्षम् । एव । तेन । स्पृणोति । यत् । तृतीये । संवत्सर इति सं-वत्सरे । यजते । अमुम् । एव । तेन । लोकम् । स्पृणोति । [5]एतम् । वै । परः । आङ्गारः । कक्षीवानिति कक्षी-वान् । औशिजः । वीतहव्य इति वीत-हव्यः । श्रायसः । त्रसदस्युः । पौरुकुत्स्य इति पौरु-कुत्स्यः । प्रजाकामा इति प्रजा-कामाः । अचिन्वत । ततः । वै । ते । सहस्रꣳसहस्रमिति

---

[5]एतं वा इत्यादि ॥ एतमग्निं परादयश्चत्वारः प्रजाकामा अचिन्वत । चित्वा च प्रत्येकं सहस्रं पुत्रानलभन्त ॥

पशुभिस्तां मात्रांमाप्नोति यां तेऽ-
गंच्छन् य एवं विद्वानेतमग्निं चिं-
नुते ॥ २२ ॥

प्रजापंतिरग्निमंचिनुत स क्षुरपंवि-

सहस्रं—सहस्रम् । पुत्रान् । अविन्दन्त । [6]प्रथंते । प्रजयेतिं प्र—जयां । पशुभिरितिं पशु—भिः । ताम् । मात्रांम् । आप्नोति । याम् । ते । अगंच्छन् । यः । एवम् । विद्वान् । एतम् । अग्निम् । चिनुते ॥२२॥

दाधार त्रिष्टुभंमिममेवैवं चत्वारिं च ॥५॥

[1]प्रजापंतिरितिं प्रजा—पतिः । अग्निम् । अचि-
नुत । सः । क्षुरपंविरितिं क्षुर—पविः । भूत्वा ।

---

[6]प्रथत इत्यादिविद्वुषस्तुतिः । मात्रां पुत्रपरिमाणम् । एवं विदित्वा चिन्वानः परादय इव सहस्रपुत्रो भवतीत्यर्थः । अत्र परादयस्संज्ञाः, आद्यादयः अपत्यप्रत्ययान्ताः ॥

इति पञ्चमे षष्ठे पञ्चमोनुवाकः.

---

[1]प्रजापतिरित्यादि नित्य एव गुणविशेषविधिः ॥ क्षुरपविः क्षुरवन्निशिता धारा यस्य सः क्षुरपविः । तादृशो भूत्वा चितोग्निरतिष्ठत् दुरुपगम आसीत् । तं तादृशं देवा भीतास्सन्तो नोपायन्

भूत्वाऽतिष्ठत्तं देवा बिभ्यंतो नोपा-
यन्ते छन्दोभिरात्मानं छादयित्वो-
पायन्तच्छन्दसां छन्दस्त्वं ब्रह्म वै
छन्दाꣳसि ब्रह्मण एतद्रूपं यत्कृष्णा-
जिनं काष्णीं उपानह्वावुपं मुञ्चते

अतिष्ठत् । तम् । देवाः । बिभ्यंतः । न । उपेति । आयन् । ते । छन्दोभिरिति छन्दः—भिः । आत्मानम् । [1]छादयित्वा । उपेति । आयन् । तत् । छन्दसाम् । छन्दस्त्वमिति छन्दः—त्वम् । [2]ब्रह्म । वै । छन्दाꣳसि । ब्रह्मणः । एतत् । रूपम् । यत् । कृष्णाजिनमिति कृष्ण—अजिनम् । [3]काष्णीं इति । उपानहौ । उपेति । मुञ्चते । छन्दोभिरिति छन्दः—भिः । एव । आत्मानम् । छादयित्वा । अग्निम् ।

नोपगन्तुं शक्ता अभवन् । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् । त इत्यादि । गतम् । छन्दोभिर्मन्त्रैः । तस्माच्छादनहेतुत्वात् छन्दस्त्वम् । छादयतेर्ण्यत्ययेन नुम्भावः ॥

[2]ब्रह्म वा इत्यादि हेतुः ॥ ब्रह्मवर्चसहेतुत्वात् ब्रह्मण इति । तत एव हेतोः ॥

[3]काष्णीं इति विधिः ॥ कृष्णमृगविकारभूतः । 'प्राणिरजतादिभ्योऽञ्' इत्यञ्प्रत्ययः । 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । छन्दोभिरित्यादि । गतम् ॥

छन्दोभिरेवात्मानं छादयित्वाऽग्निमुप चरत्यात्मनोऽहिꣳसायै देवनिधिर्वा एष नि धीयते यदग्निः ॥ २३ ॥ अन्ये वा वै निधिमगुप्तं विन्दन्ति न वा प्रति प्र जानात्युखामा क्रामत्यात्मानमेवाधिपां कुरुते गुप्त्या अथो

उपेति । चरति । आत्मनः । अहिꣳसायै । [4]देवनिधिरिति देव–निधिः । वै । एषः । नीति । धीयते । यत् । अग्निः ॥ २३ ॥ अन्ये । वा । वै । निधिमिति नि–धिम् । अगुप्तम् । विन्दन्ति । न । वा । प्रति । प्रेति । जानाति । उखाम् । एति । क्रामति । आत्मानम् । एव । अधिपामित्यधि–पाम् । कुरुते । गुप्त्यै । [5]अथो इति । खलु । आ-

---

[4]देवनिधिरित्यादि ॥ गतम् । अग्निर्नाम देवानां निधिस्थानीयो निधीयते गुप्तं स्थाप्यते स यदि सम्यक् गुप्तो न स्यात् ततस्तमगुप्तमन्ये वाऽनिधातारो लभेरन् । स्वयं वा न प्रति प्रजानाति इह मया निहितमिति न प्रत्यभिजानीयात् । तस्मान्नित्यात्मनोग्नेः गोपनथानीयमुखाक्रमणं पादेन कुर्यादिति विधिः । आत्मानमेवाधिकं पातारं कुरुते । पातेर्विच् । तच्च गुप्त्यै भवति । ततस्तमन्ये न वेत्स्यन्ते, स्वयं च प्रत्यभिज्ञास्यतीति ॥

[5]अथो खल्वाहुरित्यादिराक्रमणनिन्दा । नैर्ऋतिः निर्ऋतिरिति दे-

खल्वाहुर्नाक्रम्येतिं नैर्ऋत्युंखा य-
दाक्रामेन्निर्ऋत्या आत्मानमपिं द-
ध्यात्तस्मान्नाक्रम्यां पुरुषशीर्षमुपं
दधाति गुप्त्या अथो यथां ब्रूयादेत-
न्मे गोपायेतिं तादृगेव तत् ॥२४॥
प्रजापतिर्वा अथर्वाऽग्निरेव दध्यङ्ङां-

हुः । न । आक्रम्येत्यां–क्रम्यां । इतिं । नैर्ऋ-
तीतिं नैः–ऋती । उखा । यत् । आक्रामेदित्यां–
क्रामेत् । निर्ऋत्या इति निः–ऋत्यै । आत्मा-
नम् । अपीति । दध्यात् । तस्मात् । न । आक्र-
म्येत्यां–क्रम्यां । [6]पुरुषशीर्षमितिं पुरुष–शीर्षम् ।
उपेतिं । दधाति । गुप्त्यैं । अथो इतिं । यथां । ब्रू-
यात् । एतत् । मे । गोपाय । इतिं । तादृक् । ए-
व । तत् ॥ २४ ॥ [7]प्रजापतिरितिं प्रजा–पतिः ।

वता । तस्मादाक्रमणं निर्ऋत्यै आत्मानमपिदध्यात् प्रक्षिपेत् । त-
स्मान्नाक्रम्योखामपिदध्यादिति ॥

[6]पुरुषशीर्षमिति विधिः ॥ निधेर्गुप्त्यर्थं प्रत्यभिज्ञानार्थं च कथ-
मित्याह—अथो इत्यादि यथा कश्चिन्निधिस्थाने स्थापयित्वा ब्रू-
यात् एतन्मदीयं रक्षेति तादृङ्निधिगोपनं पुरुशषीर्ष इति ॥

[7]प्रजापतिर्वा इत्यादि ॥ इष्टकास्तुतिः । तत्र 'इन्द्रो दधीचो अ-

थर्वणस्तस्येष्टंका अस्थान्येतꣳ ह वाव तद्दधीचो ऋषिरभ्यनूवाचेन्द्रो दधीचो अस्थभिरिति यदिष्टंकाभिरग्निं चिनोति सात्मानमेवाग्निं चिनुते सात्माऽमुष्मिंन्लोके भंवति य एवं वे-

वै । अथंर्वा । अग्निः । एव । दध्यङ् । आथर्वणः । तस्यं । इष्टंकाः । अस्थानिं । एतम् । ह । वाव । तत् । ऋषिः । अभ्यनूवाचेत्यंभि-अनूवाच । इन्द्रः । दधीचः । अस्थभिरित्यस्थ-भिः । इतिं । यत् । इष्टंकाभिः । अग्निम् । चिनोतिं । सात्मांनमिति स-आत्मानम् । एव । अग्निम् । चिनुते । सात्मेति स-आत्मा । अमुष्मिन्नं् । लोके । भवति । यः ।

स्थभिः '* इति श्रुतिविशेषानुरोधेन अग्नेरस्थित्वेनेष्टका निरूप्यन्ते। प्रजापतिरथर्वा तत्पुरुष आथर्वणो दध्यङ्नाम सोग्निरेव तस्यास्थीनि इष्टका अभवन् । ' छन्दस्यपि दृश्यते ' इत्यनङ् । अमुमेवार्थं मन्त्रलिङ्गेन समर्थयते—एतं ह वावेति । अमुमेवार्थं 'इन्द्रो दधीचः '* इति मन्त्रेण ऋषिर्वेदो ह्यनुवदति तस्मादिष्टकाभिश्चयनात्सात्माऽग्निश्चितो भवति आत्मीयावयवसहित इत्यर्थः । एवं वेदिता अमुष्मिन् लोके भोगस्थाने सात्मा अमृतो भवति ॥

---

*बा. १-५-८.

द्व शरीरं वा एतदग्नेर्यच्चित्यं आत्मा
वैश्वानरो यच्चिते वैश्वानरं जुहोति श-
रीरमेव सꣳस्कृत्यं ॥२५॥ अभ्यारो-
हति शरीरं वा एतद्यजमानस्सꣳस्कु-
रुते यदग्निं चिनुते यच्चिते वैश्वानरं
जुहोति शरीरमेव सꣳस्कृत्यात्मना-
ऽभ्यारोहति तस्मात्तस्य नावं द्यन्ति

एवम्। वेद। [8]शरीरम्। वै। एतत्। अग्नेः। यत्।
चित्यः। आत्मा। वैश्वानरः। यत्। चिते। वैश्वा-
नरम्। जुहोति। शरीरम्। एव। सꣳस्कृत्य॥२५॥
अभ्यारोहतीत्यभि–आरोहति। शरीरम्। वै। ए-
तत्। यजमानः। समिति। कुरुते। यत्। अग्निम्।
चिनुते। [9]यत्। चिते। वैश्वानरम्। जुहोति। शरी-
रम्। एव। सꣳस्कृत्य। आत्मना। अभ्यारोहती-
त्यभि–आरोहति। तस्मात्। तस्य। न। अवेति।
द्यन्ति। जीवन्। एव। देवान्। अपीति। एति।

---

[8]शरीरं वा इत्यादि ॥ वैश्वानरहोमविधिः । चित्यश्चेतव्योग्नेः शरीरम् । यत्र यो वैश्वानरं द्वादशकपालम् ॥

[9]यदित्यादि ॥ यजमानशरीरत्वेन रूपणं वैश्वानरस्यावदानप्रति-

जीवन्नेव देवानप्येति वैश्वानर्यर्चा पुरीषमुपं दधातीयं वा अग्निर्वैश्वानरस्तस्यैषा चितिर्यत्पुरीषमग्निमेव वैश्वानरं चिनुत एषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियामेवास्यं तनुवमवं रुन्धे ॥ २६ ॥

[10]वैश्वानर्या । ऋचा । पुरीषम् । उपेति । दधाति । इयम् । वै । अग्निः । वैश्वानरः । तस्य । एषा । चितिः । यत् । पुरीषम् । अग्निम् । एव । वैश्वानरम् । चिनुते । एषा । वै । अग्नेः । प्रिया । तनूः । यत् । वैश्वानरः । प्रियाम् । एव । अस्य । तनुवम् । अवेति । रुन्धे ॥ २६ ॥

अग्निष्टत्स्रुस्कृत्याग्नेर्दर्शं च ॥ ६ ॥

षेधार्थम् । आत्मना स्वयमारोहति । तस्मादात्मशरीरस्य अवदानं न युज्यते । जीवन्नेव च देवान्गच्छति ॥

[10]वैश्वानर्यर्चेति ॥ 'पृष्टो दिवि'* इत्येतया । इयं वा इत्यादि पुरीषोपधानस्तुतिः गता ॥

इति पञ्चमे षष्ठे षष्ठोनुवाकः.

---

*सं. १-५-११.

अग्नेर्वै दीक्षया देवा विराजमाप्नु-
वन्तिस्रो रात्रीर्दीक्षितस्स्यात्त्रिपदा
विराड्विराजमाप्नोति षड्रात्रीर्दीक्षित-
स्स्याथषड्वा ऋतवस्संवथ्सरस्संव-
थ्सरो विराड्विराजमाप्नोति दश रा-
त्रीर्दीक्षितस्स्याद्दशाक्षरा विराड्विरा-

[1]अग्नेः । वै । दीक्षया । देवाः । विराजामितं वि–राजम् । आप्नुवन् । तिस्रः । रात्रीः । दीक्षितः । स्यात् । त्रिपदेतं त्रि–पदा । विराडितं वि–राट् । विराजामितं वि–राजम् । आप्नोति । [2]षड् । रात्रीः । दीक्षितः । स्यात् । षट् । वै । ऋतवः । संवत्सर इतं सं–वत्सरः । संवत्सर इतं सं–वत्सरः । विराडितं वि–राट् । विराजामितं वि–राजम् । आप्नोति । [3]दश । रात्रीः । दीक्षितः । स्यात् । द-

---

[1]अग्नेर्वै दीक्षयेत्यादि ॥ त्रिरात्रादिदीक्षाविधिः । दीक्षा मौण्ड्यादिलक्षणा । तिस्रादेशस्य 'उदात्तयणः' इति शस उदात्तत्वम् । त्रिभिर्दशकैर्विराडिति दशकाः पादाः ॥

[2]षड्वा इति ॥ षट्त्वान्वयात् षडृत्ववयवसंवत्सरात्मकविराड्लाभः । एवं सर्वत्र ॥

[3]दशाक्षरेति ॥ दशाक्षरपदा ॥

जंमाप्नोति द्वादंश रात्रींदींक्षितस्स्या-
द्द्वादंश मासांस्संवथ्सरस्संवथ्सरो वि-
राड्विराजंमाप्नोति त्रयोंदश रात्रींदी-
क्षितस्स्यात्त्रयोंदश ॥ २७॥ मासां-
स्संवथ्सरस्संवथ्सरो विराड्विराजं-

शांक्षरेति दशं—अक्षरा । विराडिति वि—राट् । वि-
राजमिति वि—राजंम् । आप्नोति । [4]द्वादंश । रा-
त्रींः । दीक्षितः । स्यात् । द्वादंश । मासांः । सं-
वत्सर इति सं—वत्सरः । संवत्सर इति सं—वत्स-
रः । विराडिति वि—राट् । विराजमिति वि—रा-
जंम् । आप्नोति । [5]त्रयोंदशेति त्रयः—दश । रा-
त्रींः । दीक्षितः । स्यात् । त्रयोंदशेतित्रयः—दश ॥
२७॥ मासांः । संवत्सर इति सं—वत्सरः । संव-
त्सर इति सं—वत्सरः । विराडिति वि—राट् । वि-

---

[4]द्वादशेति सौराः मासाः ॥ द्वौ च दश च द्वादश । 'सङ्ख्या' इति पूर्वपदप्रकृतिस्वरत्वम् । एवं सर्वत्र ॥

[5]त्रयोदश मासा इति ॥ अधिकमासेन त्रयोदशचान्द्रमासाः । सौरचान्द्रान्तराळमधिकमारभते । यथोक्तम्—

अधिमासका युगे तैरधिमासेभ्योधिकास्तु ये चान्द्राः । इति ॥

माप्नोति पञ्चदश रात्रीर्दीक्षितस्या-
त्पञ्चदश वा अर्धमासस्य रात्रयोऽ-
र्धमासश्संवथ्सर आप्यते संवथ्स-
रो विराड्विराजंमाप्नोति सप्तदश रा-
त्रीर्दीक्षितस्यात्पादश मासाः पञ्चर्त-

राजमिति वि–राजम् । आप्नोति । [6]पञ्चदशेति पञ्च–दश । रात्रीः । दीक्षितः । स्यात् । पञ्चदशेति पञ्च–दश । वै । अर्धमासस्येत्यर्ध–मासस्य । रात्रयः । अर्धमासश्च इत्यर्धमास–शः । संवत्सर इति सं–वत्सरः । आप्यते । संवत्सर इति सं–वत्सरः । विराडिति वि–राट् । विराजमिति वि–राजम् । आप्नोति । [7]सप्तदशेति सप्त–दश । रात्रीः । दीक्षितः । स्यात् । द्वादश । मासाः । पञ्च । ऋतवः ।

---

[6]पञ्चदशेति ॥ सावनस्य मासस्य । यथाऽऽहुः—‘ त्रिंशदुष्णकरोदयः सावनः ’ इति । अर्धमासश्च इति । अर्धमासेनार्धमासेन । ‘ संख्यैकवचनाच्च ’ इति शस् ॥

[7]पञ्चर्तव इति ॥ हेमन्तशिशिरयोरेकत्वात् । दृष्टं हि सहानुमन्त्रणं ‘ हेमन्तशिशिरावृतूनां प्रीणामि ’* इति । संवत्सर इति । सप्तदशसंख्यान्वयात् ॥

---

*सं. १-६-२.

व॒स्स सं॑वथ्स॒रस्सं॑वथ्स॒रो वि॒राड्वि॒रा-
ज॑माप्नोति॒ चतु॑र्विꣳशति॒ꣳ रात्री॑-
र्दीक्षि॒तस्स्या॒च्चतु॑र्विꣳशतिरर्धमा॒सा-
स्सं॑वथ्स॒रस्सं॑वथ्स॒रो वि॒राड्वि॒राज॑-
माप्नोति त्रि॒ꣳश॒त॒ꣳ रात्री॑र्दीक्षि॒त-
स्स्यात् ॥२८॥ त्रि॒ꣳश॒दक्ष॑रा वि॒रा-

सः। सं॒व॒त्स॒र इति॑ सं—व॒त्स॒रः। सं॒व॒त्स॒र इति॑ सं—व॒त्स॒रः। वि॒राडिति॑ वि—राट्। वि॒राज॒मिति॑ वि—राज॑म्। आप्नो॒ति॒। [8]चतु॑र्विꣳशति॒मिति॒ चतुः—वि॒ꣳश॒ति॒म्। रात्री॑ः। दी॒क्षि॒तः। स्या॒त्। चतु॑र्विꣳशति॒रिति॒ चतुः—वि॒ꣳश॒तिः। अ॒र्ध॒मा॒सा इत्य॑र्ध—मा॒साः। सं॒व॒त्स॒र इति॑ सं—व॒त्स॒रः। सं॒व॒त्स॒र इति॑ सं—व॒त्स॒रः। वि॒राडिति॑ वि—राट्। वि॒राज॒मिति॑ वि—राज॑म्। आप्नो॒ति॒। [9]त्रि॒ꣳश॒तम्। रात्री॑ः। दी॒क्षि॒तः। स्या॒त्॥ २८॥ त्रि॒ꣳश॒दक्ष॑रेति॑ त्रि॒ꣳश॒त्—अक्ष॑रा। वि॒राडिति॑ वि—राट्। वि॒राज॒मिति॑ वि—

---

[8]चतुर्विंशतिमिति ॥ चान्द्रास्सांशाः, अन्ये निरंशाः ॥

[9]त्रिंशतं रात्रीरिति ॥ सावनसम्बन्धिनीः ॥

ड्विराजंमाप्नोति मासं दीक्षितस्स्या-
द्यो मासस्स संवथ्सरस्संवथ्सरो वि-
राड्विराजंमाप्नोति चतुरो मासो दी-
क्षितस्स्यांच्चतुरो वा एतं मासो व-
संवोऽबिभरुस्ते पृथिवीमाऽजंयन्गा-
यत्रीं छन्दोऽष्टौ रुद्रास्तेऽन्तरिक्षमाऽ-

राजंम् । आप्नोति । [10]मासंम् । दीक्षितः । स्यात् । यः । मासः । सः । संवत्सर इतिं सं—वत्सरः । संवत्सर इतिं सं—वत्सरः । विराडितिं वि—राट् । विराजमितिं वि—राजंम् । आप्नोति । [11]चतुरः । मासः । दीक्षितः । स्यात् । चतुरः । वै । एतम् । मासः । वसवः । अबिभरुः । ते । पृथिवीम् । एतिं । अजयन्न् । गायत्रीम् । छन्दः । अष्टौ । रुद्राः । ते । अन्तरिक्षम् । एतिं । अजयन्न् । त्रिष्टुभंम् ।

---

[10]मासमिति ॥ सौरश्चान्द्र आर्क्षो वा गृह्यते । सर्वेऽप्येते क्षयवृद्धियोगान्नैकान्ततः त्रिंशद्दिवसाः । तत्र सौरस्संक्रमात् संक्रमः, चान्द्रः दर्शाद्दर्शः, आर्क्षश्चन्द्रस्यर्क्षेण योगः । यो मास इति । अवयवावयविनोरनत्यन्तभेदात् ॥

[11]चतुरो वा इत्यादि ॥ एतमुख्यं चतुरो मासो वसवो धारयन् । तेन पृथिवीं गायत्रीं च ते आभिमुख्येनाजयन् । अष्टौ रुद्रा

जयन्त्रिष्टुभं छन्दो द्वादशादित्यास्ते
दिवमाऽजयञ्जगतीं छन्दस्ततो वै ते
व्यावृतमगच्छञ्छ्रैष्ठ्यं देवानां तस्मा-
द्द्वादश मासो भृत्वाऽग्निं चिन्वीत द्वाद-
श मासास्संवथ्सरस्संवथ्सरोऽग्निश्चि-
त्यस्तस्याहोरात्राणीष्टका आप्तेष्टक-

छन्दः । द्वादश । आदित्याः । ते । दिवम् । एति । अजयन् । जगतीम् । छन्दः । ततः । वै । ते । व्यावृतामिति वि—आवृतम् । अगच्छन् । श्रैष्ठ्यम् । देवानाम् । [12]तस्मात् । द्वादश । मासः । भृत्वा । अग्निम् । चिन्वीत । द्वादश । मासाः । संवत्सर इति सं—वत्सरः । संवत्सर इति सं—वत्सरः । अग्निः । चित्यः । तस्य । अहोरात्राणीत्यहः—रात्राणि । इष्टकाः । आप्तेष्टकमित्याप्त—इष्टकम् । ए-

---

इति । अष्टौ मासः रुद्रा अबिभरुः । द्वादशादित्या इति । द्वादश मास आदित्या अबिभरुः । ततस्ते वसुरुद्रादित्या व्यावृतं व्यावृत्तिं देवान्तरेभ्योऽगच्छन् श्रैष्ठचं प्रशस्ततां च ॥

[12]तस्मादिति विधिः ॥ तस्येति संवत्सरस्य आत्मनश्चित्यस्य अग्नेः अहोरात्रस्थानीया इष्टकाः । तस्मात्संवत्सरभरणेन आप्तेष्टक-

मेनं चिनुतेऽथो व्यावृत्तमेव गच्छति श्रैष्ठ्यꣳ समानानाम् ॥ २१ ॥
सुवर्गाय वा एष लोकाय चीयते यदग्निस्तं यन्नान्वारोहेथ्सुवर्गाल्लोका-

नम् । चिनुते । अथो इति । व्यावृत्तमिति वि—आवृतम् । एव । गच्छति । श्रैष्ठ्यम् । समानानाम् ॥ २१ ॥

स्यात्त्रयोदश त्रिꣳशत्ꣳरात्रीर्दीक्षितस्याहै तेऽष्टाविꣳशतिश्च ॥ ७ ॥

[1]सुवर्गायेति सुवः—गाय । वै । एषः । लोकाय । चीयते । यत् । अग्निः । तम् । यत् । न । अन्वा-रोहेदित्यनु—आरोहेत् । सुवर्गादिति सुवः—गात् ।

मेनं चिनुते आत्मा: पौष्कल्येन बद्धा इष्टका अस्येति । अथो इत्यादि । गतम् ॥

इति पञ्चमे षष्ठे सप्तमोनुवाकः.

---

[1]सुवर्गायेत्यादिरन्वारोहणविधिः ॥ 'पृथिवीमाक्रमिषं' इत्यादिना अन्वारोहाख्येन मन्त्रेण पृथिव्यादिक्रमेण अन्वारोहणं सुवर्गावाप्त्यै भवति ॥

यजमानो हीयेत पृथिवीमाऽक्रमिषं प्राणो मा मा हासीदन्तरिक्षमाऽक्रमिषं प्रजा मा मा हासीद्दिवमाऽक्रमिषꣳ सुवरगन्मेत्याहैष वा अग्रेरन्वारोहस्तेनैवैनमन्वारोहति सुवर्गस्य लोकस्य समष्टयै यत्पक्षसं-

लोकात् । यजमानः । हीयेत । [2]पृथिवीम् । एति । अक्रमिषम् । प्राण इति प्र–अनः । मा । मा । हासीत् । अन्तरिक्षम् । एति । अक्रमिषम् । प्रजेति प्र–जा । मा । मा । हासीत् । दिवम् । एति । अक्रमिषम् । सुवः । अगन्म । इति । आह । एषः । वै । अग्नेः । अन्वारोह इत्यनु–आरोहः । तेन । एव । एनम् । अन्वारोहतीत्यनु–आरोहति । सुवर्गस्येति सुवः–गस्य । लोकस्य । समष्ट्या इति सं–अष्टयै ।

---

[2]मन्त्रार्थस्तु—पृथिवीं सर्वामनेन चित्यारोहणेनाक्रमिषं आक्रान्तवानस्मि । 'नेटि' इति वृद्धिप्रतिषेधः । तेन प्राणो मा मा हासीत् मा त्याक्षीत् । एवमुत्तरे द्रष्टव्ये । गमेः 'अस्मदो द्वयोश्च' इत्येकस्मिन् बहुवचनम् । यद्वा—अनेनाक्रमणेन सपुत्रपौत्रा वयं स्वर्गं गमिष्याम इति । छान्दसे लुङि 'मन्त्रे घस' इति च्लेर्लुक् ॥

मितां मिनुयात् ॥ ३० ॥ कनीयाꣳ-
सं यज्ञक्रतुमुपेयात्पापीयस्यस्यात्मनः
प्रजा स्याद्वेदिसंमितां मिनोति ज्या-
याꣳसमेव यज्ञक्रतुमुपैति नास्या-

[3]यत् । पक्षसंम्मितामितिं पक्ष–सम्मिताम् । मि-
नुयात् ॥ ३० ॥ कनीयाꣳसम् । यज्ञक्रतुमितिं य-
ज्ञ–क्रतुम् । उपेतिं । इयात् । पापीयसी । अस्य ।
आत्मंनः । प्रजेतिं प्र–जा । स्यात् । वेदिंसम्मि-
तामिति वेदिं–सम्मिताम् । मिनोति । ज्यायाꣳ-
सम् । एव । यज्ञक्रतुमितिं यज्ञ–क्रतुम् । उपेतिं ।
एति । न । अस्य । आत्मनः । पापीयसी । प्रजे-
तिं प्र–जा । भवति । [4]साहस्रम् । चिन्वीत । प्रथ-

---

[3]यत्पक्षसंमितां मिनुयादिति ॥ एकयूपो वैकादशिनी वा कर्त-
व्येति तत्रैकादशिन्यां विशेष उच्यते—यदि पक्षसम्मितां पक्षोच्छ्रा-
यामेकादशिनीं मिनुयात् प्राक्षिपेत् स्थापयेत् । डुमिञ् प्रक्षेपणे ।
कनीयांसमल्पतरमेव यज्ञक्रतुमुपेयात्, न ज्यायांसम् । किञ्च—
अस्य यजमानस्य आत्मीया प्रजा पापीयसी पापतरा स्यात्
तस्माद्वेदिसम्मितां मिनोतीति विधिः । ज्यायांसमेवेत्यादिना उ-
क्तदोषाभावमाचष्टे ॥

[4]साहस्रमिति ॥ साहस्रामिष्टकानां परिमाणं अस्येति 'शतमा-
नविंशतिक' इत्यण् । साहस्रमग्निं चित्वा प्रथमं चिन्वानः ।

त्मनः पापीयसी प्रजा भवति सा-
हस्रं चिन्वीत प्रथमं चिन्वानस्सह-
स्रसंमितो वा अयं लोक इममेव
लोकमभि जयति द्विषाहस्रं चि-
न्वीत द्वितीयं चिन्वानो द्विषाहस्रं
वा अन्तरिक्षमन्तरिक्षमेवाभि जयति

मम् । चिन्वानः । सहस्रसम्मित इतिं सहस्रं-स-
म्मितः । वै । अयम् । लोकः । इमम् । एव । लोकम् ।
अभीति । जयति । [5]द्विषाहस्रमिति द्वि-साहस्रम् ।
चिन्वीत । द्वितीयम् । चिन्वानः । द्विषाहस्रमिति
द्वि-साहस्रम् । वै । अन्तरिक्षम् । अन्तरिक्षम् ।

सहस्रसम्मित इति प्राथम्यसाम्यात् सहस्रेण तुल्यम् । उपमान-पूर्वपदप्रकृतिस्वरत्वम् । यथा सहस्रेण सम्यङ्निर्वर्तितः प्रशस्ततर इत्यर्थः । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् ॥

[5]द्विषासहस्रमिति ॥ द्वे सहस्रे परिमाणमस्य प्राग्वत् 'संख्या-पूर्वपदानां तदन्तग्रहणमलुकि' इति शतमानादिना अण्, 'अ-ध्यर्धपूर्वाद्विगोः' इति प्राप्तस्य लुको 'विभाषा कार्षापणसहस्रा-भ्याम्' इति अभावः, 'संख्यायास्संवत्सरसंख्यस्य च' इति उत्तर-पदवृद्धिः, सुषामादित्वात् षत्वम्, 'द्विगौ प्रमाणे' इति पूर्वपद-प्रकृतिस्वरत्वम् । द्विषाहस्रं वा अन्तरिक्षमिति । मध्यमत्वेन द्विषाह-

त्रिषाहस्रं चिन्वीत तृतीयं चिन्वा-
नः ॥ ३१ ॥ त्रिषाहस्रो वा असौ
लोकोऽमुमेव लोकमाभि जयति
जानुदघ्नं चिन्वीत प्रथमं चिन्वानो
गायत्रियैवेमं लोकमभ्यारोहति ना-
भिदघ्नं चिन्वीत द्वितीयं चिन्वान-

एव । अभीति । जयति । [6]त्रिषाहस्रमिति त्रि-
साहस्रम् । चिन्वीत । तृतीयम् । चिन्वानः ॥ ३१ ॥
त्रिषाहस्र इति त्रि-साहस्रः । वै । असौ । लोकः ।
अमुम् । एव । लोकम् । अभीति । जयति । [7]जा-
नुदघ्नमिति जानु-दघ्नम् । चिन्वीत । प्रथमम् ।
चिन्वानः । गायत्रिया । एव । इमम् । लोकम् ।
अभ्यारोहतीत्यभि-आरोहति । नाभिदघ्नमिति ना-
भि-दघ्नम् । चिन्वीत । द्वितीयम् । चिन्वानः ।
त्रिष्टुभा । एव । अन्तरिक्षम् । अभ्यारोहतीत्यभि-

स्वाग्निसाधर्म्यात् ताच्छब्द्यम् । मनुष्यलोकाद्वा सहस्रसम्मितात् प्रशस्ततरत्वं ख्यापयितुं द्विषाहस्रमित्युक्तम् ॥

[6]त्रिषाहस्रमित्यादि ॥

[7]जानुदघ्नमित्यादि ॥ 'प्रमाणे द्वयसच्' इति दघ्नच् । गायत्र्यादीनां प्राथम्यादिभिः जानुदघ्नचाद्यानुरूप्यम् ॥

स्त्रिष्टुभैवान्तरिक्षमभ्यारोहति ग्रीव-
द्घ्नं चिन्वीत तृतीयं चिन्वानो ज-
गत्यैवामुं लोकमभ्यारोहति नाग्निं
चित्वा रामामुपेयादयोनौ रेतो धा-
स्यामीति न द्वितीयं चित्वाऽन्यस्य
स्त्रियम् ॥ ३२ ॥ उपेयान्न तृतीयं

आरोहति । [१]ग्रीवद्घ्नमितिं ग्रीव—द्घ्नम् । चिन्वीत। तृतीयम् । चिन्वानः । जगत्या । एव । अमुम् । लोकम् । अभ्यारोहतीत्यभि—आरोहति । [२]न । अग्निम् । चित्वा । रामाम् । उपेतिं । इयात् । अयोनौ । रेतः । धास्यामि । इतिं । न । द्वितीयम् । चित्वा । अन्यस्यं । स्त्रियम् ॥ ३२ ॥ उपेतिं । इयात् । न । तृतीयम् । चित्वा । काम् । चन । उ-

---

[१]ग्रीवदघ्नमिति ॥ 'ङ्यापोस्संज्ञाच्छन्दसोः' इति ह्रस्वत्वम् ॥

[२]नाग्निं चित्वेति ॥ रत्यर्थां रामां अप्रजार्थं प्रथममग्निं चित्वा तां नोपेयात् । द्वितीयाद्यभिगम्य गमननिषेधहेतुमाह—अयोनाविति । अयोग्यायां योनौ रेतो धास्यामि वृधा स्थापयामि यद्युपेयामित्यनेन अभिप्रायेण रामां नोपेयात् । न द्वितीयमिति । अन्यस्य क्षत्रियादेः स्त्रियं नोपेयात् । प्रथमागमनेऽप्यसवर्णा निषिध्यते । न तृतीयमिति । प्रथमाभिगमन एव सवर्णाया अपि निषेधः ।

चित्वा कां चनोपेयाद्रेतो वा एतं
नि धत्ते यदग्निं चिनुते यदुपेयाद्रेत-
सा व्यृध्येताथो खल्वाहुरप्रजस्यं त-
द्यन्नोपेयादिति यद्रेतस्सिचावुपद-

पेति । इयात् । रेतः । वै । एतत् । नीति । धत्ते । यत् । अग्निम् । चिनुते । यत् । उपेयादित्युप—इ-यात् । रेतसा । वीति । ऋध्येत । [10]अथो इति । खलु । आहुः । अप्रजस्यमित्यप्र—जस्यम् । तत् । यत् । न । उपेयादित्युप—इयात् । इति । यत् । रेतस्सिचावितिं रेतः—सिचौ । उपदधातीत्युप—द-

---

प्रार्थिनीमपि नोपेयात् सवर्णामपि । सर्वेष्वपि पक्षेषु हेयमाह—रेतो वा इति । अग्निं चिन्वानो हि रेतसो निधानं करोति । स-यद्युपेयात् स्त्रियं रेतसा व्यृद्धस्स्यात् हतरेतस्कस्य तस्य न युज्यते कथं रेतो धातुमारब्धो व्ययमस्य कुर्यात्, तस्मान्नोपेयादिति ॥

[10]अथैतद्दूषयति—अथो खल्वाहुरिति ॥ न विद्यते प्रजाऽस्येति अप्रजाः । 'नित्यमसिच्प्रजामेधयोः' इत्यसिच् । अप्रजसमर्हती-त्यप्रजस्यम् । 'छन्दसि च' इति यप्रत्ययः । यदुक्तं तन्नोपे-यादिति तदप्रजस्यं प्रजाविच्छेदहेतुः ; तस्मादुपेयादिति । तृतीयां चितवतः सवर्णां प्रति प्रतिप्रसवः आनन्तर्यादित्येके । रामाभिगमन एव निषेधे हेतुत्वाभिधानात् । तस्मादुपेयादेव । (विप्रसृजदेवाढं) रेतसोस्कन्दाय अशोषाय इतरथा शुष्करेता अप्रजाः स्यादिति

धाति ते एव यजमानस्य रेतो बिभृतस्तस्मादुपेयाद्रेतसोऽस्कन्दाय त्रीणि वाव रेताꣳसि पिता पुत्रः पौत्रः ॥ ३३ ॥ यद्वे रेतस्सिचावुपद-ध्याद्रेतोऽस्य विच्छिन्द्यात्तिस्र उप

धाति । ते इति । एव । यजमानस्य । रेतः । बि-भृतः । तस्मात् । उपेति । इयात् । रेतसः । अ-स्कन्दाय । [11]त्रीणि । वाव । रेताꣳसि । पिता । पुत्रः । पौत्रः ॥ ३३ ॥ यत् । वे इति । रेतस्सि-चावितिं रेतः–सिचौ । उपदध्यादित्युप–दध्यात् । रेतः । अस्य । वीति । छिन्द्यात् । तिस्रः । उपेति । दधाति । रेतसः । संतत्या इति सं–तत्यै ।

अपरा योजना । ते एव रेतस्सिचौ यत्र क्वाप्युत्सृष्टं रेतो बिभ्रतः परिगृहीतः, तस्मादुपेयादेव स्वयम् । एवमपि रेतसोस्कन्दाय अविनाशाय भवत्येवोपगमनमिति ॥

[11]त्रीणि वावेत्यादि ॥ त्रित्वविधिः । त्रीणि रेतांसि पित्रादिनामानि एकमेव रेत इत्थं त्रिधा भिन्नमिति । तत्र द्वयोःरेतस्सिचोरुपधाने एकविषयं यजमानस्य रेतो विच्छिन्द्यात् नश्येत् । तस्मात्तिस्र उपधेया इति । रेतसोऽविच्छेदाय भवत्येवं क्रियमाणमिति ॥

दधाति रेतसस्संतत्या इयं वाव प्रं-
थमा रेतस्सिग्वाग्वा इयं तस्मात्प-
श्यंन्तीमां पश्यंन्ति वाचं वदंन्ती-
मन्तरिंक्षं द्वितीयां प्राणो वा अन्त-
रिंक्षं तस्मान्नान्तरिंक्षं पश्यंन्ति न
प्राणमसौ तृतीया चक्षुर्वा असौ त-

[12]इयम् । वाव । प्रथमा । रेतस्सिगिति रेतः—सिक् । वाक् । वै । इयम् । तस्मात् । पश्यंन्ति । इमाम् । पश्यंन्ति । वाचम् । वदंन्तीम् । अन्तरिंक्षम् । द्वितीया । प्राण इति प्र—अनः । वै । अन्तरिंक्षम् । तस्मात् । न । अन्तरिंक्षम् । पश्यंन्ति । न । प्राणमिति प्र—अनम् । असौ । तृतीया । चक्षुः । वै । असौ । तस्मात् । पश्यंन्ति । अमूम् । पश्यंन्ति ।

---

[12]इयं वावेत्यादि ॥ रेतस्सिचां स्तुतिः । पृथिव्येव प्रथमा रेतस्स्यात् प्राथम्यसामान्यात् । वागेव पृथिवी अधोभावसामान्यात् । इदानीं पृथिव्या वाक्चं द्वयोस्समानधर्मतया समर्थयते—तस्मादिति । यस्माद्वागेव पृथिवी तस्मात्सर्वेऽपि पृथिवीं पश्यन्ति प्रत्यक्षेण गृह्णन्ति । वाचं वदन्तीं उच्चरन्तीं पश्यन्तीं शृण्वन्तीं प्रत्यक्षेणैव गृह्णन्ति । अन्तरिक्षं द्वितीयेति । मध्यमत्वसामान्यात् । प्राणो वा इत्यादि । मध्यमभावादेव नासिकावृत्तित्वात् । तस्मादिति । प्राणान्तरिक्षयोरप्यप्रत्यक्षमिति । असौ तृतीयेति । चरमभावित्व-

स्मात्पश्यंन्त्यमूं पश्यंन्ति चक्षु र्यजुं-
षेमां च ॥ ३४ ॥ अमूं चोपं दधा-
ति मनंसा मध्यमामेषां लोकानां
क्लृप्त्या अथौ प्राणानांमिष्टो यज्ञो
भृगुंभिराशीर्दा वसुंभिस्तस्यं त इ-

चक्षुंः । [13]यजुंषा । इमाम् । च ॥ ३४ ॥ अमूम् । च । उपेतिं । दधाति । मनंसा । मध्यमाम् । एषाम् । लोकानांम् । क्लृप्त्यैं । अथो इतिं । प्राणा-नामितिं प्र-अनानांम् । [14]इष्टः । यज्ञः । भृगुंभि-रिति भृगुं-भिः । आशीर्दा इत्यांशीः-दाः । वसुं-भिरिति वसुं-भिः । तस्यं । ते । इष्टस्यं । वीत-

---

सामान्यात् । चक्षुर्वा इत्युपरिभावसामान्यात् । तस्माद्वा चक्षुषोः प्रत्यक्षत्वमिति ॥

[13]यजुषेति 'विराट् ज्योतिरधारयत्'* इति । नमसा मध्यमां एषां लोकानां क्लृप्त्यै आप्त्यै भवति । अथो अपि च प्राणानां च क्लृप्त्यै विधारणार्थं भवतीति स्तुतिः ॥

[14]स्तुतशस्त्रयोर्दोहं वाचयति—इष्टो यज्ञ इति ॥ एतस्य वचनेन स्तुतशस्त्रे दुहे दुग्धे फलानि स्तुतशस्त्रसाध्यानि । 'लोपस्त आत्मनेपदेषु' इति लोपः । मन्त्रार्थस्तु इष्टः सम्यक् निर्वर्तितः

---

*सं. ४-२-९.

ष्टस्यं वीतस्य द्रविणेह भक्षीयेत्याह स्तुतशस्त्रे एवैतेनं दुहे पिता मा-तरिश्वाऽच्छिद्रा पदा धा अच्छिद्रा उशिजः पदाऽनु तक्षुस्सोमो विश्व-विन्नेता नेषद्बृहस्पतिरुक्थामदानिं

स्यं । द्रविणा । इह । भक्षीय । इति । आह । स्तुतशस्त्रे इति स्तुत–शस्त्रे । एव । एतेनं । दुहे । [15]पिता । मातरिश्वा । अच्छिद्रा । पदा । धाः । अ-च्छिद्राः । उशिजः । पदा । अन्विति । तक्षुः । सोमः । विश्वविदिति विश्व–वित् । नेता । नेषत् । बृहस्पतिः । उक्थामदानीत्युक्थ–मदानि । शꣳ-

---

भृगुभिः भृगुकुलैः ऋत्विग्भिः आशीर्दाः—आशिषां फलानां च दाता च कृतः वसुभिः । यद्वा—यो यज्ञे भृगुभिः वसुभिश्च इष्टः आशीर्दाः तस्य तादृशस्य इष्टस्य वीतस्य कान्तस्य आशिषः द्रविणा द्रविणानि इह भक्षय भजेय हे यज्ञ ! अस्मदीय ! ॥

[15]पिता मातरिश्वेत्यग्निमनुशंसति ॥ त्रिष्टुबेषा । एष मन्त्रोऽग्नेरुक्थ्यं शस्त्रं · तेनैवैनमग्निमनुशंसति मन्त्रार्थस्तु—हे अग्ने ! पिता मातरिश्वा अछिद्रा पदा अछिद्राणि पदानि भोगस्थानानि धाः । दधातेर्लेटि पुरुषव्यत्ययः, ' बहुलं छन्दसि ' इति शपो लुक् । किञ्च—उ-शिजः कामनाः अर्थात् तान्यच्छिद्रपदानि अनुतक्षुः अनुक्रमेण संस्कुर्वन्तु । तक्षेश्शपो लोपः । अविनाशा वा उशिजः मन्त्र-

शꣳसिषदित्याहैतद्वा अग्नेरुक्थं ते-
नैवैनमनु शꣳसति ॥ ३५ ॥
सूयते वा एषोऽग्नीनां य उखायां
भ्रियते यदधस्सादयेद्गर्भाः प्रपादुका-

सिषत् । इति । आह । एतत् । वै । अग्नेः । उ-
क्थम् । तेन । एव । एनम् । अन्विति । शꣳसति ॥ ३५ ॥

मिनुयात्तृतीयं चिन्वानस्त्रियं पौत्रश्च वै
सप्त च ॥ ८ ॥

[1]सूयते । वै । एषः । अग्नीनाम् । यः । उखा-
याम् । भ्रियते । यत् । अधः । सादयेत् । गर्भाः ।
प्रपादुका इति प्र-पादुकाः । स्युः । अथो इति ।

दृशः ऋषयः तानि पदानि अनन्तरं संस्कुर्वन्तु । सोमश्च विश्ववित् विश्ववेदी विश्वस्य च नेता नेषत् नयतु तानि पदानि ध्रुवाणि करोतु । बृहस्पतिः उक्थामदानि स्तोत्रशस्त्राणि शंसिषत् शंसतु । उभयत्रापि 'सिब्बहुलं लेटि' इति सिप् 'लेटोडाटौ' इत्यडागमः ॥

इति पञ्चमे षष्ठे अष्टमोनुवाकः.

---

[1]सूयते वा एष इत्यादि ॥ अग्नीनां मध्ये अयं भूयते उत्पद्यते ईश्वरो वा क्रियते तदिदं यदधस्सादयेत् गर्भाः प्रजानां

स्युरथो यथा सवात्प्रत्यवरोहति
तादृगेव तदासन्दी सादयति गर्भी-
णां धृत्या अप्रपादायाथो सवमेवैनं
करोति गर्भो वा एष यदुख्यो यो-
निश्शिक्यं यच्छिक्यादुखां निरूहे-

यथा । सवात् । प्रत्यवरोहतीति प्रति—अवरोहति । तादृक् । एव । तत् । आसन्दी । सादयति । ग-
र्भाणाम् । धृत्यै । अप्रपादायेत्यप्र—पादाय । अथो
इति । सवम् । एव । एनम् । करोति । [2]गर्भः ।
वै । एषः । यत् । उख्यः । योनिः । शिक्यम् ।
यत् । शिक्यात् । उखाम् । निरूहेदिति निः—ऊ-

नपादुकाः प्रपतनशीलास्स्युः । अपि च यथा सवात् ऐश्वर्यात्प्र-
यवरोहति प्रच्यवते तादृगेव तत् ईश्वरस्याधस्सादनात् । तस्मात्
आसन्दी आसन्द्यां सादयति । 'सुपां सुलुक्' इति सप्तम्या
लुक् । प्रगृह्यत्वं व्यत्ययेन प्रवर्तते । तृतीया वा लुप्यते,
स्थाल्या भुङ्क्ष्व' इतिवत् साधनत्वस्य विवक्षितत्वात् । गर्भाणां रक्ष-
णाय अप्रपतनाय च तद्भवति । अथो अपि च सवं यज्ञवन्तं
वैनं करोति । यद्वा—यजमानमेवेश्वरं करोति ॥

[2]गर्भो वा इत्यादि ॥ गतम् । निरूहणमपनयनं निरूहणम-
ल एव गर्भस्य निर्गमनम् । तस्मान्न निरूहेदिति ॥

योनेर्गर्भं निरृहंण्याथ्षडुंद्याम॰ शि-
क्यं भवति षोढाविहितो वै ॥३६॥
पुरुष आत्मा च शिरश्च चत्वार्यङ्गा-
न्यात्मन्नेवैनं बिभर्ति प्रजापतिर्वा
एष यदग्निस्तस्योखा चोलूखलं च
स्तनौ तावस्य प्रजा उप जीवन्ति

हैत् । योनेः । गर्भम् । निरिति । हन्यात् । [3]षडुं-
द्याममिति षट्-उद्याम्म् । शिक्यम् । भवति ।
षोढाविहित इति षोढा-विहितः । वै ॥ ३६ ॥ पु-
रुषः । आत्मा । च । शिरः । च । चत्वारि । अ-
ङ्गानि । आत्मन्न् । एव । एनम् । बिभर्ति । [4]प्रजा-
पतिरिति प्रजा-पतिः । वै । एषः । यत् । अग्निः ।
तस्य । उखा । च । उलूखलम् । च । स्तनौ ।
तौ । अस्य । प्रजा इति प्र-जाः । उपेति । जी-

---

[3]षडुद्याममिति ॥ निरूहणनिषेधविधिः । उद्यामाः पादाः । षोढाविहित इति षष्ठ्रकारो विहितः । 'षष उत्वम्' इति षत्वष्टुत्वे । आत्मा शरीरं कण्ठादयः उपरिशिरः चत्वार्यङ्गानि द्वौ हस्तौ द्वौ पादौ षट्त्वान्वयादात्मन्येष धृतो भवत्युख्यः । शिक्यादिनिरूहणेन । तस्मान्न निरूहेदिति ॥

[4]प्रजापतिर्वा इत्यादि ॥ उखोलूखलयोरुपधानविधिर्गतः । अ-

यदुखां चोलूखलं चोपदधाति ताभ्यामेव यजमानोऽमुष्मिन्लोकेऽग्निं दुहे संवथ्सरो वा एष यदग्निस्तस्य त्रेधाविहिता इष्टकाः प्राजापत्या वैष्णवीः ॥ ३७ ॥ वैश्वकर्मणीरहोरात्राण्येवास्य प्राजापत्या यदुखयं

वन्ति । यत् । उखाम् । च । उलूखलम् । च । उपदधातीत्युप–दधाति । ताभ्याम् । एव । यजमानः । अमुष्मिन् । लोके । अग्निम् । दुहे । [5]संवत्सर इति सं–वत्सरः । वै । एषः । यत् । अग्निः । तस्य । त्रेधाविहिता इति त्रेधा–विहिताः । इष्टकाः । प्राजापत्या इति प्राजा–पत्याः । वैष्णवीः ॥ ॥ ३७ ॥ वैश्वकर्मणीरिति वैश्व–कर्मणीः । अहोरात्राणीत्यहः–रात्राणि । एव । अस्य । प्राजाप-

---

भिमतसाधनयोर्बहुसाधनत्वात् । स्थानापेक्षं पुल्लिङ्गत्वम्, इतरथा नपुंसकस्य शेषप्रसङ्गात् ॥

[5]संवत्सरो वा इत्यादि ॥ त्रेधाविहिताः प्राजापत्याः वैष्णव्यः वैश्वकर्मण्यः । 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । तत्राहोरात्राणि प्राजापत्या इष्टकाः, तेषां प्राजापत्यत्वात् । तत्र उख्यभरणेन ता उपहिता भवन्ति । तावत्कालोपासनमेव उपधानं

बिभर्ति प्राजापत्या एव तदुपं धत्ते यथ्समिधं आदधाति वैष्णवा वै वनस्पतयो वैष्णवीरेव तदुपं धत्ते यदिष्टकाभिरग्निं चिनोतीयं वै विश्वकर्मा वैश्वकर्मणीरेव तदुपं धत्ते तस्मादाहुस्त्रिवृदग्निरिति तं वा एतं

त्या इति प्राजा-पत्याः । यत् । उख्यम् । बिभर्ति । प्राजापत्या इति प्राजा-पत्याः । एव । तत् । उपेति । धत्ते । यत् । समिध इति सं-इधः । आदधातीत्या-दधाति । वैष्णवाः । वै । वनस्पतयः । वैष्णवीः । एव । तत् । उपेति । धत्ते । यत् । इष्टकाभिः । अग्निम् । चिनोति । इयम् । वै । विश्वकर्मेति विश्व-कर्मा । वैश्वकर्मणीरिति वैश्व-कर्मणीः । एव । तत् । उपेति । धत्ते । तस्मात् । आहुः । त्रिवृदिति त्रि-वृत् । अग्निः । इति ।

उपचर्यते । समिधामौदुम्बरीणामाधानेन वैष्णव्य इष्टका उपहिता भवन्ति, वनस्पतीनां वैष्णवत्वात् । इष्टकाभिः मृद्विकारभूताभिः चयनेन वैश्वकर्मण्य उपहिता भवन्ति, पृथिव्या विश्वकर्मत्वात् । तस्मात्त्रिवृत्त्रिवृतोग्निरिति ब्रह्मवादिन आहुः । 'त्रिचक्रादीनामन्तः' इत्युत्तरपदान्तोदात्तत्वम् ॥

यजमान एव चिन्वीत यदस्यान्य-
श्चिनुयाद्यत्तं दक्षिणाभिर्न राधयेद-
ग्निमस्य वृञ्जीत योस्याग्निं चिनुयात्तं
दक्षिणाभी राधयेदग्निमेव तथ्स्पृणो-
ति ॥ ३८ ॥

[6]तम् । वै । एतम् । यजमानः । एव । चिन्वीत । यत् । अस्य । अन्यः । चिनुयात् । यत् । तम् । दक्षिणाभिः । न । राधयेत् । अग्निम् । अस्य । वृञ्जीत । यः । अस्य । अग्निम् । चिनुयात् । तम् । दक्षिणाभिः । राधयेत् । अग्निम् । एव । तत् । स्पृणोति ॥ ३८ ॥

षोढाविहितो वै वैष्णवीरन्यो विश्वज्ञातिश्च ॥ ९ ॥

---

[6]तं वा एतमिति ॥ चयनव्यापारं यजमान एव कुर्यात् अध्वर्युरेव मन्त्रान् ब्रूयादिति । अन्यकर्तृकत्वे दोषमाह—यदस्येति । यदन्यश्चिनुयात् तं यदि दक्षिणाभिः प्रभूताभिः न राधयेत् न तोषयेत् सोस्याग्निः अग्निफलानि वृञ्जीत हरेत् । तस्मान्नान्यश्चिनुयात् स्वयमेव चिन्वीतेति । योस्येति पक्षान्तरमनुज्ञायते । तस्मात् स्वयं वाऽन्योवेति विकल्पः । यदा त्वन्याश्चिनोति तं दक्षिणाभिः प्रभूताभिः भृशं राधयेत् । अग्निमेव तेन स्पृणोति प्रीणयति । स्पृ प्रीतौ । अल्पदक्षिणात्वे चेतुरेव फलं स्यात् ॥

इति पञ्चमे षष्ठे नवमोनुवाकः.

प्रजापतिरग्निमचिनुतर्तुभिस्संवथ्सरं वसन्तेनैवास्य पूर्वार्धमचिनुत ग्रीष्मेण दक्षिणं पक्षं वर्षाभिः पुच्छꣳ शरदोत्तरं पक्षꣳ हेमन्तेन मध्यं ब्रह्मणा वा अस्य तत्पूर्वार्धमचिनुत क्षत्रेण दक्षिणं पक्षं पशुभिः पुच्छं

[1]प्रजापतिरितिं प्रजा-पतिः । अग्निम् । अचिनुत । ऋतुभिरित्यृतु-भिः । संवत्सरमितिं सं-वत्सरम् । वसन्तेनं । एव । अस्य । पूर्वार्धमितिं पूर्व-अर्धम् । अचिनुत । ग्रीष्मेणं । दक्षिणम् । पक्षम् । वर्षाभिः । पुच्छम् । शरदा । उत्तरमित्युत्-तरम् । पक्षम् । हेमन्तेनं । मध्यम् । [2]ब्रह्मणा । वै । अस्य । तत् । पूर्वार्धमितिं पूर्व-अर्धम् । अचिनुत । क्षत्रेणं । दक्षिणम् । पक्षम् । पशुभि-

---

[1]प्रजापतिरग्निमचिनुतेत्यादि ॥ संवत्सरमिति । सदृशप्रधानं यथा संवत्सरमृतुभिः स्पृष्टवानेवमग्निमपि ऋतुभिः वसन्तादिभिः अचिनुत । तत्प्रकारमाह—वसन्तेनैवेत्यादिना । तदृतुसमृद्धिप्रदत्वख्यापनाय स्तुतिरियम् ॥

[2]इदानीं वसन्तादीनां सर्वार्थसाधनत्वं ख्यापयितुं द्वितीया स्तुतिः—ब्रह्मणा वा अस्येत्यादि ॥ वसन्तादिप्रधानत्वात् ब्राह्मणा-

विशोत्तरं पक्षमाशया मध्यं य एवं
विद्वानग्निं चिनुत ऋतुभिरेवैनं चि-
नुतेऽथो एतदेव सर्वमवं ॥३९॥ रु-
न्धे शृण्वन्त्येनमग्निं चिक्यानमत्यन्न ँ
रोचत इयं वाव प्रथमा चितिरोषं-

रितिं पशु-भिः । पुच्छम् । विशा । उत्तरमित्युत्-
तरम् । पक्षम् । आशया । मध्यम् । यः । एवम् ।
विद्वान् । अग्निम् । चिनुते । ऋतुभिरित्यृतु-भिः ।
एव । एनम् । चिनुते । अथो इति । एतत् । एव ।
सर्वम् । अवेति ॥ ३९ ॥ रुन्धे । शृण्वन्ति । ए-
नम् । अग्निम् । चिक्यानम् । अत्ति । अन्नम् । रो-
चते । [3]इयम् । वाव । प्रथमा । चितिः । ओषधयः ।

दीनां ब्राह्मणादिभिरेव अग्निश्चितो भवतीति प्रतिपादयति । आशा दिक्, बुद्धिर्वा तत्स्वभावा गृह्यन्ते । एवं विदित्वा चयने ऋतुभिरेव चितो भवति । अपि च एतत्सर्वं ब्राह्मणादिकमवरुन्धे विधेयीकरोति । ततश्शृण्वन्त्येनं अग्निं चितवन्तं अग्निश्चितोनेन महानुभावेनेति सर्वत्र ख्यातो भवति । पापेनापि ख्यातो भवति, यथा ग्रामो दग्धोनेन जाल्मेनेति; तत्राह—अन्नमत्त्यधिकं अस्यातिशयात् । किञ्च प्रजाभ्यो रोचते तेजस्व्येव भवति सर्वदा । समानवाक्ये पदात्परत्वान्निघाताभावः ॥

[3]इयं वावेत्यादि ॥ पृथिव्यादिरूपेण प्रथमादीनां चितीनां

धयो वनस्पतयः पुरीषमन्तरिक्षं द्वि-
तीया वयाꣳसि पुरीषमसौ तृतीया
नक्षत्राणि पुरीषं यज्ञश्चतुर्थी दीक्ष-
णा पुरीषं यजमानः पञ्चमी प्रजा
पुरीषं यत्त्रिचितीकं चिन्वीत यज्ञं
दक्षिणामात्मानं प्रजामन्तरियात्त-
स्मात्पञ्चचितीकश्चेतव्य एतदेव स-

वनस्पतयः । पुरीषम् । अन्तरिक्षम् । द्वितीया । वयाꣳसि । पुरीषम् । असौ । तृतीया । नक्षत्राणि । पुरीषम् । यज्ञः । चतुर्थी । दक्षिणा । पुरीषम् । यजमानः । पञ्चमी । प्रजेति प्र-जा । पुरीषम् । यत् । त्रिचितीकमिति त्रि-चितीकम् । चिन्वीत । यज्ञम् । दक्षिणाम् । आत्मानम् । प्रजामिति प्र-जाम् । अन्तः । इयात् । तस्मात् । पञ्चचितीक इति पञ्च-चितीकः । चेतव्यः । एतत् । एव ।

चितिः ओषधिवनस्पत्यादिरूपेण च पुरीषाणाम् । यस्मादेवं तस्मात् यदिति । त्रिचितीकं चिन्वीत चतुर्थपञ्चमचित्यभावे तन्निमित्तं यज्ञं दक्षिणामात्मानं प्रजां चान्तरियात् विनाशयेत् । तस्मात्पञ्चचितीक-श्चेतव्य इति । 'चितेः कपि' इति दीर्घत्वम् । पञ्चचितिकत्वे एतत् सर्वौषध्यादिकं यज्ञादिकं च स्तृणोति प्रीणयति रक्षतीत्यर्थः ॥

वꣳ स्पृणोति यत्तिस्रश्चितयः॥४०॥
त्रिवृद्वयग्निर्यद्वै द्विपाद्यजमानः प्रतिष्ठित्यै पञ्च चितयो भवन्ति पाङ्क्तः पुरुष आत्मानमेव स्पृणोति पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश सं पद्यन्ते दशाक्षरो वै पुरुषो यावानेव पुरुषस्तꣳ स्पृणोसर्वꣳ स्पृणोति । [4]यत् । तिस्रः । चितयः॥४०॥
त्रिवृदिति त्रि–वृत् । हि । अग्निः । यत् । द्वे इति । द्विपादिति द्वि–पात् । यजमानः । प्रतिष्ठित्या इति प्रति–स्थित्यै । [5]पञ्च । चितयः । भवन्ति । पाङ्क्तः । पुरुषः । आत्मानम् । एव । स्पृणोति । पञ्च । चितयः । भवन्ति । पञ्चभिरिति पञ्च–भिः । पुरीषैः । अभीति । ऊहति । दश । समिति । पद्यन्ते । दशाक्षर इति दश–अक्षरः । वै । पुरुषः । यावान् । एव । पुरुषः । तम् । स्पृणोति । अथो इति । दशाक्षरे-

[4]यत्तिस्र इति ॥ द्वित्वत्रित्वान्वयेनावयुत्य स्तुतिः । पञ्चेति । समुदायस्तुतिः । पाङ्क्तप्रभवः पाङ्क्तत्वादिति । पञ्चप्रभवत्वाद्वा । पाङ्क्त शब्द उत्सादिः ॥

[5]पञ्च चितय इत्यादिना दशत्वं संपाद्य स्तौति । पुरीषैरभ्यूहनमुपरिछादनम् । दशाक्षर इति । अक्षराणां आत्मनो नव प्राणा

त्यथो दशाक्षरा विराड्वै विराड्वि-
ज्येवान्नाद्ये प्रति तिष्ठति संवथ्सरो
वै षष्ठी चितिर् ऋतवः पुरीषꣳ ष-
ड्चितयो भवन्ति षड्वै पुरीषाणि द्वादश
सं पद्यन्ते द्वादश मासास्संवथ्सर-
स्संवथ्सर एव प्रति तिष्ठति ॥४१॥

ति दश-अक्षरा । विराडिति वि-राट् । अन्नम् । विराडिति वि-राट् । विराजीति वि-राज । एव । अन्नाद्य इत्यन्न-अद्ये । प्रतीति । तिष्ठति । [6]संवत्सर इति सं-वत्सरः । वै । षष्ठी । चितिः । ऋतवः । पुरीषम् । षट् । चितयः । भवन्ति । षट् । पुरीषाणि । द्वादश । सामिति । पद्यन्ते । द्वादश । मासाः । संवत्सर इति सं-वत्सरः । संवत्सर इति सं-वत्सरे । एव । प्रतीति । तिष्ठति ॥ ४१ ॥

अव चितयः पुरीषं पञ्चदश च ॥ १० ॥

अक्षराणि, नाभिर्दशमी । एवमेतैर्दशभिरक्षरैः तद्वान् पुरुषः । तस्माद्दशत्वान्वयात् सर्वमेवैनं पुरुषं स्पृणोति । अथो इत्यादि गतम्* ॥

[6]संवत्सरो वा इत्यादि ॥ द्वादशस्तुतिः । पुरीषमिति षष्ठम् । तस्माद्द्वादशमासात्मके संवत्सरे प्रतिष्ठितो भवति ॥

इति पञ्चमे षष्ठे दशमोनुवाकः.

---

*सं. ५-४-६.

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते
प्राजापत्या बभ्रुरुणबभ्रुश्शुकबभ्रु-
स्ते रौद्राश्श्येतश्श्येताक्षश्श्येतग्री-

[1]रोहितः । धूम्ररोहित इति धूम्र—रोहितः । कर्क-न्धुरोहित इति कर्कन्धु—रोहितः । ते । प्राजापत्या इति प्राजा—पत्याः । बभ्रुः । अरुणबभ्रुरित्यरुण—ब-भ्रुः । शुकबभ्रुरिति शुक—बभ्रुः । ते । रौद्राः । श्ये-तः । श्येताक्ष इति श्येत—अक्षः । श्येतग्रीव इति श्येत—ग्रीवः । ते । पितृदेवत्या इति पितृ—देवत्याः ।

---

[1]अथाश्वमेधिकाः पशवोष्टादशिनो विधीयन्ते । वैश्वदेवं काण्डम् । तत्र दशस्वनुवाकेषु प्रत्येकमष्टादश पशव उच्यन्ते । अष्टादशानां व-र्णनियमोत्र क्रियते । आरण्येष्वष्टादशिषु जातिनियमः पञ्चमे कृतः । ग्राम्येषूभयथा नियमः 'सोमाय स्वराज्ञे'* इत्यारभ्य द्वन्द्वादिषु बहुधा नियम इति । रोहितादयस्त्रयः प्राजापत्याः । रोहितः लोहितः । धूम्र-रोहितः अस्पष्टलोहितः । 'वर्णो वर्णेन' इति समानाधिकरण-त्वात् तत्पुरुषः, 'वर्णेवर्णेष्वनेते' इति पूर्वपदप्रकृतिस्वरत्वम् । कर्कन्धुरोहितः सौवीरवर्णः । 'उपमानानि सामान्यवचनैः' इति समासः । उपमानपूर्वपदप्रकृतिस्वरत्वम् । बभ्रवादयस्त्रयो रौद्राः । बभ्रुः पाण्डरकपिलः । अरुणः न्यूनरक्तकपिलः । शुकबभ्रुः हरितशुकसमानवर्णः । ग्रामेकेतौ† स्वरौ । श्येतादयस्त्रयः पितृ-

---

*सं.५-६-२१. †ग्रामकेतौ.

वस्ते पितृदेवत्यास्तिस्रः कृष्णा वशा
वारुण्यस्तिस्रश्वेता वशास्सौर्यो
मैत्राबार्हस्पत्या धूम्रललामास्तू-
पराः ॥ ४२ ॥
पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मा-

तिस्रः । कृष्णाः । वशाः । वारुण्यः । तिस्रः । श्वे-
ताः । वशाः । सौर्यः । मैत्राबार्हस्पत्या इति मै-
त्रा—बार्हस्पत्याः । धूम्रललामा इति धूम्र-ल-
लामाः । तूपराः ॥ ४२ ॥

रोहितष्षड्विंशतिः ॥ ११ ॥

[1]पृश्निः । तिरश्चीनपृश्निरिति तिरश्चीन—पृश्निः ।

देवत्याः । श्येतः शुक्लवर्णः । शुक्लरक्त इत्येके । श्येताक्षः रक्त-दृष्टिः । 'अक्ष्णोऽदर्शनात्' इत्यच् समासान्तः । सतिशिष्टत्वात् लिट्स्वरेण बहुव्रीहिस्वरो बाध्यते । श्येतग्रीवः । गतः । तिस्रः कृष्णा वशा वारुण्यः । गताः । 'तिसृभ्यो जसः' इति जस उदात्त-त्वम् । एवं सर्वत्र । तिस्रः श्वेता वशाः सौर्यः । गताः । एवं धूम्र-ललामास्त्रयस्तूपराः मैत्रा बार्हस्पत्याः । धूम्रललामाः धूम्रवर्णपुण्ड्राः तूपराः शृङ्गहीनाः ॥

इति पञ्चमे षष्ठे एकादशोनुवाकः.

---

[1]पृश्न्यादयस्त्रयो मारुताः ॥ पृश्निः शुक्लवर्णबिन्दुचितः चित्र-वर्णः । तिरश्चीनपृश्निः तिर्यक्प्रततवर्णः पृश्निवर्णः । एतेनोर्ध्व-

रुताः फल्गूलोंहितोर्णीं बलक्षी ता-
स्सारस्वत्यः पृषंती स्थूलपृषती क्षु-
द्रपृषती ता वैश्वदेव्यस्तिस्रश्श्यामा
वशाः पौष्णियंस्तिस्रो रोहिंणीर्वशा

ऊर्ध्वपृश्निरित्यूर्ध्व–पृश्निः । ते । मारुताः । फल्गूः । लोहितोर्णीति लोहित–ऊर्णी । बलक्षी । ताः । सारस्वत्यः । पृषंती । स्थूलपृषतीति स्थूल–पृषती । क्षुद्रपृषतीति क्षुद्र–पृषती । ताः । वैश्वदेव्य इति वैश्व–देव्यः । तिस्रः । श्यामाः । वशाः । पौष्णियंः । तिस्रः । रोहिंणीः । वशाः । मैत्रियंः । ऐ-

---

पृश्निर्व्याख्यातः । उभयत्रापि प्रधानेन बहुव्रीहिः । फल्ग्वादयस्तिस्रस्सारस्वत्यः । फल्गूः लवणवर्णः । लोहितोर्णी रोहितरोमा। छान्दसो ङीष् । सतिशिष्टेन प्रत्ययस्वरेण बहुव्रीहिस्वरः । बलक्षी शुक्ला । बवयोरेकत्वमिच्छन्ति । 'अन्यतो ङीष्' इति ङीष्, नोपधापेक्षमन्यत्वम् । पृषत्यादयस्त्रयो वैश्वदेव्यः । शुक्लैर्बिन्दुभिश्चिताः मध्यमैः न स्थूलैः न क्षुद्रैः । शतृवद्भावात् 'उगितश्च' इति ङीप् । स्थूलपृषती स्थूलानि पृषन्ति यस्याः । 'उगिद्वर्णग्रहणवर्जम्' इति तदन्तग्रहणाभ्यनुज्ञानात् 'उगितश्च' इति ङीप् । एवं क्षुद्रपृषती । तिस्रः श्यामाः वशाः पौष्ण्यः । गताः । तिस्रो रोहिणीः वशा मैत्र्यः । 'वर्णादनुदात्तात्' इति ङीन्नकारौ, 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । अरुण-

मैत्रियं ऐन्द्राबार्हस्पत्या अरुणल-
लामास्तूपराः ॥ ४३ ॥
शितिबाहुरन्यतश्शितिबाहुस्समन्त-
शितिबाहुस्त ऐन्द्रवायवाश्शितिर-
न्ध्रोऽन्यतश्शितिरन्ध्रस्समन्ताशिति-
न्द्राबार्हस्पत्या इत्यैन्द्रा—बार्हस्पत्याः । अरुण-
ललामा इत्यरुण—ललामाः । तूपराः ॥ ४३ ॥
पृश्निष्षड्विंशतिः ॥ १२ ॥

[1]शितिबाहुरितिं शिति—बाहुः । अन्यतश्शिति-
बाहुरित्यन्यतः—शितिबाहुः । समन्ताशितिबाहुरितिं
समन्त—शितिबाहुः । ते । ऐन्द्रवायवा इत्यैन्द्र—वा-
यवाः । शितिरन्ध्र इतिं शिति—रन्ध्रः । अन्यतश्शि-

ललामास्त्रयस्तूपराः ऐन्द्राबार्हस्पत्याः । अरुणललामाः सन्ध्यावर्ण-
पुण्ड्राः ॥

इति पञ्चमे षष्ठे द्वादशोनुवाकः.

---

[1]शितिबाह्वादयस्त्रय ऐन्द्रवायवाः । शितिः शुक्लो बार्हेक-
देशो यस्य । ‘ शितेर्नित्या बह्वच् ’ इत्युत्तरपदप्रकृतिस्वरत्वम् । सः
अन्यतश्शितिबाहुः यत्प्रथमस्य शितित्वं ततोन्यत्रैकदेशे शितित्वं यस्य
सः अन्यतश्शितिः । तादृशो बाहुर्यस्येति पुनर्बहुव्रीहौ पूर्वपद-

रन्ध्रस्ते मैत्रावरुणाश्शुङ्कवालस्स-
र्वशुङ्कवालो मणिवालस्त आश्वि-
नास्तिस्रश्शिल्पा वशा वैश्वदेव्य-
स्तिस्रश्श्येनीः परमेष्ठिने सोमा-

तिरन्ध्र इत्यन्यतः-शितिरन्ध्रः । समन्तशितिरन्ध्र इति समन्त-शितिरन्ध्रः । ते । मैत्रावरुणा इति मैत्रा-वरुणाः । शुङ्कवाल इति शुङ्क-वालः । सर्व-शुङ्कवाल इति सर्व-शुङ्कवालः । मणिवाल इति मणि-वालः । ते । आश्विनाः । तिस्रः । शिल्पाः । वशाः । वैश्वदेव्य इति वैश्व-देव्यः । तिस्रः । श्येनीः । परमेष्ठिने । सोमापौष्णा इति सोमा-पौ-

---

प्रकृतिस्वरत्वं पूर्ववदेव । तदन्तविध्यभावात् शितिस्वराभावः । समन्तशितिबाहुः सर्वशुक्लबाहुः । अस्मिन्व्याख्याने उभयत्र शित्य-न्तस्यावग्रहः प्राप्नोति । तस्माद्भावप्रधानेन शितिबाहुशब्देन बहु-व्रीहिणा पूर्वपदयोः पुतः बहुव्रीहिभिः । शितिरन्ध्रादयो मैत्रावरु-णाः । शितिरन्ध्रः शुक्लछिद्रः । पूर्ववदुत्तरपदप्रकृतिस्वरत्वम् । अ-न्यतश्शितिरन्ध्रसमन्तशितिरन्ध्रौ गतौ । शुङ्कवालादयस्त्रय आश्विनाः । शुङ्कवालः शुक्लपुच्छवालावयवः । सर्वशुङ्कवालः सर्वशुक्लपुच्छः । मणिवालः एकान्तशुक्लाशुक्लचितवालः । तिस्रश्शिल्पा वशा वैश्वदेव्यः । शिल्पा नानावर्णाः । तिस्रश्श्येनीः परमेष्ठिने श्येन्यश्शुक्लाः पूर्वव-

पौष्णाश्श्यामलॅलामास्तूपराः ॥४४
उन्नत ऋंषभो वांमनस्त ऐंन्द्रावरु-
णाश्शितिंककुच्छितिपृष्ठाश्शितिंभ -
स्त्त ऐंन्द्राबार्हस्पत्याश्शितिपा-
च्छित्योष्ठांश्शितिभ्रुस्त ऐंन्द्रावैष्ण-

ष्णाः । श्यामलॅलामा इतिं श्याम—लॅलामाः । तूपराः ॥ ४४ ॥

शितिबाहुः पञ्चंविꣳशतिः ॥ १३ ॥

[1]उन्नत इत्युंत्—नतः । ऋषभः । वामनः । ते । ऐन्द्रावरुणा इत्यैंन्द्रा—वरुणाः । शितिंककुदिंति शितिं—ककुत् । शितिपृष्ठ इतिं शिति—पृष्ठः । शितिंभस्तदिति शितिं—भस्त् । ते । ऐन्द्राबार्हस्पत्या इत्यैंन्द्रा—बार्हस्पत्याः । शितिपादितिं शिति—पात् । शित्योष्ठ इतिं शिति—ओष्ठः । शितिभ्रुरि-

---

न्ङीब्नकारौ, पूर्वसवर्णदीर्घत्वं च । श्यामललामास्त्रयस्तूपराः सोमापौष्णाः । गताः ॥

इति पञ्चमे षष्ठे त्रयोदशोनुवाकः.

---

[1]उन्नतादयस्त्रय ऐन्द्रावरुणाः ॥ उन्नतः उन्नतपृष्ठः । ऋषभः सेक्ता । वामनो ह्रस्वाङ्गः । शितिककुदादयस्त्रय ऐन्द्राबार्हस्पत्याः । शुक्लं ककुदमस्येति बहुव्रीहौ ' ककुदस्यावस्थायां लोपः ' । नित्या

वास्तिस्रास्सिध्मा वशा वैश्वकर्मण्य-
स्तिस्रो धात्रे पृषोदरा ऐन्द्रापौष्णा-
श्श्येतललामास्तूपराः ॥ ४५ ॥
कर्णास्त्रयो यामास्सौम्यास्त्रयश्श्वति-

तिं शिति—भ्रुः । ते । ऐन्द्रावैष्णवा इत्यैन्द्रा—वैष्ण-
वाः । तिस्रः । सिध्माः । वशाः । वैश्वकर्मण्यं इतिं
वैश्व—कर्मण्यः । तिस्रः । धात्रे । पृषोदरा इतिं
पृष—उदराः । ऐन्द्रापौष्णा इत्यैन्द्रा—पौष्णाः । श्ये-
तंललामा इति श्येतं—ललामाः । तूपराः ॥ ४५ ॥

उन्नतः पञ्चविꣳशतिः ॥ १४ ॥

[1]कर्णाः । त्रयः । यामाः । सौम्याः । त्र-

बह्विति वचनात् शितिस्वराभावः । शितिपादादयः त्रय ऐन्द्रावै-
ष्णवाः । गताः । छान्दसं ह्रस्वत्वम् । तिस्रस्सिध्मा वशा वैश्वकर्मण्यः ।
सिध्माः सिध्मलाञ्छनाः प्रादेशिकश्वेताङ्कितदेहाः । तिस्रो धात्रे पृषो-
दराः पृषन्ति उदरे यासाम् । 'पृषोदरादीनि यथोपदिष्टम्' इति
यथाभिमतस्वरूपसिद्धिः । श्वेतललामास्त्रयस्तूपराः ऐन्द्रापौष्णाः
गताः ॥

इति पञ्चमे षष्ठे चतुर्दशोनुवाकः.

---

[1]कर्णास्त्रयो यामाः । कर्णाः छिद्रकर्णाः । महाकर्णा इत्ये-
के । मत्वर्थीयोकारः । सौम्यास्त्रयश्श्वतिङ्गाः श्वेतपादाः । अग्नये

श्वि॒तिङ्ग॒रश्व॑यो॒ यवि॑ष्ठाय॒ त्रयो॑ नकु॒ला-
स्ति॒स्रो रोहि॑णीस्त्र्यव्य॒स्ता व॑सू॒नां
ति॒स्रोऽरु॒णा दि॑त्यौ॒ह्यस्ता रु॒द्राणा॑ꣳ
सोमै॒न्द्रा ब॒भ्रुल॑लामास्तू॒पराः॥४६॥

यः। श्वि॒तिङ्ग॒रिति॑ श्वि॒ति-ङ्गरः॑। अ॒ग्नये॑। यवि॑ष्ठाय। त्रयः॑। न॒कु॒-
लाः। ति॒स्रः। रोहि॑णीः। त्र्यव्य॒ इति॑ त्रि-अव्यः॑।
ताः। व॒सू॒नाम्। ति॒स्रः। अ॒रु॒णाः। दि॒त्यौ॒ह्यः॑।
ताः। रु॒द्राणा॑म्। सोमै॒न्द्रा इति॑ सोम-ऐ॒न्द्राः॑।
ब॒भ्रुल॑लामा॒ इति॑ ब॒भ्रु-ल॒ला॒माः॑। तू॒प॒राः॑॥४६॥

क॒र्णास्त्रयो॑विꣳशतिः॥ १५॥

यविष्ठाय त्रयो नकुलाः नकुलवर्णाः। तिस्रो रोहिणीस्त्र्यव्यस्ता वसूनाम्। रोहिण्यो गताः। त्र्यव्यः अर्धवर्षाः, अविशब्देनान्नवाचिना षष्ठमासो लक्ष्यते, षष्ठे मास्यन्नं दीयत इति। समाहारतायामवयवस्वरानिवृत्तिः। बहुव्रीहिर्वा, व्यत्ययेन 'जसि च' इति गुणो न क्रियते, 'सर्वतोक्तिन्नर्थात्' इति वा ङीप्। व्यत्ययेन वा अनकारान्तादपि 'द्विगोः' इति ङीप्, 'परादिश्छन्दसि' इत्युत्तरपदान्तोदात्तत्वम्। तिस्रोऽरुणा दित्यौह्यस्ता रुद्राणाम्। अरुणा गताः। दित्यो वाहः तं वहन्तीति 'वहश्च' इति ण्विः, ऊठि सति 'वाहः' इति ङीप्। 'वाह ऊठ्' इत्यूठादेशः, 'एत्येधत्यूसु' इति वृद्धिः। द्विवर्षा उच्यन्ते। बभ्रुललामास्त्र्यस्तूपराः सोमैन्द्रा गताः॥

इति पञ्चमे षष्ठे पञ्चदशोनुवाकः.

शुण्ठास्त्रयो वैष्णवा अधीलोधक-
र्णास्त्रयो विष्णव उरुक्रमाय लप्सु-
दिनस्त्रयो विष्णव उरुगायाय प-
श्वावीस्तिस्र आदित्यानां त्रिवत्सा-
स्तिस्रोऽङ्गिरसामैन्द्रावैष्णवा गौरल-
लामास्तूपराः ॥ ४७ ॥

[1]शुण्ठाः । त्रयः । वैष्णवाः । अधीलोधकर्णा इत्यधीलोध-कर्णाः । त्रयः । विष्णवे । उरुक्रमा-येत्युरु-क्रमाय । लप्सुदिनः । त्रयः । विष्णवे । उरुगायायेत्युरु-गायाय । पश्वावीरिति पश्व-अवीः । तिस्रः । आदित्यानाम् । त्रिवत्सा इति त्रि-व-त्साः । तिस्रः । अङ्गिरसाम् । ऐन्द्रावैष्णवा इत्यै-न्द्रा-वैष्णवाः । गौरललामा इति गौर-ललामाः । तूपराः ॥ ४७ ॥

शुण्ठा विंशतिः ॥ १६ ॥

[1]शुण्ठास्त्रयो वैष्णवाः । शुण्ठाः गूर्णाः आवेष्टितकर्णाः । अल्पकर्णा इत्येके । अधीलोधकर्णास्त्रयो विष्णव उरुक्रमाय । अधीलोधकर्णाः कर्णोपरि प्ररूढकर्णाः । त्रयो लप्सुदिनः विष्णव उ-रुगायाय । लप्सुदिनः लम्बमानकूर्चाः लम्बमानेन सूदितानि । पृ-षोदरादिः । तद्वन्तः । उरुभिः महात्मभिः गातव्यः उरुगायः। तिस्रः पश्वावीः तिस्रः आदित्यानाम्। अर्धतृतीयवर्षा पश्व्याः।

इन्द्रा॑य राज्ञे त्रय॑स्त्रिंशतिपृष्ठा इन्द्रा॑-
याधिरा॒जाय॒ त्रय॒स्त्रिंशा॑तिंककुद॒ इन्द्रा॑-
य स्वरा॒ज्ञे त्रय॒स्त्रिंशा॑तिंभसदास्ति॒स्र-
स्तु॒र्यौ॑ह्य॑स्साध्यानां॑ ति॒स्रः प॑ष्ठौ॒ह्यो॑

[1]इन्द्रा॑य । राज्ञे॑ । त्रय॑स्त्रिंशतिपृष्ठा इति॑ शि-
ति॒–पृ॒ष्ठाः॒ । इन्द्रा॑य । अधि॒रा॒जायेत्य॑धि–रा॒जाय॑ ।
त्रय॑स्त्रिंशः । शिति॑ंककुद॒ इति॒ शिति॑ं–क॒कु॒दः॒ । इन्द्रा॑य॒।
स्व॒रा॒ज्ञ॒ इति॑ स्व–राज्ञे॑ । त्रय॑स्त्रिंशः । शिति॑ंभसद॒ इति॒
शिति॑ं–भस॒दः॒ । ति॒स्रः । तु॒र्यौ॑ह्य॑स्सः । सा॒ध्या॒नां॒म् ।
ति॒स्रः । प॒ष्ठौ॒ह्य॑स्सः । विश्वे॑षाम् । दे॒वा॒नां॒म् । आग्ने॒-

---

द्विगुपक्षे 'इगन्तकाल' इति पूर्वपदप्रकृतिस्वरः । त्रिवत्साः तिस्रोऽङ्गिरसां त्रिवर्षाः तिस्रोऽङ्गिरसां वत्सरस्य । गौरललामास्त्रयस्तूपराः ऐन्द्रावैष्णवाः गताः ॥

इति पञ्चमे षष्ठे षोडशोनुवाकः.

---

[1]इन्द्राय राज्ञे त्रयस्त्रिंशतिपृष्ठाः । पूर्ववच्छितिस्वरः । इन्द्रायाधिराजाय त्रयस्त्रिंशतिककुदः । अधिरूढो राजा अधिराजः । स्वराभाव उक्तः । इन्द्राय स्वराज्ञे त्रयः शितिभसदः । स्वयमेव राजतीति स्वराजा । 'न पूजनात्' इति वचनाट्टजभावः । उक्तः स्वरः । तिस्रस्तुर्यौह्यस्साध्यानाम् । तुर्यौर्ध्वचतुर्वर्षा दित्यौहिभिर्वा ख्यातः । तुर्यं युगचतुर्थं । तिस्रः पष्ठौह्यो विश्वेषां देवानाम् ।

विश्वेषां देवानामाग्नेन्द्राः कृष्णलं-
लामास्तूपराः ॥ ४८ ॥
अदित्यै त्रयो रोहितैता इन्द्राण्यै
त्रयः कृष्णैताः कुह्वै त्रयोऽरुणैता-
स्तिस्रो धेनवो राकायै त्रयोऽनड्वा-
न्द्राः । कृष्णलंलामा इति कृष्ण–ललामाः । तू-
पराः ॥ ४७ ॥
इन्द्राय द्वावि꣡शतिः ॥ १८ ॥

[1]अदित्यै । त्रयः । रोहितैता इति रोहित–ए-
ताः । इन्द्राण्यै । त्रयः । कृष्णैता इति कृष्ण–ए-
ताः । कुह्वै । त्रयः । अरुणैता इत्यरुण–एताः ।
तिस्रः । धेनवः । राकायै । त्रयः । अनड्वाहः ।

पष्ठौह्यश्चतुर्वर्षाः । पष्ठो युगपार्श्वम् । कृष्णललामास्तूपराः आग्नेन्द्राः गताः ॥

इति पञ्चमे षष्ठे सप्तदशोनुवाकः.

---

[1]अदित्यै त्रयो रोहितैताः ॥ रोहिताश्च ते एताश्चेति रोहितैताः । 'वर्णो वर्णेन' इति समासः । 'अनेतः' इति प्रतिषेधात् पूर्वपदप्रकृतिस्वराभाव उक्तः । इन्द्राण्यै त्रयः कृष्णैताः । तावेव स्वरसमासौ । कुह्वै त्रयोऽरुणैताः गताः । तिस्रो धेनवो राकायै धेनवः प्रत्यग्रप्रसवा गावः । त्रयोऽनड्वाहः सिनीवाल्यै । अनो

हंस्सिनीवाल्या आंग्रावैष्णवा रोंहि-
तललामास्तूपराः ॥ ४९ ॥
सौम्यास्त्रयंः पिशङ्गास्सोमांय राज्ञे
त्रयंस्सारङ्गांः पार्जन्या नभौंरूपा-
स्तिस्रोंजा मलूहा इंन्द्राण्यै तिस्रो
मेष्यं आदित्या द्यांवापृथिव्यां मा-
लङ्गांस्तूपराः ॥ ५० ॥

सिनीवाल्यै । आग्रावैष्णवा इत्यांग्रा—वैष्णवाः । रो-
हितललामा इति रोहित—ललामाः । तूपराः ॥४९॥
आदित्या अष्टादश ॥ १८ ॥

[1]सौम्याः । त्रयंः । पिशङ्गांः । सोमांय । राज्ञे । त्रयंः । सारङ्गांः । पार्जन्याः । नभौंरूपा इति न-
भंः—रूपाः । तिस्रः । अजाः । मलूहाः । इन्द्रा-
ण्यै । तिस्रः । मेष्यंः । आदित्याः । द्यावापृथिव्यां

वहन्तीत्यनड्वाहः अनोवहनसमर्थाः । पृषोदरादिः । लोहितल-
लामाः त्रयस्तूपराः आग्रावैष्णवाः गताः ॥

इति पञ्चमे षष्ठे अष्टादशोनुवाकः.

---

[1]सौम्यास्त्रयः पिशङ्गाः गोरोचनवर्णाः । पर्जन्यादयस्त्रयो न-
भोरूपाः अञ्जनवर्णास्तिस्रोऽजा इन्द्राण्यै मलूहाः कण्ठावलम्बितस्त-

वारुणास्त्रयः कृष्णललामा वरुणा-
य राज्ञे त्रयो रोहितललामा वरुणा-
य रिशादसे त्रयोऽरुणललामाश्वि-
ल्पास्त्रयो वैश्वदेवास्त्रयः पृश्नयस्स-
प्तिर्वा वा—पृथिव्याः । मालङ्गाः । तूपराः ॥५०॥
सौम्या एकान्न विंशतिः ॥ १९ ॥

[1]वारुणाः । त्रयः । कृष्णललामा इति कृष्ण—
ललामाः । वरुणाय । राज्ञे । त्रयः । रोहितलला-
मा इति रोहित—ललामाः । वरुणाय । रिशादसे
इति रिश—अदसे । त्रयः । अरुणललामा इत्यरु-
ण—ललामाः । अश्विल्पाः । त्रयः । वैश्वदेवा इति
वैश्व—देवाः । त्रयः । पृश्नयः । सर्वदेवत्या इति

नयुग्मास्तिस्रः इन्द्राग्न्यै । तिस्रो मेष्यः आदित्याः । मेषवर्णा इ-
त्येके । द्यावापृथिव्यास्त्रयो मालङ्गाः महाकायाः ॥

इति पञ्चमे षष्ठे एकोनविंशोनुवाकः.

वारुणास्त्रयः कृष्णललामाः गताः । वरुणाय राज्ञे त्रयो रो-
हितललामाः । राजत्वमस्य विशेषः । वरुणाय रिशादसे त्र-
योऽरुणललामाः रिशादस्त्वमस्येति विशेषः । रिशादसः लोक-
हिंसकानां रक्षाङ्गानां नाशयिता रिशादसाः । 'गतिकारकयो-

र्वदेवत्या ऐन्द्रासूराश्श्येतंललामा-
स्तूपराः ॥ ५१ ॥
सोमाय स्वराज्ञेऽनोवाहावनड्वाहा-
विन्द्राग्निभ्यामोजोदाभ्यामुष्टारावि-
न्द्राग्निभ्यां बलदाभ्याꣳ सीरवाहाव-

सर्व-देवत्याः । ऐन्द्रासूरा इत्यैन्द्रा-सूराः । श्येतं-ललामा इति श्येतं-ललामाः । तूपराः ॥ ५१ ॥

वारुणा विꣳशतिः ॥ २० ॥

[1]सोमाय । स्वराज्ञ इति स्व-राज्ञे । अनोवा-हावित्यनः-वाहौ । अनड्वाहौ । इन्द्राग्निभ्यामितीन्द्राग्नि-भ्याम् । ओजोदाभ्यामित्योजः-दाभ्यांम् । उष्टारौ । इन्द्राग्निभ्यामितीन्द्राग्नि-भ्याम् । बलदा-

---

रपि' इत्यसुन्, पूर्वपदप्रकृतिस्वरत्वं च शिल्पाः । त्रयो वैश्वदेवाः गताः । त्रयः पृश्नयः सर्वदेवत्याः । सर्वदेवशब्दात् 'देवतान्तात्तादर्थ्ये यत्' श्वेतललामाः त्रयस्तूपरा ऐन्द्रासूराः । 'सूर्यतिष्य' इति यलोपः ॥

इति पञ्चमे षष्ठे विंशोनुवाकः.

---

[1]सोमाय स्वराज्ञेऽनोवाहावनड्वाहौ ॥ शकटस्य वोढारौ पुङ्गवौ । इन्द्राग्निभ्यां ओजोदाभ्यां उष्टारौ प्रासङ्गस्य वोढारौ अन-

वी॒ ह्वे धे॒नू भौ॒मी दि॒ग्भ्यो व॑डबे॒ ह्वे धे॒नू
भौ॒मी वै॑रा॒जी पु॑रु॒षी ह्वे धे॒नू भौ॒मी
वा॒यवं॑ आरोहणवा॒हावं॑नड्वा॒हौ॑ वारु॒-
णी कृ॒ष्णे व॒शे अ॑रा॒ड्यौ॑ दि॒व्यावृ॑-
ष॒भौ प॑रिम॒रौ ॥ ५२ ॥

भ्या॒मिति॑ बल—दाभ्या॑म्।सी॒र॒वा॒हाविति॑ सीर—वा॒हौ।
अवी॒ इति॑। ह्वे इति॑। धे॒नू इति॑। भौ॒मी इति॑। दि॒ग्भ्य
इति॑ दिक्—भ्यः। व॑डबे॒ इति॑। ह्वे इति॑। धे॒नू इति॑।
भौ॒मी इति॑। वै॒रा॒जी इति॑। पु॒रु॒षी इति॑। ह्वे इति॑।
धे॒नू इति॑। भौ॒मी इति॑। वा॒यवे॑। आ॒रो॒ह॒ण॒वा॒हा-
वि॒त्या॑रोहण—वा॒हौ। अ॒न॒ड्वा॒हौ॑। वा॒रु॒णी इति॑।

ड्वाहौ । इन्द्राग्निभ्यां बलदाभ्यां सीरवाहौ हलस्य वोढारौ अन-
ड्वाहौ । इन्द्राग्निशब्दे 'देवताद्वन्द्वे च' इति प्राप्तस्य युगपत्प्र-
कृतिस्वरस्य 'नोत्तरपदेऽनुदात्तादौ' इति प्रतिषेधः । अवी ह्वे धेनू
भौमी भूमिदेवत्ये । पूर्ववत् सवर्णदीर्घत्वम् । इन्द्राग्निभ्यामेवावी
इति केचित् । दिग्भ्यो वडबे अश्वस्त्रियौ ह्वे भौमी भौम्ये
गते । वैराजी विराड्देवत्ये पुरुषी मनुष्यस्त्रियौ । जातिलक्षणो
ङीष् । पूर्वत्र उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम् । पुनर्धेनू
भौमी गते । वायव आरोहणवाहौ मनुष्यादेवारोहणादेः वोढारौ ।
तत एवाण् । कृष्णे वशे वारुण्यौ गते । अराड्यौ दिव्यौ
वृषभौ अराड्यौ दीर्घोच्छ्रितशृङ्गौ । दिव्यौ द्युदेवत्यौ । वृषभौ

एकादश प्रातर्ग्व्याः पशव आ लं-
भ्यन्ते छगलः कल्माषः किंकिदी-
विर्विदीगयस्ते त्वाष्ट्रास्सौरीर्नर्वं श्वे-
ता वशा अनूवन्ध्या भवन्त्याग्नेय
कृष्णे इति । वशे इति । अराव्यौ । दिव्यौ । रु-
षभौ । परिमरावितिं परि-मरौ ॥ ५२ ॥

सोमाय चतुस्त्रिꣳशत् ॥ २३ ॥

[1]एकादश । प्रातः । गव्याः । पशवः । एति । लभ्यन्ते । छगलः । कल्माषः । किंकिदीविः । विदीगयः । ते । त्वाष्ट्राः । सौरीः । नर्वं । श्वेताः । वशाः । अनूवन्ध्या इत्यनु-वन्ध्याः । भवन्ति ।

सेक्तारौ । परिमरौ परिमर्तारौ ययोः द्वयोः मृतानुजौ मृतपूर्वजौ चोच्येते । 'परेरभितो भाविमण्डलं' इत्युत्तरपदान्तोदात्तत्वम् ॥

इति पञ्चमे षष्ठे एकविंशोनुवाकः.

---

[1]एकादशेत्यादि ॥ उत्तमेऽहनि प्रातरालभ्यन्ते 'प्राजापत्या भवन्ति'* इति ब्राह्मणम् । प्राजापत्या वैश्वदेवा इति केचित् । गोरपत्यानि गव्याः सर्वत्र 'गोरजादिप्रसङ्गे' इति यत्, 'यतो नावः' इति व्यत्ययेन प्रवर्तते । छगलादयश्चत्वारः । पशवोस्मिन्नहन्यालभ्यन्ते त्वाष्ट्राः । छगलः छागिकः । कल्माषः

*बा. ३-९-९.

ऐन्द्राग्न आश्विनस्ते विशालयूप आ
लभ्यन्ते ॥ ५३ ॥
पिशङ्गास्त्रयो वासन्तास्सारङ्गास्त्र-
यो ग्रैष्माः पृषन्तस्त्रयो वार्षिकाः
पृश्नयस्त्रयश्शारदाः पृश्निसक्थास्त्र-
यो हैमन्तिका अवलिप्तास्त्रयश्शौ-

आग्नेयः । ऐन्द्राग्न इत्यैन्द्र–अग्नः । आश्विनः । ते । विशालयूप इति विशाल–यूपे । एति । लभ्यन्ते ॥ ५३

एकादश पञ्चविंशतिः ॥ २२ ॥

[1]पिशङ्गाः । त्रयः । वासन्ताः । सारङ्गाः । त्रयः । ग्रैष्माः । पृषन्तः । त्रयः । वार्षिकाः । पृश्नयः । त्रयः । शारदाः । पृश्निसक्था इति पृश्नि–सक्थाः । त्रयः । हैमन्तिकाः । अवलिप्ता इत्यव–लिप्ताः । त्रयः । शौशिराः । संवत्सरायेति सं–व–

कल्माषवर्णः । किकिदीविः.....सदृश इत्यन्ये । श्वेतवशा नव अनूबन्ध्या भवन्ति सौर्यः । उक्तं पूर्वसवर्णदीर्घत्वम् । आग्नेयादयस्त्रयो विशालयूपे मध्यम आलभ्यन्ते । विशालशृङ्गो यूपो विशालयूपः । 'वेशालच्छङ्कटचौ' ॥

इति पञ्चमे षष्ठे द्वाविंशोनुवाकः.

---

[1]पिशङ्गादय ऋतुपशवः प्रत्यृतु त्रयस्त्रयः । 'सक्थश्चाक्रान्तात्' इत्युत्तरपदान्तोदात्तत्वम् । हैमन्तिका इति । 'हेमन्ताच्च' इति ठञ् । अवलिप्ताः वर्णान्तरस्योपरि वर्णान्तर-

शिरास्संवथ्सराय निवक्षसः ॥५४॥

त्सराय । निवक्षस इति नि--वक्षसः ॥ ५४ ॥

पिशङ्गा विꣳशतिः ॥ २३ ॥

रोहितः कृष्णा धूम्रललामाः पृश्निश्श्यामा अरुणललामाश्शितिबाहुश्शल्पाश्श्येनीश्श्यामल - लामा उन्नतास्सिध्मा धात्रे पौष्णाश्श्येतललामाः कर्णा बभ्रुललामाश्शुण्ठा गौरललामा इन्द्राय कृष्णललामा अदित्यै रोहितललामास्सौम्या मालङ्गा वारुणास्सूराश्श्येतललामा दश ॥

हिरण्यवर्णा अपां ग्रहान्भूतेष्टकास्सजूस्संवत्सरं प्रजापतिस्स क्षुरपविरग्नेर्वै दीक्षया सुवर्गाय तं यन्न सूयते प्रजापतिर् ऋतुभी रोहितः पृश्निश्शितिबाहुरुन्नतः कर्णाश्शुण्ठा इन्द्रायादित्यै सौम्या वारुणास्सोमायैकादश पिशङ्गास्त्रयोविꣳशतिः ॥२३॥

हिरण्णवर्णा भूतेष्टकाश्छन्दो यत्कनीयाꣳसं त्रिवृच्चयग्निर्यद्वै वारुणाश्चतुःपञ्चाशत् ॥५४॥

हरिः ओम्. समाप्तष्षष्ठप्रपाठकः.

लिप्ताः । स्तब्धा इत्यन्ये । संवत्सराय निवक्षस आलभ्यते । निवक्षसः निम्नवक्षसः ॥

इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये पञ्चमे काण्डे षष्ठप्रश्ने त्रयोविंशोनुवाकः.

समाप्तश्च प्रपाठकः.

सप्तमप्रपाठकप्रारम्भः

हरिः ओम् ॥ यो वा अयथादेवत-
मग्निं चिनुत आ देवताभ्यो वृश्चयते
पापीयान्भवति यो यथादेवतं न दे-
वताभ्य आ वृश्चयते वसीयान्भवत्या-
ग्नेय्या गायत्रिया प्रथमां चितिमभि

[1]यः । वै । अयथादेवतमित्ययथा—देवतम् । अग्निम् । चिनुते । एतं । देवताभ्यः । वृश्चयते । पापीयान् । भवति । यः । यथादेवतामिति यथा—देवतम् । न । देवताभ्यः । एतं । वृश्चयते । वसीयान् । भवति । [2]आग्नेय्या । गायत्रिया । प्रथमाम् । चितिम् । अभीति । मृशेत् । त्रिष्टुभा । द्विती-

---

[1]अथाग्निकाण्डमग्न्यार्षेयम्—'यो वा अयथादेवतं' इत्यभिमर्शनविधिः ॥ यथादेवतं या यत्र देवता तद्यथादेवतम् । अनाम्न्या देवतया यश्चिनुतेऽग्निं स सर्वाभ्यो देवताभ्यो वृश्चयते, पापतरश्च भवति । यो यथादेवतामित्यादि । गतम् । देवताशब्देनाग्निरुच्यते ॥

[2]तदेवाह—आग्नेय्येति ॥ 'अग्ने देवां इहावह'* इति गायत्र्या । त्रिष्टुभेति आग्नेय्येत्येवं सर्वत्र 'अगन्म महा मनसा'* इति ।

---

*ब्रा. ३-११-६.

मृशेत्त्रिष्टुभा द्वितीयां जगत्या तृतीयामनुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीं यथादेवतमेवाग्निं चिनुते न देवताभ्य आ वृश्चयते वसीयान्भवतीडायै वा एषा विभक्तिः पशव इडा पशुयाम् । जगत्या । तृतीयाम् । अनुष्टुभेत्यनु—स्तुभा । चतुर्थीम् । पङ्क्त्या । पञ्चमीम् । यथादेवतमिति यथा—देवतम् । एव । अग्निम् । चिनुते । न । देवताभ्यः । एति । वृश्चयते । वसीयान् । भवति । [3]इडायै । वै । एषा । विभक्तिरिति वि—भक्तिः । पशवः । इडा । पशुभिरिति पशु—भिः । एनम् ॥ १ ॥ चिनुते । [4]यः । वै । प्रजापतय इति

जगत्येति । 'मेधाकारं विदथस्य'* इति । अनुष्टुभेति 'मनुष्वत्वा निधीमहि'* इति । पङ्क्त्येति 'अग्निर्हि वाजिनं विशे'* इति ॥

[3]इडायै वा एषेति ॥ इडा पशवः 'पशवो वा इडा'† इति पशुनामैषा । विभक्तिर्विभागः गायत्र्यादि, 'पशवो वै छन्दांसि'‡ इति पशुसाधनत्वात् । तस्माद्गायत्र्यादिभिः चिन्वानो भवति पशुमान् ॥

[4]यो वै प्रजापतय इत्यादि ॥ प्रतिप्रोच्य अनुज्ञाप्य अग्निं

---

*ब्रा. ३-११-६. †सं. २-६-८. ‡सं. ५-३-८.

भिरेनम् ॥ १ ॥ चिनुते यो वै प्र-
जापतये प्रतिप्रोच्याग्निं चिनोति ना-
र्तिमार्छत्यश्वावभितस्तिष्ठेतां कृष्ण
उत्तरतश्श्वेतो दक्षिणस्तावालभ्येष्ट-
का उप दध्यादेतद्वै प्रजापते रूपं
प्राजापत्योश्वस्साक्षादेव प्रजापतये
प्रतिप्रोच्याग्निं चिनोति नार्तिमार्छ-

प्रजा-पतये । प्रतिप्रोच्येति प्रति-प्रोच्य । अग्निम् । चिनोति । न । आर्तिम् । एति । ऋच्छति । [5]अश्वौ । अभितः । तिष्ठेताम् । कृष्णः । उत्तरत इत्युत्-तरतः । श्वेतः । दक्षिणः । तौ । आलभ्येत्या-लभ्य । इष्टकाः । उपेति । दध्यात् । एतत् । वै । प्रजापतेरिति प्रजा-पतेः । रूपम् । प्राजापत्य इति प्राजा-पत्यः । अश्वः । साक्षादिति स-अक्षात् । एव । प्रजापतय इति प्रजा-पतये । प्रति-प्रोच्येति प्रति-प्रोच्य । अग्निम् । चिनोति । न ।

चिन्वानो नार्तिं गच्छति । अन्यथा कुर्वन्नार्तिं गच्छतीत्येवेति ॥

[5]तत्प्रकारमाह—अश्वावित्यादि ॥ अभितः उयभतः । आलभ्य स्पृष्ट्वा प्रजापतेरिदं रूपमश्वत्वेन वर्तते यस्मात् प्राजापत्योश्वः । साक्षादित्यादि । गतम् ॥

त्येतद्वा अह्नो रूपं यच्छ्वेतोश्वो रात्र्यै
कृष्ण एतदह्नः ॥ २ ॥ रूपं यदिष्ट-
का रात्र्यै पुरीषमिष्टका उपधास्य-
च्छ्वेतमश्वमभि मृशेत्पुरीषमुपधास्य-
न्कृष्णमहोरात्राभ्यामेवैनं चिनुते

आर्तिम् । एति । ऋच्छति । [6]एतत् । वै । अह्नः । रूपम् । यत् । श्वेतः । अश्वः । रात्र्यै । कृष्णः । एतत् । अह्नः ॥ २ ॥ रूपम् । यत् । इष्टकाः । रात्र्यै । पुरीषम् । इष्टकाः । उपधास्यन्नित्युप-धास्यन् । श्वेतम् । अश्वम् । अभीति । मृशेत् । पुरीषम् । उपधास्यन्नित्युप-धास्यन् । कृष्णम् । अहोरात्राभ्यामित्यहः-रात्राभ्याम् । एव । एनम् । चिनुते । [7]हिरण्यपात्रमिति हिरण्य-पात्रम् । मधोः ।

---

[6]एतद्वा इत्यादि ॥ श्वेतोश्वोह्नो रूपमेतेन रूपेण अहर्वर्तते रात्र्यै कृष्ण इति । एतद्रात्र्या रूपं यत्कृष्णोश्व इति यावत् । रूपान्तरं च दर्शयति—एतदह्न इति । अह्नो रूपमिष्टकाः रात्र्या रूपं पुरीषम् । तस्मादिष्टकाः उपधास्यन् श्वेतमश्वमभिमृशेत् । पुरीषमुपधास्यन् कृष्णमभिमृशेत् । एवमहोरात्राभ्यामेव अग्निश्चितो भवति ॥

[7]हिरण्यपात्रमिति ॥ गतम् । मधुन इति लिङ्गव्यत्ययः, उभ-

हिरण्यपात्रं मधोः पूर्णं ददाति मध्व्योसानीतिं सौर्या चित्रवत्याऽवेक्षते चित्रमेव भवति मध्यन्दिनेऽश्वमवं घ्रापयत्यसौ वा आदित्य इन्द्रं एष प्रजापतिः प्राजापत्योऽश्वस्तमेव साक्षाद्भ्नोति ॥ ३ ॥

पूर्णम् । ददाति । मधव्यः । असानि । इतिं । सौर्या ।.चित्रवत्येतिं चित्र—वत्या । अवेतिं । ईक्षते । चित्रम् । एव । भवति । [8]मध्यन्दिने । अश्वम् । अवेतिं । घ्रापयति । असौ । वै । आदित्यः । इन्द्रः । एषः । प्रजापतिरितिं प्रजा—पतिः । प्राजा-

यलिङ्गो वा । 'पूरणगुण' इति समासप्रतिषेधात् षष्ठी ज्ञाप्यते । मधव्य इात । मध्वर्हः मधुपर्कार्हो भवतीत्यनेनाभिप्रायेण हिरण्यपात्रं दद्यात् । मधोरिति । यदेतस्मादपि निर्देशात्पुल्लिङ्गोप्यस्तीति ज्ञायते । सौर्येति । 'चित्रं देवानां'* इति चित्रवत्यः । अवेक्षते प्रागेव दानाद्धिरण्यपात्रमवेक्षते । चित्रमेवेति । प्रजाभिः पशुभिश्च चित्रत्वं यजमानस्य भवति ॥

[8]मध्यन्दिन इति ॥ अह्नो मध्यं मध्यन्दिनम् । द्वितीयं वासरम् । तत्र तत्पात्रमवघ्रापयति । छान्दसं णौ कर्तुः कर्मत्वम् । असौ वा इत्यादि । मध्यन्दिनस्येन्द्रत्वात् इन्द्रादित्ययोरभेदस्तुतिः । अश्वस्य प्राजापत्यत्वात् प्रजापत्यश्वयोरभेदस्तुतिः । तमेवाह—प्राजापत्योश्व इति ।

*सं. २-४-१४.

त्वामग्ने वृषभं चेकितानं पुनर्युवानं
जनयन्नुपागाम् । अस्थूरिणो गार्-
पत्य इति प्राजा-पत्यः । अश्वः । तम् । एव ।
साक्षादिति स-अक्षात् । ऋध्नोति ॥ ३ ॥

एनमेतदद्वोष्टाचत्वारिꣳशच्च ॥ १ ॥

[1]त्वाम् । अग्ने । वृषभम् । चेकितानम् । पुनः।
युवानम् । जनयन् । उपागामित्युप-आगाम् ।

तमेव प्रजापतिं साक्षादव्यवधानेन ऋध्नोति ऋद्धिमन्तं करोति यद्-
श्वेनाघ्रापयतीति ॥

इति पञ्चमे सप्तमे प्रथमोनुवाकः.

---

[1]चित्याश्चित्यामृषभमुपदधाति—त्वामग्न इति त्रिष्टुभा ॥ हे अग्ने त्वां वृषभं वर्षितारं कामानां चेकितानं सर्वस्य ज्ञातारम् । कित ज्ञाने, लुगन्तः । छान्दसस्य लिटः कानजादेशः । ईदृशं त्वां युवानं जनयन् प्रजार्थं कुर्वन् । हेतौ शतृप्रत्ययः । पुनःपुनरुपागां आभिमुख्येनोपगच्छामि । छान्दसो लुङ्, 'गतिर्गतौ' इति पूर्वो गतिर्निहन्यते । अस्थूरि अस्थूरीणि असारवन्ति अनोवहनसामर्थ्यं स्थौल्यं सारत्वं, तद्रहितानि । 'सुपां सुलुक्' इति शेर्लुक् 'शेश्छन्दसि' इति हेर्लोपे दीर्घत्वं स्यात् । ईदृशानि गार्हपत्यानि गृहपतितुल्यानि स्वामिभावाः नः अस्माकं सन्तु । छान्दसं सांहितिकं णत्वम् । यथोक्तं प्रातिशाख्ये—'षु-

हंपत्यानि सन्तु तिग्मेनं नो ब्रह्मणा
सꣳ शिंशाधि । पशवो वा एते य-
दिष्टंकाश्चित्यांचित्यामृषभमुपं दधा-
ति मिथुनमेवास्य तद्यज्ञे करोति
प्रजनंनाय तस्मांद्यूथेयूंथ ऋषभः ।

अस्थूरि । नः । गारहंपत्यानीति गारहं—पत्यानि । सन्तु । तिग्मेनं । नः । ब्रह्मणा । सामितं । शि-शाधि । [2]पशवंः । वै । एते । यत् । इष्टंकाः । चि-त्यांचित्यामिति चित्यां—चित्याम् । ऋषभम् । उ-पेतं । दधाति । मिथुनम् । एव । अस्य । तत् । यज्ञे । करोति । प्रजनंनायेतं प्र—जनंनाय । त-

---

षूक्रधिसुवस्सामिन्द्रास्थूरि '* इति । किञ्च—तिग्मेन ब्रह्मणा ब्रह्म-वर्चसेन .नः अस्मान् संशिशाधि सम्यक् शितान् कुरु । यद्वा—ब्रह्मणा अध्ययनादिना कर्मणा संशितव्रतात् कुरु । श्यते-र्लेटि 'बहुलं छन्दसि' इति शपश्लुः, इत्वं चाभ्यासस्य 'वा छन्दसि' इति इत्वप्रतिषेधेन ङित्त्वाभावात् 'ङितश्च' इति इग-भावः ॥

[2]अथात्रैव ब्राह्मणम्—पशवो वा इत्यादि ॥ गतम् । तस्मादि-त्यादि । तस्मादिदानीं यूथेयूथे ऋषभः सञ्चरति । 'अनुदात्तं च' इति द्वितीयो निहन्यते ॥

---

*७-२.

संवथ्सरस्य प्रतिमां यां त्वा रात्र्यु-
पासते । प्रजाꣳ सुवीरां कृत्वा वि-
श्वमायुर्व्यश्नवत् । प्राजापत्याम् ॥४॥
एतामुप दधातीयं वावैषैकाष्टका य-

स्मात् । यूथेयूथ इति यूथे—यूथे । ऋषभः । [3]संवत्सरस्येति संवत्सरस्य । प्रतिमामिति प्रति—माम् । याम् । त्वा । रात्रि । उपासत इत्युप—आसते । प्रजामिति प्र—जाम् । सुवीरामिति सु—वीराम् । कृत्वा । विश्वम् । आयुः । वीति । अश्नवत् । [4]प्राजापत्यामिति प्राजा—पत्याम् ॥ ४ ॥ एताम् । उपेति । दधाति । इयम् । वाव । एषा ।

[3]प्राजापत्यामिष्टकां उपदधाति—संवत्सरस्येत्यनुष्टुभा ॥ हे रात्रि एकाष्टके । 'कृदिकारादक्तिनः' इति ङीष् । संवत्सरस्य प्रतिमां प्रतिनिधिम् । 'एतस्यां वा एष एतां रात्रिं वसति'* इति वचनात्संवत्सरतुल्यां यां त्वां सर्वेऽप्युपासते त्वा त्वां कृत्वा उपधाय प्रजां सुवीरां शोभनपुत्रादिकां यजमानो विश्वं चायुः पुरुषायुषं व्यश्नवत् प्राप्नोति । अश्नोतेर्लेटि व्यत्ययेन परस्मैपदं, 'लेटोडाटौ' इत्यडागमः । 'शात्' इति प्रतिषेधं बाधित्वा व्यत्ययेन नकारस्य णकारः 'वीरवीर्यौ च' इति सुवीरे उत्तरपदाद्युदात्तत्वम् ॥

[4]अत्रैव ब्राह्मणम्—प्राजापत्यामित्यादि ॥ इयमेव पृथिवी । एषा

*सं. ७-४-८.

दैवैकाष्टकायामन्नं क्रियते तदेवैत-
याऽवं रुन्ध एषा वै प्रजापतेः का-
मदुघा तयैव यजमानोऽमुष्मिन्लो-
केऽग्निं दुहे येन देवा ज्योतिषोर्ध्वा
उदायन् येनादित्या वसवो येन रु-

एकाष्टकेत्येक—अष्टका । यत् । एव । एकाष्टकाया-
मित्येक—अष्टकायाम् । अन्नम् । क्रियते । तत् ।
एव । एतया । अवेति । रुन्धे । [5]एषा । वै । प्र-
जापतेरिति प्रजा—पतेः । कामदुघेति काम—दुघा ।
तया । एव । यजमानः । अमुष्मिन्न् । लोके । अ-
ग्निम् । दुहे । [6]येन । देवाः । ज्योतिषा । ऊर्ध्वाः ।
उदायन्नित्युत्—आयन्न् । येन । आदित्याः । वसवः ।

एकाष्टका रात्रिः । तस्माद्यदेवान्नं अष्टकादिकं एकाष्टकायां क्रि-
यते तदेतया इष्टकया अवरुन्धे । अन्नाधारत्वादस्याः सर्वान्नाधार-
पृथिवीत्वेन स्तुतिः कृता ॥

[5]एषा वा इत्यादि ॥ प्रजापतेः सर्वान् कामान् एषा दुग्ध-
वती । तस्मादियं प्राजापत्येति भावः । 'दुहः कब्घश्च' इति
कप्रत्ययः । यस्मादेवं तस्माद्यजमानोपि अमुष्मिन्न् भोगस्थाने अग्निं
दुहे दुग्धे सर्वान्कामान् । 'लोपस्त आत्मनेपदेषु' इति तलोपः ॥

[6]उख्यमुपसमिन्धे—येन देवा इत्यादित्रिष्टुभा ॥ येन ज्योति-
षा दीप्त्या देवा ऊर्ध्वमायन् ऊर्ध्वगतय उदायन् गताः स्वर्गि-

द्राः । येनाङ्गिरसो महिमानंमान-
शुस्तेनैतु यजंमानस्स्वास्ति । सुव-
र्गाय वा एष लोकायं ॥ ५ ॥ ची-
यते यदग्निर्येनं देवा ज्योतिषोर्ध्वा
उदायन्नित्युख्य॰ सिमिन्ध इष्टंका ए-
वैता उपं धत्ते वानस्पत्यास्सुंवर्गस्यं

येनं । रुद्राः । येनं । अङ्गिरसः । महिमानंम् । आ-
नशुः । तेनं । एतु । यजंमानः । स्वस्ति । सुव-
र्गायेतिं सुवः—गायं । वै । एषः । लोकायं ॥ ५ ॥
चीयते । यत् । अग्निः । येनं । देवाः । ज्योतिंषा ।
ऊर्ध्वाः । उदायन्नित्युंत्—आयन्न् । इतिं । उख्यंम् ।
समितिं । इन्धे । इष्टंकाः । एव । एताः । उपेतिं ।
धत्ते । वानस्पत्याः । सुवर्गस्येतिं सुवः—गस्यं ।

णोऽभवन् । येन चादित्या वसवो रुद्राश्च ऊर्ध्वा उदायन्न् येन ज्योतिषाऽङ्गिरसो महिमानं महत्त्वमानशुः प्राप्ताः । अश्नोतेर्व्यत्ययेन परस्मैपदम्, 'अश्नोतेश्च' इति नुट् । तेन ज्योतिषा यजमानोपि स्वस्ति अविनाशं स्थानमेतु, अविनाशं वा स्थानमविघ्नेन गच्छतु ॥

[7]अथात्रैव ब्राह्मणम्—सुवर्गायेत्यादि ॥ गतम्* । इष्टका एवेति । वानस्पत्या इष्टका एता उपधत्ते । याभिस्समिद्भिरुपसमि-

---

*सं. ५-६-८.

लोकस्य समष्टयै शतायुधाय श-
तवीर्याय शतोतयेऽभिमातिषाहे ।
शतं यो नश्शरदो अजीतान्निन्द्रो ने-
षदति दुरितानि विश्वा । ये चत्वा-

लोकस्य । समष्टया इति सं–अष्टयै । [8]शतायुधा-
येति शत–आयुधाय । शतवीर्यायेति शत–वीर्या-
य । शतोतय इति शत–ऊतये । अभिमातिषाह
इत्यभिमाति–साहे । शतम् । यः । नः । शरदः ।
अजीतान् । इन्द्रः । नेषत् । अतीति । दुरितानी-

न्धे तत्सुवर्गस्य समष्टयै प्राप्तयै भवति । 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् ॥

[8]अज्यानीरुपदधाति—शतायुधायेत्याद्याः पञ्च सर्वास्त्रिष्टुभः ॥ य इन्द्रः शतं शरदो वत्सरान्नः अस्मान् । अजीतान् अक्षीणान् व्याध्यादिभिः अपीडितान् । ज्या वयोहानौ, ग्रहिज्यादिना सं-प्रसारणम् । यद्वा—अजितान् । छान्दसं दीर्घत्वं जयतेः । नेषत् नेतुं समर्थं अर्हो वा । विश्वानि दुरितानि अतीत्य वि-निवार्य नेतुं य एव समर्थः । नयतेर्लेटि 'सिब्बहुलं लेटि' इति सिप अडागमः । तस्मै शतायुधाय बह्वायुधाय (बहुलं लाय) शतोतये बहुरक्षणाय अभिमातिषाहे पापानामभिभवित्रे । 'छन्दसि सहः' इति ण्विः, सुषामादित्वात् षत्वम् । चतुर्थी-सामर्थ्यात् न इत्यध्याह्रियते ॥

रंः पथयों देवयानां अन्तरा द्यावा-
पृथिवी वियन्तिं । तेषां यो अज्यां-

तिं दुः—इतानिं । विश्वां । [9]ये । चत्वारंः । पथयंः। देवयाना इतिं देव—यानाः । अन्तरा । द्यावांपृथिवी इति द्यावां—पृथिवी । वियन्तीतिं वि—यन्तिं । तेषांम् । यः । अज्यांनिम् । अजींतिम् । आवहा-

---

[9]अथ द्वितीया—ये चत्वार इति ॥ देवयाना देवैः [1]प्राप्यन्ते यैः तादृशाः ये चत्वारः पथयः पन्थानः । छान्दसो नलोपः । द्यावापृथिवी अन्तरा द्यावापृथिव्योर्मध्ये । 'अन्तराऽन्तरेण' इति द्वितीया, 'दिवो द्यावा' इति द्यावादेशः 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । 'देवताद्वन्द्वे च' इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् । वियन्ति विविधं गच्छन्ति । 'यङ्लुक्तान्नित्यम्' इति निघाते प्रतिषिद्धे 'तिङि चोदात्तवति' इति गतेरनुदात्तत्वम् । केचिदाहुः—चत्वार आश्रमाः गार्हस्थ्यमाचार्यकुलं मौनं [2]वानप्रस्थमिति चत्वारः पन्थान उच्यन्त इति । अन्य आहुः—देवपितृमनुष्ययानस्थानमार्गास्त्रयः ब्रह्मलोकमार्ग एक इति चत्वारो मार्गा इति । तेषां मार्गाणां सामर्थ्यात् तैर्मा गैर्गच्छतामस्माकं; यथा लोके अनुपद्रवोऽयं पन्था इत्युक्तौ गन्तृणामेवानुपद्रवो गम्यते। अज्यानिं अनुपक्षयम् । 'ग्लाम्लाज्याहाभ्यो निः' इति निः। अजींतिं अपराभवं शत्रूणामजितत्वम्। जयतेः छान्दसं दीर्घत्वम्। य आवहात् मर्यादया वहति नयति । लेट्याडागमः । हे देवाः सर्वेऽपि यूयं कस्मै देवाय नः अस्मान् परिदत्त रक्षार्थं

निमर्जीतिमावहात्तस्मै नो देवाः
॥ ६ ॥ परि दत्तेह सर्वे । ग्रीष्मो
हैमन्त उत नो वसन्तश्शरद्वर्षा-
स्सुवितं नो अस्तु । तेषामृतूनाꣳ

दित्या—वहात् । तस्मै । नः । देवाः ॥ ६ ॥ परी-
तिं । दत्त । इह । सर्वे । [10]ग्रीष्मः । हेमन्तः । उ-
त । नः । वसन्तः । शरत् । वर्षाः । सुवितम् ।
नः । अस्तु । तेषाम् । ऋतूनाम् । शतशारदाना-

दत्त । यथा सोस्मान् रक्षति तथा सर्वेऽपि यूयं अनुजानीत इह अस्मिन्कर्मणि । निमित्तात् सप्तमी । अनेन कर्मणा हेतु-नेति यावत् ॥

[10]अथ तृतीया—ग्रीष्मो हेमन्त इति ॥ हेमन्तग्रहणेन शिशिरस्यापि ग्रहणं, तयोरेकत्वात् 'पञ्च वा ऋतवः'* इति । यथा एते ग्रीष्मादयः अस्माकं सुवितं शोभनगतिहेतवः सूतिहे-तवो वा भवन्तु । प्रत्येकविवक्षया एकवचनम् । क्रमविशे-षाश्रयणे कारणं चिन्त्यम् । शोभनमितं सुवितं शोभना गतिः । तन्वादित्वादुवङ् । विनादित्वादनवग्रहः । पक्षान्तरे छान्दस इ-डागमः । किञ्च—शतशारदानां तेषामृतूनां शतसंवत्सराणां शत-संवत्सरसम्बन्धिनाम् । शरच्छब्दात् संवत्सरवचनात् स्वार्थिकोण् । यद्वा—शरदि संवत्सरे भवाः परिवत्सरादयः शारदाः । तेन बहु-व्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । निवाते वातरहिते अभये भया-

---

*सं. ७-२-६.

शतशारदानां निवात एषामभये स्याम । इदुवत्सरायं परिवत्सरायं संवत्सरायं कृणुता बृहन्नमः । तेषां

मितं शत-शारदानाम् । निवात इतं नि-वाते । एषाम् । अभये । स्याम । [11]इदुवत्सरायेतींदु-वत्स-रायं । परिवत्सरायेतं परि-वत्सरायं । संवत्सरा-येतं सं-वत्सरायं । कृणुत । बृहत् । नमः । ते-षाम् । वयम् । सुमतावितं सु-मतौ । यज्ञियां-

---

भावे स्याम एधि कृतं [अविकृतं] यदभयं भवति निवृत्तं यत्र वातोपि स्पन्दितुं न शक्नोति तत्र वयं स्याम वर्तेमहि । 'नेर-निधाने' इति निवाते उत्तरपदान्तोदात्तत्वम् । अभये अव्ययपूर्वपद-प्रकृतिस्वरत्वम्, एषामित्यन्वादेशोनुदात्तः ॥

[11]अथ चतुर्थी—इदुवत्सरायेति ॥ इदुवत्सरस्तृतीयः । परिवत्सरो द्वितीयः । संवत्सरो वर्तमानः । अत्र द्वितीयतृतीययोः 'संपरि-पूर्वाच्च' इति सरच्प्रत्ययः । अत्रोपपदविधानात् । कृदुत्तरपद-प्रकृतिस्वरत्वम् । अथवा—इद्वत्सरशब्दे अव्ययपूर्वपदप्रकृतिस्व-रत्वम् । अत्र व्यत्ययेन 'नञ् कुनिपातानाम्' इति वचनात् अव्ययपूर्वपदप्रकृतिस्वराभावे सामासान्तोदात्तत्वमेव । एभ्यो बृह-न्नमः नमस्कारं कृणुत कुरुत । 'धिन्विकृण्व्योरच' इत्युप्र-त्ययः 'अन्येषामपि दृश्यते' इति संहितायां दीर्घत्वम् । किं प्रयोजनमित्याह—तेषामिति । यथा तेषां यज्ञियानां यज्ञसंपादना-

वयꣳ सुमतौ यज्ञियानां ज्योगजीता
अहतास्स्याम। भद्रान्नꣳश्रेयस्समनैष्ट
देवास्त्वयाऽवसेन समशीमहि त्वा।
स नो मयोभूः पितो॥७॥ आ वि-

नाम्। ज्योक्। अजीताः। अहताः। स्याम। [12]भद्रात्। नः। श्रेयः। समिति। अनैष्ट। देवाः। त्वया। अवसेन। समिति। अशीमहि। त्वा। सः। नः। मयोभूरिति मयः—भूः। पितो इति॥

र्हणां सुमतौ शोभनमतौ अनुग्रहे वयं स्याम पात्रं भवेम तथा नमस्कुरुतेति। अनुग्रहफलं दर्शयति—ज्योगजीता इति। केन चिदप्यपराजिता अहताः अनुपहिंसिता यथा भवेम तथा तेषां सुमतौ स्याम इति। सुमतौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्॥

[12]अथ पञ्चमी—भद्रादिति॥ हे देवाः भद्रात् कल्याणात् अस्माद्वर्तमानात् श्रेयः प्रशस्यतरं भद्रं अस्मभ्यं समनैष्ट सम्यगनयत। छान्दसो लुङ्। हे सोम त्वया अवसेन रक्ष्येण भक्ष्यमाणेन यथा त्वां समशीमहि सम्यग्व्याप्नुयामः पुनःपुनः तव पातारः स्याम 'बहुलं छन्दसि' इति अश्नोतेः शपो लुक्। अत्रावसश्रुतेः सोम आमन्त्र्यत इति गम्यते। स त्वं हे पितो अन्नभूतः मयोभूः मयसस्सुखस्य भावयिता स नः अस्मानाविशास्व अस्माकं शरीरं प्रविश। व्यत्ययेनात्मनेपदम्। तोकाय शं

शस्व शं तोकायं तनुवें स्योनः ।
अज्यांनीरेता उपं दधात्येता वै दे-
वता अपंराजितास्ता एव प्र विंश-
ति नैव जींयते ब्रह्मवादिनों वद-
न्ति यदंर्धमासा मासां ऋतवस्संव-

७ ॥ एतिं । विशस्व । शम् । तोकायं । तनुवें ।
स्योनः । [13]अज्यांनीः । एताः । उपेतिं । दधाति ।
एताः । वै । देवताः । अपंराजिता इत्यपं-राजि-
ताः । ताः । एव । प्रेतिं । विशति । न । एव ।
जीयते । [14]ब्रह्मवादिन इतिं ब्रह्म-वादिनः । वद-
न्ति । यत् । अर्धमासा इत्यर्ध-मासाः । मासाः ।

दुःखशान्तिहेतुः । अपत्याय तनुवे अस्मच्छरीराय च स्योनः सुखो भूत्वा अस्मानाविशेति ॥

[13]अथास्य ब्राह्मणम्—अज्यानीः इत्यादि ॥ 'तेषां यो अज्यानिं'* इति लिङ्गसमवायात् पञ्चाप्यज्यानय उच्यन्ते । एता इति । एते इन्द्रादयः केनचिदप्यपराजिताः । ता एवेति । तासामुपधाता ता एवानुप्रविश्य तद्भावापन्नः केन चिदपि न जीयते ॥

[14]इदानीमाग्रयणे अज्यानिहोमविधानार्थमाह—ब्रह्मवादिन इत्यादि ॥ अर्धमासादय ओषधीनां पाकहेतवः । अथ कस्मात्कारणात् अन्याभ्यः इन्द्राग्नचादिभ्यः आग्रयणं हविर्निरुप्यत इति

*सं. ५-७-२[१].

थ्सर ओषधीः पचन्त्यथ कस्मादन्याभ्यो देवताभ्य आग्रयणं निरुप्यत इत्येता हि तद्देवता उदजयन् यद्दतुभ्यो निर्वपेद्देवताभ्यस्समदं दध्यादाग्रयणं निरुप्यैता आहुतीर्जु-

ऋतवः । संवत्सर इति सं—वत्सरः । ओषधीः । पचन्ति । अथ । कस्मात् । अन्याभ्यः । देवताभ्यः । आग्रयणम् । निरिति । उप्यते । इति । एताः । हि । तत् । देवताः । उदजयन्नित्युत्—अजयन् । यत् । ऋतुभ्य इत्यृतु—भ्यः । निर्वपेदिति निः—वपेत् । देवताभ्यः । समदमिति स—मदम् । दध्यात् । आग्रयणम् । निरुप्येति निः—उप्य । ए-

---

ब्रह्मवादिनः पर्यनुयोगमाहुः । अत्रोत्तरं केचिद्ब्रुवते—एता हीति । इन्द्राग्न्यादयो देवताः तत् तदा उदजयन् । 'सुपां सुलुक्' इति । 'देवा वा ओषधीष्वाजिमयुः । ता इन्द्राग्नी उदजयताम्'* इति । तस्मादेतासां देवतानां स्वभूता ओषधयः । अर्धमासादयस्तु तासां पाकमात्रे व्याप्रियन्त इति । एवं स्थिते यद्दतुभ्यो निर्वपेत् आग्रयणं देवताभ्यस्समदं कलहं दध्यात् उत्पादयेत् । यथाऽन्यस्यान्यस्मै दानं कलहमुत्पादयति । तस्मादिन्द्राग्न्यादिभ्य

---

*ब्रा. १-६-१.

होत्यर्धमासानेव मासानृतून्थ्संव-
थ्सरं प्रीणाति न देवताभ्यस्समदं
दधाति भद्रान्नश्श्रेयस्समनैष्ट देवा
इत्याह हुताद्यायै यजमानस्यापरा-
भावाय ॥ ८ ॥

ताः । आहुतीरित्या—हुतीः । जुहोति । अर्धमा-
सानित्यर्ध—मासान् । एव । मासान् । ऋतून् । सं-
वत्सरमिति सं—वत्सरम् । प्रीणाति । न । देवता-
भ्यः । समदमिति स—मदम् । दधाति । [15]भद्रात् ।
नः । श्रेयः । समिति । अनैष्ट । देवाः । इति ।
आह । हुताद्यायेति हुत—अद्याय । यजमानस्य ।

एव आग्रयणं निर्वपेदिति गम्यते । एवमिन्द्राग्नचादिभ्य आग्र-
यणं निरुप्य एता अज्यानीराहुतीर्जुहोति अर्धमासादीनां तृ-
प्त्यर्थमिति विधिर्गम्यते । तदेवाह—अर्धमासानित्यादिना । न
देवताभ्य इति । आत्मीयेन हविषा तृप्तत्वात् । अग्रस्यायन-
मिति 'पूर्वपदात्संज्ञायाम्' इति णत्वम्, शकन्ध्वादित्वात्पररूप-
त्वम् । सान्नाय्यानुजावरादिना स्वार्थिकोन् । सह माद्यन्त्यस्यामिति
समत्संग्रामः ॥

[15]भद्रान्न इति ॥ मन्त्रपदव्याख्या । हुतादनं हुताद्यम् । छा-
न्दसो भावे यत्, कृदुत्तरपदप्रकृतिस्वरत्वम् । 'यतोऽनावः'

इन्द्रस्य वज्रोसि वार्त्रघ्नस्तनूपा नः
प्रतिस्पशः । यो नः पुरस्ताद्दक्षिण-
अपराभावायेत्यपरा—भावाय ॥ ८ ॥

प्राजापत्यां लोकाय देवाः पितो दध्यादाग्र-
यणं पञ्चविꣳशतिश्च ॥ २ ॥

[1]इन्द्रस्य । वज्रः । असि । वार्त्रघ्न इति वार्त्र—
घ्नः । तनूपा इति तनू—पाः । नः । प्रतिस्पश इ-

इत्याद्युदात्तत्वम् । यजमानभागभक्षणविधिर्गम्यते, ' त्वयाऽवसेन '* इति मन्त्रलिङ्गात् अपराभावाय तद्भवतीति ॥

इति पञ्चमे सप्तमे द्वितीयोनुवाकः.

[1]वज्रिणीरुपदधाति—इन्द्रस्य वज्रोसीति ॥ अयमेव मन्त्रः प्रतिदिशं पुरस्ताद्दक्षिणतः पश्चादुत्तरत इति । दिशिदिशि विशेषः ' यो नः पुरस्तादभिदासति ' ' यो नो दक्षिणतोभिदासति ' इत्यादि । तेनैताश्चतस्रः पथ्याः, ' तृतीयश्चेद्द्वादशाक्षरः पथ्या ' इति हे इष्टके इन्द्रस्य वज्रोसि । व्याख्यातम्† । सा त्वं नोस्माकं तनूपाश्शरीरस्य रक्षिता । पातेर्विच् । भवेति शेषः । यद्वा—असीति सम्बध्यते । इन्द्रस्य वज्रोसीति वृत्रहननसाधनं अस्माकं त्वं तनूपा इति प्रतिस्पशः बाधितॄणां बाधिता प्रतीपं बाधकः । स्पश बाधने, पचाद्यच् । वज्रापेक्षया पुल्लिङ्गत्वम् । यो नः पुरस्तात् पूर्वस्यां दिशि अघायुः अघं पापमिच्छन् । ' छन्दसि

*सं. ५-७-२[12]. †सं.१-८-१५.

तः पश्चादुत्तरतोऽघायुरभिदासत्येत्य
सोऽस्मानमूच्छतु । देवासुरास्संय-
त्ता आसन्तेऽसुरा दिग्भ्य आऽबाधन्त
तान्देवा इष्वा च वज्रेण चापानुद-

तिं प्रति–स्पृशः । यः । नः । पुरस्तात् । दक्षिण-
तः । पश्चात् । उत्तरत इत्युत्–तरतः । अघायुरि-
त्यघ–युः । अभिदासतीत्यभि–दासति । एतम् ।
सः । अस्मानम् । ऋच्छतु । [2]देवासुरा इति देव–
असुराः । संयत्ता इति सं–यत्ताः । आसन् । ते ।
असुराः । दिग्भ्य इति दिक्–भ्यः । एति । अबाध-
न्त । तान् । देवाः । इष्वा । च । वज्रेण । च । अ-
पेति । अनुदन्त । यत् । वज्रिणीः । उपदधातीत्यु-
प–दधाति । इष्वा । च । एव । तत् । वज्रेण । च ।

परेच्छायामपि ' इति क्यच् । ' अश्वाघस्यात् ' इत्यात्वम् । ' क्याच्छन्दसि ' इत्युप्रत्ययः । अभिदासति—आभिमुख्येन उप-क्षपयति । छान्दसमात्वम्, विकरणव्यत्ययश्च । यद्वा—ण्यन्ताच्छिटि 'छन्दस्युभयथा' इति शप आर्धधातुकत्वात् णिलोपः । स एंत-मस्माकं व्यापकं इष्टकात्मानं वा पाषाणमृच्छतु अनुप्रविशतु वा, पाषाणीभवत्विति यावत् ॥

[2]अथ तत्रैव ब्राह्मणम्—देवासुरा इत्यादि ॥ आबाधन्त स-

न्त यद्वज्रिणीरुपदधातीष्वा चैव तद्वज्रेण च यजमानो भ्रातृव्यानपं नुदते दिक्षूपं ॥ १ ॥ दधाति देव-पुरा एवैतास्तंनूपानीः पर्यूहतेऽग्नां-विष्णू सजोषसेमा वंर्धन्तु वां गि-

यजमानः । भ्रातृव्यान् । अपेति । नुदते । [3]दिक्षु । उपेतिं ॥ १ ॥ दधाति । देवपुरा इतिं देव—पुराः । एव । [4]एताः । तनूपानीरितिं तनू—पानीः । परीतिं । ऊहते । [4]अग्नांविष्णू इत्यग्नां—विष्णू । सजोषसेतिं स—जोषसा । इमाः । वर्धन्तु । वाम् । गिरः । द्यु-

---

र्वतो दिक्षु बाधितवन्तोसुराः । तानित्यादि । गतम् । यद्वज्रिणी-रिति । 'इन्द्रस्य वज्रोसि' इत्येवमाद्या ॥

[3]दिक्षित्यादि ॥ देवानां पुरो नगराणि देवपुराः । 'ऋक्पू-रब्धूः' इत्यकारस्समासान्तः, परवल्लिङ्गता । शरीररक्षार्था देवपुरा एव पर्यूहते सर्वासु दिक्षु प्रतिष्ठापयति यद्दिक्षु वज्रिणीरुपदधाति ॥

[4]अथ वसोर्धाराहोमविशेषविधित्सया पुनरपि विधित्सन् तन्म-न्त्राग्रगतामृचं स्तोतुं पुनः पठति—अग्नाविष्णू इति ॥ व्याख्या-तेयं चतुर्थे* । अग्नाविष्णू समानप्रीतिकौ युवां अस्मदीया गिरो वर्धयन्तु । युवामपि द्युम्नैः धनैः दीप्तिमद्भिर्वा अन्नैश्च अस्म-भ्यं देयैस्समागच्छतामिति ॥

---

*सं. ४-७-१.

रंः । द्युम्नैर्वाजैंभिरा गंतम् । ब्रह्मवा-
दिनों वदन्ति यन्न देवतायै जुह्वत्य-
थं किंदेवत्यां वसोर्धारेत्यग्निर्वसुस्त-
स्यैषा धारा विष्णुर्वसुस्तस्यैषा धा-
रांऽऽग्नावैष्णव्यर्चा वसोर्धारां जुहो-

म्नैः । वाजैंभिः । एतं । गतम् । [5]ब्रह्मवादिन इतं ब्रह्म–वादिनंः । वदन्ति । यत् । न । देवतायै । जुहोंति । अथं । किंदेवत्येतं किं–देवत्यां । वसोंः । धारां । इतं । अग्निः । वसुंः । तस्यं । एषा । धारां । विष्णुंः । वसुंः । तस्यं । एषा । धारां । आग्नावैष्णव्येत्याग्ना–वैष्णव्या । ऋचा । वसोंः । धारांम् । जुहोति । भागधेयेनेतं भाग–धेयेंन । एव । एनौ ।

[5]ब्रह्मवादिन इत्यादि ॥ इयं वसोर्धारा कस्यैचिद्देवतायै न हूयते । ‘ वाजश्च मे ’* इत्यादौ देवताया अनिर्देशादियं किंदेवत्येति पर्यनुयोगं वदन्ति ब्रह्मवादिनः । जुह्वतीत्यत्र ‘ अभ्यस्तानामादिः ’ इत्याद्युदात्तत्वम् । कस्यै देवतायै इयम् । ‘ देवतान्तात्तादर्थ्ये यत् ’ । तत्रोत्तरं—अग्निरित्यादि । वासहेतुः प्रजानां वसुः अग्निर्विष्णुश्च । तस्माद्वसोर्धारेतिनामधेया देवतां गम्यत इति । तस्मादाग्नावैष्णव्या ‘ अग्नाविष्णू ’* इत्येतयर्चा होमात् ते एव देवते भागधेयेन प्रीणाति । अथो अपि च एतामाहुतिं

*सं. ४-७-१.

ति भागधेयेनैवैनौ समर्धयत्यथो एताम् ॥ १० ॥ एवाहुतिमायतनवतीं करोति यत्काम एनां जुहोति तदेवावरुन्धे रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोराऽन्या शिवाऽन्या यच्छतरुद्रीयं जुहोति यैवास्य घोरा तनूस्तां तेन शमयति यद्वसोसामिति । अर्धयति । अथो इति । एताम् ॥ १० ॥ एव । आहुतिमित्या—हुतिम् । आयतनवतीमित्या-यतन—वतीम् । करोति । यत्काम इति यत्—कामः । एनाम् । जुहोति । तत् । एव । अवेति । रुन्धे । [6]रुद्रः । वै । एषः । यत् । अग्निः । तस्य । एते इति । तनुवौ । घोरा । अन्या । शिवा । अन्या । यत् । शतरुद्रीयमिति शत—रुद्रीयम् । जुहोति । या । एव । अस्य । घोरा । तनूः । ताम् । तेन ।

आयतनवतीं करोति न परदेवतावतीमिति । अन्यथा 'च मे च मे'* इति निगद्य हूयमानेयं कुत्र तिष्ठेत् । तस्मात् यत्कामः यज्जातिकं कामयमान एनां जुहोति देवतालाभात् स्थानलाभात् । 'शीलिकामि' इत्यादिना णः, पूर्वपदप्रकृतिस्वरत्वं च ॥

[6]रुद्रो वा इत्यादि ॥ घोरां क्रुद्धां देवस्य तनुं शतरुद्रीयेण

*सं. ४-७-१.

धारां जुहोति यैवास्य शिवा तनू-
स्तां तेन प्रीणाति यो वै वसोर्धा-
रायै ॥ ११ ॥ प्रतिष्ठां वेद प्रत्येव
तिष्ठति यदाज्यमुच्छिष्येत तस्मि-
न्ब्रह्मौदनं पचेत्तं ब्राह्मणाश्चत्वारः प्रा-
श्नीयुरेष वा अग्निर्वैश्वानरो यद्ब्राह्मण
एषा खलु वा अग्नेः प्रिया तनूर्यद्वैश्वा-

शमयति । यत् । वसोः । धाराम् । जुहोति । या ।
एव । अस्य । शिवा । तनूः । ताम् । तेन । प्री-
णाति । यः । वै । वसोः । धारायै ॥ ११ ॥ प्रति-
ष्ठामिति प्रति–स्थाम् । वेद । प्रतीति । एव । तिष्ठति ।
[7]यत् । आज्यम् । उच्छिष्येतेत्युत्–शिष्येत । तस्मि-
न् । ब्रह्मौदनमिति ब्रह्म–ओदनम् । पचेत् । तम् ।
ब्राह्मणाः । चत्वारः । प्रेति । अश्नीयुः । एषः । वै ।
अग्निः । वैश्वानरः । यत् । ब्राह्मणः । एषा । ख-
लु । वै । अग्नेः । प्रिया । तनूः । यत् । वैश्वानरः ।

'नमस्ते रुद्र मन्यवे '* इत्येतेन शमयति शिवां प्रागेव शान्तां तनुं वसोर्धारया प्रीणयतीति । यो वा इत्यादि । गतम् ॥

[7]उच्छिष्येत अतिरिच्येत ब्राह्मणेभ्यो देयमोदनं ब्रह्मौदनम् । प्रियायामेवेति । अग्नेः प्रियशरीरभूते वैश्वानरात्मनि ब्राह्मण इ-

---

*सं. ४-५-१.

नरः प्रियायामेवैनां तनुवां प्रतिष्ठा-
पयति चतस्रो धेनूर्दद्यात्ताभिरेव य-
जमानोऽमुष्मिन्लोकेऽग्निं दुहे ॥ १२ ॥
चित्तिं जुहोमि मनसा घृतेनेत्या-

प्रियायाम् । एव । एनाम् । तनुवाम् । प्रतीतिं । स्थापयति । [8]चतस्रः । धेनूः । दद्यात् । ताभिः । एव । यजमानः । अमुष्मिन्न् । लोके । अग्निम् । दुहे ॥ १२ ॥

उपैतां धारायै षड्त्वारिꣳशच्च ॥ ३ ॥

[1]चित्तिम् । जुहोमि । मनसा । घृतेन । इति ।

त्यर्थः । तत्रेयमाहुतिः प्रतिष्ठाप्यते यत् ब्राह्मणा ब्रह्मौदनं प्राश्नन्ति इयं वै वसोर्धारा प्रतिष्ठेति ॥

[8]चतस्र इति ॥ भुक्तवद्भ्यो ब्राह्मणेभ्यः । ताभिरेवेति । ताभिः धेनुभिः वत्सस्थानीयाभिः अमुष्मिन् लोके भोगस्थाने अग्निं दुहे गोस्थानीयं दुग्धे कामान् दुहे । 'लोपस्त आत्मनेपदेषु' इति तलोपः ॥

इति पञ्चमे सप्तमे तृतीयोनुवाकः.

[1]चित्तिं जुहोमीति ॥ 'चित्तिं जुहोमि'* इत्यनया ऋचा या वैश्वकर्मणी स्रुवमातृण्णायां होतव्येति पूर्वमुक्ता एषाऽऽहुतिरदाभ्यानाम

*सं. ५-५-४.

हादाम्या वै नामैषाऽऽहुतिर्वैश्वकर्म-
णी नैनं चिक्यानं भ्रातृव्यो दभ्नो-
त्यथो देवता एवाव रुन्धेऽग्ने तम-
द्येति पङ्क्त्या जुहोति पङ्क्त्याऽऽहुत्या

आह । अदाम्या । वै । नाम । एषा । आहुतिरि-
त्या-हुतिः । वैश्वकर्मणीति वैश्व-कर्मणी । न ।
एनम् । चिक्यानम् । भ्रातृव्यः । दभ्नोति । अथो
इति । देवताः । एव । अवेति । रुन्धे । [2]अग्ने ।
तम् । अद्य । इति । पङ्क्त्या । जुहोति । पङ्क्त्या ।
आहुत्येत्या-हुत्या । यज्ञमुखमिति यज्ञ-मुखम् ।

वेदितव्या। इदानीं नामधेयानि ब्रूते । नैनमिति । एतदाहुतिविशिष्टमग्निं चिक्यानं चितवन्तं यजमानं भ्रातृव्यं शत्रुं न दम्नोति नाभिभवति । तस्मात् दम्यन्ते नम्यन्ते अनयेति करणे कृत्यः 'दमेश्चेति-वक्तव्यम्' इति । दम्भिः प्रकृत्यन्तरमस्तीत्याहुः । अर्थो अपि-च देवता अवरुन्धे च 'यथा देवा इहागमन्'* इति मन्त्रलिङ्गात् । चिनोतेः लिटः कानच्, 'विभाषाञ्चेः' इति कुत्वम् ॥

[2]'अग्ने तमद्य'† इत्यक्षरपङ्क्त्या होमः कर्तव्यः । उक्तं तस्याः पङ्क्तित्वमत्र स्तूयते । प्रयोजनं चेते.....पाङ्क्तत्वाद्यज्ञस्य पङ्क्त्याऽऽन-याऽऽहुतिकरणेन हेतुना यज्ञमुखमुपक्रममारभत इति । आरभ्य यज्ञत्वमस्य क्रियत इति ॥

---

*सं. ५-५-४. †सं. ४-४-४.

यज्ञमुखमा रंभते सप्त ते अग्ने स-
मिधस्सप्त जिह्वा इत्याह होत्रा ए-
वाव रुन्धेऽग्निर्देवेभ्योपाक्रामद्भाग-
धेयम् ॥ १३ ॥ इच्छमानस्तस्मा ए-
तद्भागधेयं प्रायच्छन्नेतद्वा अग्नेरग्नि-
होत्रमेतर्हि खलु वा एष जातो य-

एतं । रभते । [3]सप्त । ते । अग्ने । समिध इतिं सं–इधः । सप्त । जिह्वाः । इतिं । आह । होत्राः । एव । अवेतिं । रुन्धे । [4]अग्निः । देवेभ्यः । अपे-तिं । अक्रामत् । भागधेयमितिं भाग–धेयम् ॥ १३ ॥ इच्छमानः । तस्मै । एतत् । भागधेयमितिं भाग–धेयम् । प्रेतिं । अयच्छन् । एतत् । वै । अ-ग्नेः । अग्निहोत्रमित्यग्नि–होत्रम् । एतर्हि । खलु ।

---

[3]सप्त त इत्यादि ॥ 'सप्ते अग्ने'* इत्यनया अग्निहोत्रहोमः कर्तव्यः । तत्प्रयोजनं होतृणामृत्विजां लोलः सप्तहोत्र इति लिङ्गात् ॥

[4]अग्निर्देवेभ्य इति ॥ गतमेतत्† । एतद्वा इति । यस्मादेवं तस्मादेतमग्निहोत्रमग्नेरेव स्वं देवैस्तथा कृतत्वात् । एतर्हीत्यादि । अस्मिन्काले एषोग्निर्जातो भवति । यर्हि यदा सर्वश्चितो भवति । तस्माज्जातायान्नप्रदानसममिदमग्निहोत्रमिति । स एनमित्यादि । गतम् ॥

---

*सं. ४- ६-५. †सं. ५-४-७.

रहि सर्वश्चितो जातायैवास्मा अन्न-
मपि दधाति स एनं प्रीतः प्रीणाति
वसीयान्भवति ब्रह्मवादिनो वदन्ति
यदेष गार्हपत्यश्चीयतेऽथ क्वास्याह-
वनीय इत्यसावादित्य इति ब्रूया-
देतस्मिन् हि सर्वाभ्यो देवताभ्यो

वै । एषः । जातः । यर्हि । सर्वः । चितः । जा-
तायं । एव । अस्मै । अन्नम् । अपीति । दधाति ।
सः । एनम् । प्रीतः । प्रीणाति । वसीयान् । भव-
ति । [5]ब्रह्मवादिन इति ब्रह्म—वादिनः । वदन्ति ।
यत् । एषः । गार्हपत्य इति गार्हं—पत्यः । चीय-
ते । अथ । क्व । अस्य । आहवनीय इत्या—हवनी-
यः । इति । असौ । आदित्यः । इति । ब्रूयात् । एत-

---

[5]ब्रह्मवादिन इत्यादि ॥ यत् यद्येवमेष गार्हपत्यश्चीयते अग्नेरेव होमात् अथेदानीं क्वास्य भवति यः यत्र देवताभ्यो हूयत इति ब्रह्मवादिन आहुः । अत्रोत्तरमित्थं ब्रूयादित्याह—असावादित्य इति । अथाहवनीयत्वं समर्थयते—एतस्मिन्हीति । यत् सर्वाभ्यो देवताभ्यः हुतं तदेतस्मिन् तिष्ठतीति । यथा—अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते इति । तस्मात्स एवाहवनीयो भवतीति । य एवमित्यादि । गतम् ॥

जुह्वति ॥ १४ ॥ य एवं विद्वानग्निं चिनुते साक्षादेव देवता ऋध्नोत्यग्ने यशस्विन् यशसेममर्पयेन्द्रावतीमपचितीमिहा वह। अयं मूर्धा परमेष्ठी सुवर्चास्समानानामुत्तमश्लोको

स्मिन्न्। हि। सर्वाभ्यः। देवताभ्यः। जुह्वति॥१४॥ यः। एवम्। विद्वान्। अग्निम्। चिनुते। साक्षादिति सं—अक्षात्। एव। देवताः। ऋध्नोति। [6]अग्ने। यशस्विन्। यशसा। इमम्। अर्पय। इन्द्रावतीमिन्द्रं—वतीम्। अपचितीमित्यप—चितीम्। इह। एति। वह। अयम्। मूर्धा। परमेष्ठी। सुवर्चा इति सु—वर्चाः। समानानाम्। उत्तमश्लोक इत्युत्तम—

[6]अथ राष्ट्रभृत उपदधाति—अग्ने यशस्विन्नित्याद्याश्चतस्रः सर्वाः त्रिष्टुभः, प्रथमा जगती वा ॥ तत्र प्रथमां—हे अग्ने यशस्विन् इमं यजमानं यशसा अर्पय प्रापय। 'नामन्त्रिते समानाधिकरणे' इति पूर्वस्यामन्त्रितस्य अविद्यमानत्वाभावः। इन्द्रावतीं इन्द्रयोग्यां अपचितीं पूजां इह अस्मिन्कर्मणि आवह आनय इन्द्रयोग्यां पूजां यथाऽयं समर्थस्स्यात् तथा कुर्वित्यर्थः। उभयत्रापि वर्णव्यत्ययेन दीर्घत्वम्। किमर्थमित्याह—अयं यजमानः मूर्धा प्रधानभूतः परमे महिम्नि स्थितः। उणादिषु निपात्यते। सुवर्चाः शोभनदीप्तिः। 'सोर्मनसी' इत्युत्तरपदाद्युदात्तत्वम्। स-

अस्तु । भद्रं पश्यन्त उपसेदुरग्रे तपो दीक्षामृषयस्सुवर्विदः । ततः क्षत्रं बलमोजश्च जातं तदस्मै देवा अभि सं नमन्तु । धाता विधाता परमा ॥ १५ ॥ उत संदृक्प्रजापतिः

श्लोकः । अस्तु । [7]भद्रम् । पश्यन्तः । उपेतिं । सेदुः । अग्रे । तपः । दीक्षाम् । ऋषयः । सुवर्विद इतिं सुवः—विदः । ततः । क्षत्रम् । बलम् । ओजः । च । जातम् । तत् । अस्मै । देवाः । अभि । सामितिं । नमन्तु । [8]धाता । विधातेतिं वि—धाता । परमा ॥ १५ ॥ उत । संदृगितिं सं—दृक् । प्रजापतिरितिं प्रजा—पतिः ।

मानानां समानजातानां मध्ये उत्तमश्लोकः उत्तमकीर्तिश्चास्तु एवमर्थं इति । उत्तमशब्द उञ्छादिरन्तोदात्तः ॥

[7]अथ द्वितीया—भद्रमिति ॥ भद्रं कल्याणं फलं पश्यन्तः शास्त्रदृष्ट्या विचिन्वानाः तपश्च उपसद्लक्षणं दीक्षां चाग्रे उपसेदुः उपासाञ्चक्रिरे ऋषयः सुवर्विदः परमसुखज्ञाः । ततश्च तेषां क्षत्रं धनं बलं सामर्थ्यं ओजो दीप्तिश्च जातं भद्रं उत्पादितं तद्भद्रमस्मै यजमानाय देवा अभिसन्नमन्तु आभिमुख्येनानयन्तु ॥

[8]अथ तृतीया—धातेति ॥ धाता धारकः विधाता विधारकः परमो रक्षितः परमस्रष्टा उत अपि च परमात्मा संदृक्

परमेष्ठी विराजा । स्तोमाश्छन्दाꣳ-
सि निविदो म आहुरेतस्मै राष्ट्रम्-
भि सं नमाम । अभ्यावर्तध्वमुप-
मेत साकमयꣳ शास्ताऽधिपतिर्वो
अस्तु । अस्य विज्ञानमनु सꣳ रभ-

परमेष्ठी । विराजेति वि—राजा । स्तोमाः । छन्दाꣳसि । निविद इति नि—विदः । मे । आहुः । एतस्मै । राष्ट्रम् । अभि । सामिति । नमाम । [1]अभ्यावर्तध्वमित्यभि—आवर्तध्वम् । उपेति । मा । एत । इत । साकम् । अयम् । शास्ता । अधिपतिरित्य-

---

उत्तमो द्रष्टा अचितदर्शिः [अवितथदर्शी] परमेश्वरः प्रजापतिः हिरण्यगर्भः परमेष्ठी परमे कारणभावे स्थितः परमात्मा विराजा एकस्त्रष्टा सह स्तोमास्त्रिवृदादयः छन्दांसि गायत्र्यादीनि निविदः शस्त्राणि निविदः पदान्येव वा सर्वाण्येतानि मे आहुः । कथमेतस्मै यजमानाय राष्ट्रं पदसमूहं आभिमुख्येन संनमामेति राष्ट्रस्याभिसन्नमने आभिमुख्यं भजतामित्यर्थः ॥

[1]अथ चतुर्थी—अभ्यावर्तध्वमिति ॥ मनुष्या उच्यन्ते । अभ्यावर्तध्वं आभिमुख्येनास्माकमागच्छतम् । उपरक्ताः परागच्छत । 'गत्तिर्गतौ' इति प्रथमो गतिः अनुदात्तः । तेन पृथक् पदत्वाभावः । सर्वेऽपि साकं सम्भूय ऐकमत्यं गता मामुपेत उपगच्छत । धातूपसर्गसंयोगे कृते 'ओमाङोश्च' इति पररूपत्वम् । इदमुच्यध्वे—वः युष्माकं अयं यजमानः शास्ता अधिपतिश्चास्तु । 'ग्रसितस्कभित' इत्यादौ शास्तेति इडभावो निपात्यते । इदं

ध्वमिमं पश्चादनु जीवाथ सर्वे ।
राष्ट्रभृत एता उप दधात्येषा वा
अग्नेश्चितीं राष्ट्रभृत्तयैवास्मिन्राष्ट्रं द-
धाति राष्ट्रमेव भवति नास्माद्राष्ट्रं
भ्रꣳशते ॥ १६ ॥

धिं—पतिः । वः । अस्तु । अस्य । विज्ञानमिति
वि—ज्ञानम् । अनु । सामिति । रभध्वम् । इमम् ।
पश्चात् । अन्विति । जीवाथ । सर्वे । [10]राष्ट्रभृत इति
राष्ट्र—भृतः । एताः । उपेति । दधाति । एषा । वै ।
अग्नेः । चितिः । राष्ट्रभृदिति राष्ट्र—भृत् । तया । ए-
व । अस्मिन् । राष्ट्रम् । दधाति । राष्ट्रम् । एव ।
भवति । न । अस्मात् । राष्ट्रम् । भ्रꣳशते ॥१६॥
भागधेयं जुह्वति परमा राष्ट्रं दधाति सप्त च ॥४॥

चाप्युच्यध्वे—अयमप्यस्य यजमानस्य विज्ञानमनुसंरभध्वं यथाऽनेन विज्ञातं तथाऽनुसरन्तः कर्माण्यारभध्वम् । पश्चादिमं जीवन्तमनुजीवाथ सर्वेऽपि यद्ययं जीवति ततो यूयं जीवथ । तस्मादिमं जीवन्त-मनुजीवतेति । लेट्याडागमः ॥

[10]अथासां ब्राह्मणम्—राष्ट्रभृत इत्यादि ॥ एषेति । एषा राष्ट्रमेवेति विधेयीकृतराष्ट्रतां दर्शयितुं ताच्छब्द्यम् । तदारभ्य नास्मात् राष्ट्रं भ्रंशत इति ॥

इति पञ्चमे सप्तमे चतुर्थोनुवाकः.

यथा वै पुत्रो जातो म्रियतं एवं वा
एष म्रियते यस्याग्निरुख्यं उद्वायंति
यान्निर्मन्थ्यं कुर्याद्विच्छिन्द्याद्भ्रातृव्य-
मस्मै जनयेथ्स एव पुनः परीध्य-
स्स्वादेवैनं योनेर्जनयति नास्मै भ्रा-

[1]यथा । वै । पुत्रः । जातः । म्रियतं । एवम् । वै । एषः । म्रियते । यस्य । अग्निः । उख्यः । उद्वायंतीत्युत्–वायंति । [2]यत् । निर्मन्थ्यंमिति निः–मन्थ्यम् । कुर्यात् । वीति । छिन्द्यात् । भ्रातृव्यम् । अस्मै । जनयेत् । सः । एव । पुनः । परीध्य इति परि–इध्यः । स्वात् । एव । एनम् ।

---

[1]यथा वै पुत्र इत्यादि ॥ यथा जातः परिनिष्पन्नः पुत्रो महादुःखहेतुर्म्रियते एवं महादुःखहेतुरेष उख्यो म्रियते गम्यते म्रियमाण इव दुःखहेतुत्वाज्जात इत्युच्यते । कस्य दुःखहेतुरित्याह—यस्येति । तस्मात्तदवधानेन रक्ष्य इति । पै ओ वै शोषणे॥

[2]इदानीं प्रमादादनुगते प्रायश्चित्तमाह—यदि निर्मन्थ्येदग्निं विच्छिन्द्यात् पूर्वमन्यस्य परिग्रहात् भ्रातृव्यं च यजमानस्य जनयेत्, स एव पूर्वोत्पादित उख्यः परीध्यः । किमुक्तं भवति—यथा पूर्वमुत्पादितं तथैवोत्पाद्य परीध्यः प्रवर्ध्य इत्यर्थः । ततश्च स्वादेव योनेः पूर्वस्मात्कारणात् उखाया आहवनीयाच्च

तृ॰व्यं जनयति तमो वा एतं गृह्णा-
ति यस्याग्निरुख्यं उद्वायंति मृत्यु-
स्तमः कृष्णं वासः कृष्णा धेनुर्द-
क्षिणा तमसा ॥ १७ ॥ एव तमो
मृत्युमप हते हिरण्यं ददाति ज्यो-
तिर्वै हिरण्यं ज्योतिषैव तमोप ह-
तेऽथो तेजो वै हिरण्यं तेज एवा-

योनेः । जनयति । न । अस्मै । भ्रातृ॰व्यम् । ज-
नयति । [3]तमः । वै । एतम् । गृह्णाति । यस्य ।
अग्निः । उख्यः । उद्वायतीत्युत्-वार्यति । मृत्युः ।
तमः । कृष्णम् । वासः । कृष्णा । धेनुः । दक्षि-
णा । तमसा ॥ १७ ॥ एव । तमः । मृत्युम् । अ-
पेति । हते । हिरण्यम् । ददाति । ज्योतिः । वै ।
हिरण्यम् । ज्योतिषा । एव । तमः । अपेति । हते ।
अथो इति । तेजः । वै । हिरण्यम् । तेजः । एव ।

एनं जनयति । ततश्च स एवायमिति विद्येत दोषाभावः । भ्रा-
तृव्यं च यजमानस्य न जनयेदिति ॥

[3]तमो वा इत्यादि ॥ गतम् । एतमिति । नीयमानम् । तम-
सैवेति । कृष्णधेनुदानव्याजेन मृत्युमेवापहन्तीति । ज्योति-
षैवेति । तद्विपक्षेण हिरण्येन ज्योतिषा तमोनिवारणं करोति ।

त्मन्धत्ते सुवर्न घर्मस्स्वाहा सुवर्ना-
र्कस्स्वाहा सुवर्न शुक्रस्स्वाहा सुवर्न
ज्योतिस्स्वाहा सुवर्न सूर्यस्स्वाहाऽ-
र्को वा एष यदग्निरसावादित्यः॥१८
अश्वमेधो यदेता आहुतीर्जुहोत्यं-

आत्मन्। धत्ते। [4]सुवः। न। घर्मः। स्वाहा। सुवः। न। अर्कः। स्वाहा। सुवः। न। शुक्रः। स्वाहा। सुवः। न। ज्योतिः। स्वाहा। सुवः। न। सूर्यः। स्वाहा। [5]अर्कः। वै। एषः। यत्। अग्निः। असौ। आदित्यः॥१८॥
अश्वमेध इत्यश्व—मेधः। यत्। एताः। आहुती-

अथो अपि च तेजोरूपहिरण्यप्रदानेन तेजस्वित्वमात्मनः करोति नित्यम्॥

[4]स्रुवाहुतीरभिजुहोति उद्घातप्रायश्चित्तार्थं च—सुवर्नेत्याद्याः पञ्च॥ सुवरादित्यः स इवायं घर्मः दीप्तिशीलोग्निः तस्मै स्वाहुतमिदमस्तु। उपमार्थीयो नकारः। प्रातिशाख्ये 'क्रुधिसुवः.....पूर्वः'* इति नियमाग्णत्वाभावः। एवमुत्तरे द्रष्टव्याः। अर्कः अर्चनीयः। शुक्रः निर्मलः। ज्योतिः तेजोरूपः सूर्यः सावकः प्रेरको वा। 'राजसूयसूर्य' इत्यत्र निपात्यते॥

[5]अत्रैव ब्राह्मणम्—अर्को वा इत्यादि॥ यावेतावेतेषु जन्तुषूपमानोपमेयभूतावग्न्यादित्यौ निर्दिष्टौ तावर्काश्वमेधौ। प्रशस्तशब्दा-

---

*७—२.

र्काश्वमेधयोरेव ज्योतीꣳषि सं दधा-
त्येष ह त्वा अर्काश्वमेधी यस्यैतद्ग्नौ
क्रियत आपो वा इदमग्रे सलिल-
मासीत्स एतां प्रजापतिः प्रथमां
चितिमपश्यत्तामुपाधत्त तदियमभ-

रित्या—हुतीः। जुहोति। अर्काश्वमेधयोरित्यर्क—अश्वमेधयोः। एव। ज्योतीꣳषि। संमितिं। दधाति। एषः। ह। तु। वै। अर्काश्वमेधीत्यर्क—अश्वमेधी। यस्य। एतत्। अग्नौ। क्रियते। [6]आपः। वै। इदम्। अग्रे। सलिलम्। आसीत्। सः। एताम्। प्रजापतिरिति प्रजा—पतिः। प्रथमाम्। चितिम्। अपश्यत्। ताम्। उपेति। अधत्त। तत्। इयम्। अभवत्।

भिधानं प्राशस्त्यार्थम्। तस्मादाभिराहुतिभिः सर्वाणि ज्योतींषि अर्काश्वमेधयोरग्न्यादित्ययोः लोकस्थित्यर्थं संदधाति। एष इत्यादि। एष वाऽर्काश्वमेधी यस्यैतत् कर्म क्रियत इति पृथक् सोमविधानार्थं पुनर्वचनम्॥

[6]आपो वा इत्यादि॥ व्याख्यातम्* । इतःप्रभृति पञ्चचितिवाक्यशेष आन्तादनुवाकस्य। स एतामित्यादि। गतम्। इयमिति। पृथिवी तं प्रजापतिं पृथिव्यां सुखमासीनं विश्वकर्मा (प्रीतिमे)

---

*सं. ५-६-४.

वत्तं विश्वकर्माऽब्रवीदुप त्वाऽऽया-
नीति नेह लोकोस्तीति ॥ १९ ॥
अब्रवीथ्स एतां द्वितीयां चितिमप-
श्यत्तामुपाधत्त तदन्तरिक्षमभवथ्स
यज्ञः प्रजापतिमब्रवीदुप त्वाऽऽया-

तम् । विश्वकर्मेति विश्व—कर्मा । अब्रवीत् । उपे-
ति । त्वा । एति । अयानि । इति । न । इह ।
लोकः । अस्ति । इति ॥ १९ ॥ अब्रवीत् । सः ।
एताम् । द्वितीयाम् । चितिम् । अपश्यत् । ताम् ।
उपेति । अधत्त । तत् । अन्तरिक्षम् । अभवत् । सः ।
यज्ञः । प्रजापतिमिति प्रजा—पतिम् । अब्रवीत् ।
उपेति । त्वा । एति । अयानि । इति । न । इह ।

अब्रवीत्—उप त्वाऽऽयानि त्वामुपगच्छामि इतः सलिलात् तव समीपं पृथिवीभूतमाश्रयानीति । धातूपसर्गयोरेकादेश उदात्तः । अथ प्रजापतिः विश्वकर्माणमब्रवीत्—तव लोके इह स्थानं इह मत्समीपे नास्तीति अन्तरिक्षस्य अभावात्ततस्स विश्वकर्मा स्वमहिम्ना एतां द्वितीयां चितिमपश्यत्, उपाधत्त च ताम् । तदन्तरिक्षमभवत् । स तत्र सुखमास्त । अथ यज्ञः प्रजापतिमब्रवीत्—उप त्वाऽऽयानीति । अथ प्रजापतिस्तमब्रवीत्—नेह लोकस्तवास्तीति दिशामभावात्; त्वं हि दिगधीनात्मलाभ इति । अथ प्रजापतिं मुक्त्वा यज्ञो विश्वकर्माणमब्रवीत्—उपत्वाऽऽयानीति । अथ विश्वकर्मा यज्ञमब्रवीत्—केन

नीति नेह लोकोऽस्तीत्यब्रवीथ्स विश्वकर्माणमब्रवीदुप त्वाऽऽयानीति केन मोपैष्यसीति दिश्याभिरित्यब्रवीत्तं दिश्याभिरुपैत्ता उपाधत्त ता दिशः ॥ २० ॥ अभवन्थ्स परमेष्ठी

लोकः । अस्ति । इति । अब्रवीत् । सः । विश्वकर्माणमिति विश्व—कर्माणम् । अब्रवीत् । उपेति । त्वा । एति । अयानि । इति । केन । मा । उपैष्यसीत्युप—ऐष्यसि । इति । दिश्याभिः । इति । अब्रवीत् । तम् । दिश्याभिः । उपैदित्युप—ऐत् । ताः । उपेति । अधत्त । ताः । दिशः ॥ २० ॥ अभवन् । सः । प-

---

सह मामुपैष्यसि मामुपगमिष्यसीति । धातूपसर्गयोः 'एत्येधत्यूठ्सु' इति वृद्धिः एकादेश उदात्तः, तस्यान्तादिवद्भावेन आङ्ग्रहणेन ग्रहणात् 'ओमाङोश्च' इति पररूपत्वं प्राप्तं न व्यत्ययेन क्रियते । क्रियतां वा पररूपत्वं न कश्चिद्रूपभेदः, अन्तवद्भावेन वा एतिग्रहणेन ग्रहणात् 'एत्येधत्यूठ्सु' इति पुनरपि वृद्धिः प्रवर्तते ॥

[7]अथ यज्ञो विश्वकर्माणमब्रवीत्—दिश्याभिरिष्टकाभिः सह त्वामुपेष्यामीति ॥ दिक्शब्दवता मन्त्रेणोपधेया इष्टका दिश्याः 'राज्ञ्यसि प्राची दिक्'* इत्याद्याः । 'तद्धानासाम्' इति यत् ।

*सं. ४-४-२.

प्रजापतिमब्रवीदुप त्वाऽऽयानीति नेह लोकोस्तीत्यब्रवीथ्स विश्वकर्मा-णं च यज्ञं चाब्रवीदुप वामाऽयानीति नेह लोकोस्तीत्यब्रूताꣳ स एतां तृ-तीयां चितिमपश्यत्तामुपाधत्त तद्-

रमेष्ठी । प्रजापतिमिति प्रजा–पतिम् । अब्रवीत् । उपेति । त्वा । एति । अयानि । इति । न । इह । लोकः । अस्ति । इति । अब्रवीत् । सः । विश्व-कर्माणमिति विश्व–कर्माणम् । च । यज्ञम् । च । अब्रवीत् । उपेति । वाम् । एति । अयानि । इति । न । इह । लोकः । अस्ति । इति । अब्रूताम् । सः । एताम् । तृतीयाम् । चितिम् । अपश्यत् । ताम् । उपेति । अधत्त । तत् । असौ । अभवत् ।

अथ तदनुज्ञातः यज्ञो दिश्याभिः सहोपैत् उपागच्छत् । वृद्धित्र-याद्यः एकादेश उदात्तः, पूर्ववत्प्रथमस्य गतेरनुदात्तत्वम् । अथ ता उपाधत्त यज्ञस्ता दिशोऽभवन् । ततो दिश्याभिर्यज्ञः सुखमासत । अथ परमेष्ठी ब्रह्मा प्रजापतिं विश्वात्मानमब्रवीत्—उप त्वाऽऽयानीति । नेहेत्यब्रवीत् प्रजापतिः ऊर्ध्वलोकाभावात् । अथ परमेष्ठी विश्व-कर्माणं यज्ञं चाब्रवीत् उप वामाऽऽयानीति युवामुपगच्छामीति। नेहेत्य-ब्रूतां तौ । स तृतीयां चितिं दृष्ट्वा उपाधत्त । स द्यौरभवत् ॥

सार्वभव्थ्स आदित्यः प्रजापतिम-
ब्रवीदुप त्वा ॥ २१ ॥ आऽयानीति
नेह लोकोस्तीत्यब्रवीथ्स विश्वक-
र्माणं च यज्ञं चाब्रवीदुप वामाऽया-
नीति नेह लोकोस्तीत्यब्रूताꣳ स
परमेष्ठिनमब्रवीदुप त्वाऽऽयानीति

[8]सः। आदित्यः। प्रजापतिमिति प्रजा–पतिम्। अब्र-
वीत्। उपेति। त्वा ॥ २१ ॥ एति। अयानि।
इति। न। इह। लोकः। अस्ति। इति। अब्रवीत्।
सः। विश्वकर्माणमिति विश्व–कर्माणम्। च। य-
ज्ञम्। च। अब्रवीत्। उपेति। वाम्। एति। अया-
नि। इति। न। इह। लोकः। अस्ति। इति। अब्रू-
ताम्। सः। परमेष्ठिनम्। अब्रवीत्। उपेति।
त्वा। एति। अयानि। इति। केन। मा। उपै-
ष्यसीत्युप–ऐष्यसि। इति। लोकंपृणयेति लो-

---

[8]अथादित्यः प्रजापतिमब्रवीत्—उप त्वाऽऽयानीति ॥ नेहेति सो-
ब्रवीत् । स आदित्यः प्रजापतिं मुक्त्वा यज्ञं च विश्वकर्माणं चा-
ब्रवीत् उप वामाऽयानीति । नेहेति तावप्यब्रूताम् । अथ परमेष्ठिनमब्र-
वीत्—उप त्वाऽयानीति । अथ परमेष्ठी केन मोपैष्यसीत्यादित्यमब्र-
वीत् । अथ लोकंपृणयेति सोब्रवीत् । उपैत् लोकंपृणया ।

केन॑ मोपैष्य॒सीति॑ लोकंपृ॒णयेत्यब्र॒-
वीत्तं लोकंपृ॒णयोपैत्तस्मा॒दया॑तयाम्नी
लोकं पृ॒णाऽया॑तयामा॒ ह्यसौ ॥२२॥
आ॒दि॒त्यस्तानृष॑योऽब्रुव॒न्नुप॑ व॒ आऽ-
या॒मेति॒ केन॑ न॒ उपै॑ष्य॒थेति॑ भूम्ने-

कं—पृणया॑ । इति॑ । अब्रवीत् । तम् । लो॒कं॒पृ॒ण-
येति॑ लोकं—पृणया॑ । उपै॑दित्युप—ऐत् । [9]तस्मा॑त् ।
अया॑तयाम्नीत्यया॑त—याम्नी । लो॒कं॒पृ॒णेति॑ लोकं—
पृणा । अया॑तया॒मेत्यया॑त—या॒मा । हि । अ॒सौ ॥
२२ ॥ आ॒दि॒त्यः । तान् । ऋष॑यः । अ॒ब्रु॒व॒न् । उ-
पेति॑ । व॒ः । एति॑ । अया॑म । इति॑ । केन॑ । न॒ः ।
उपै॑ष्य॒थेत्युप—ऐष्य॑थ । इति॑ । भूम्ना । इति॑ । अ-
ब्रु॒व॒न् । तान् । द्वाभ्या॑म् । चिति॑भ्या॒मिति॒ चिति॑—

तस्मादादित्येनानीतत्वात् अयातयाम्नी पुनःपुनरुपधीयमानाऽपि कदाचिदप्यशक्तिं न प्रतिपद्यते, यथा पुनःपुनरुद्यन्नप्यादित्यः ॥

[9]अयातयाम्नीति ॥ 'अन उपधालोपिनः' इति ङीप् । तानित्यादि । तान् प्रजापतिविश्वकर्मयज्ञपरमेष्ठचादित्यान् ऋषयोऽब्रुवन् उप व आऽयामेति । केन नोस्मानुपैष्यथेति प्रजापत्यादयोऽब्रुवन् । भूम्नेत्यब्रुवन् ऋषयः । बहुत्वं भूमा वृद्धिः । 'बहोर्लोपो भू च बहोः' । ततस्ते द्वाभ्यां चितीभ्यामुपायन् प्रजापत्या-

त्यंब्रुवन्तान्द्वाभ्यां चितीभ्यामुपाय-
न्थ्स पञ्चचितीकस्सम्पद्यत य एवं
विद्वानग्निं चिनुते भूयानेव भवत्य-
भीमान्लोकाञ्जयति विदुरेनं देवा
अथो एतासामेव देवतानाꣳ सायु-
ज्यं गच्छति ॥ २३ ॥

भ्याम् । उपायन्नित्युप–आयन्न् । सः । पञ्चचिती-
क इति पञ्च–चितीकः । सम्इति । अपद्यत । [10]य: । एवम् । विद्वान् । अग्निम् । चिनुते । भू-
यान् । एव । भवति । अभीति । इमान् । लो-
कान् । जयति । विदुः । एनम् । देवाः । अथो इ-
ति । एतासाम् । एव । देवतानाम् । सायुज्यम् ।
गच्छति ॥ २३ ॥

तमसाऽऽदित्योऽस्तीति दिशं आदित्यः प्रजाप-
तिमब्रवीदुपं त्वाऽसौ पञ्चचत्वारिꣳशच्च ॥५॥

दीन् सोयमग्निरेवं पञ्चचितीकस्सम्पद्यते । 'चितेः कपि' इति दीर्घः ॥

[10]य एवमित्यादि ॥ विदुषस्स्तुतिः । भूयान् ऋद्धियुक्तः । एतासां प्रजापत्यादीनां सायुज्यं समानयोगत्वं गच्छति ॥

इति पञ्चमे सप्तमे पञ्चमः ॥

वयो वा अग्निर्यदग्निचित्पक्षिणोऽश्नी-
यात्तमेवाग्निमद्यादार्तिमाच्छेत्संवत्स-
रं व्रतं चरेत्संवत्सरꣳ हि व्रतं नाति
पशुर्वा एष यदग्निर् हिनस्ति खलु

[1]वयः । वै । अग्निः । यत् । अग्निचिदित्यग्नि-
चित् । पक्षिणः । अश्नीयात् । तम् । एव । अ-
ग्निम् । अद्यात् । आर्तिम् । एति । ऋच्छेत् । सं-
वत्सरमिति सं-वत्सरम् । व्रतम् । चरेत् । संव-
त्सरमिति सं-वत्सरम् । हि । व्रतम् । न । अती-
ति । [2]पशुः । वै । एषः । यत् । अग्निः । हिनस्ति ।
खलु । वै । तम् । पशुः । यः । एनम् । पुरस्तात् ।

---

[1]वयो वा इत्यादि ॥ श्येनाकारत्वात् पक्षी भवत्यग्निः । तस्मा-
द्यदग्निचित्पक्षिणोश्नीयात् पक्षिणो मांसमश्नीयात् तमेवाग्निमद्यात् ।
तत आर्तिं गच्छेत् म्रियेत । 'उपसर्गाद्धतिधातौ' इति वृद्धिः ।
तस्मात्संवत्सरं न मांसमश्नीयादिति विधिः । यस्मात्संवत्सरविधिर्ना-
त्येति ततस्संवत्सरादूर्ध्वमनुवर्तते । 'ससाधनां क्रियां उपसर्ग
आह्व" इति सोपसर्गक्रियापदमध्याह्रियते । संवत्सरादर्वागेव सर्वव्रतं
प्रवर्तते नाति नोर्ध्वम् ॥

[2]पशुर्वा इत्यादि ॥ लुप्तोपमेयम् । यथा पशुः प्रतिकूलकारिणमा-
भिमुख्येन स्थितं हिनस्ति एवमयमग्निः । यस्मादेवं तस्मात्पशुस-

वै तं पशुर्य एनं पुरस्तात्प्रत्यञ्चमुप-
चरति तस्मात्पश्चात्प्राङुपचर्य आ-
त्मनोऽहिꣳसायै तेजोऽसि तेजो मे
यच्छ पृथिवीं यच्छ ॥ २४ ॥ पृथि-
व्यै मा पाहि ज्योतिरसि ज्योतिर्मे
यच्छान्तरिक्षं यच्छान्तरिक्षान्मा पा-

प्रत्यञ्चम् । उपचरतीत्युप–चरति । तस्मात् । प-
श्चात् । प्राङ् । उपचर्य इत्युप–चर्यः । आत्मनः ।
अहिꣳसायै । [3]तेजः । असि । तेजः । मे । यच्छ ।
पृथिवीम् । यच्छ ॥ २४ ॥ पृथिव्यै । मा । पाहि ।
ज्योतिः । असि । ज्योतिः । मे । यच्छ । अन्तरिक्षम् ।
यच्छ । अन्तरिक्षात् । मा । पाहि । सुवः । असि ।

दृशोयमग्निः तमपि हिनस्ति । कं ? य एनं पुरस्तात् पूर्वस्यां दिशि स्थितः प्रत्यङ्मुखः स प्रत्यञ्चं प्रतिमुखावस्थितमुपचरति आरोहणोपधानप्रोक्षणादिकमस्य करोति । तस्मात्पश्चादपरस्यां दिशि स्थितेन प्राङ्मुखोग्निः उपचर्यः उपचरितव्य इति विधिः । आत्मन एवाहिंसार्थम् । छान्दसो यत् ॥

[3]प्रथममध्यमोत्तमासु चितिषु हिरण्येष्टका उपदधाति—तेजोसीत्याद्याः ॥ तेजोसि तेजोहेतुस्त्वमसि तेजो मह्यं देहि पृथिवीं च यच्छ विधेयां कुरु । पृथिव्यै पृथिवीनिमित्तात् रोगादेः मां पाहि ।

हि सुवंरसि सुवंर्मे यच्छ दिवं यच्छ
दिवो मा पाहीत्याहैताभिर्वा इमे
लोका विधृता यदेता उंपदधात्येषां
लोकानां विधृत्यै स्वयमातृण्णा उं-
पधायं हिरण्येष्टका उपं दधातीमे वै
लोकास्स्वंयमातृण्णा ज्योतिर् हि-

सुवंः । मे । यच्छ । दिवंम् । यच्छ । दिवः । मा । पाहि ।
[4]इतिं । आह । एताभिंः । वै । इमे । लोकाः ।
विधृता इति वि–धृताः । यत् । एताः । उपदधा-
तीत्युंप–दधांति । एषाम् । लोकानांम् । विधृत्या
इति वि–धृत्यै । स्वयमातृण्णा इतिं स्वयं–आतृ-
ण्णाः । उपधायेत्युंप–धायं । हिरण्येष्टका इतिं हि-
रण्य–इष्टकाः । उपेतिं । दधाति । इमे । वै । लो-
काः । स्वयमातृण्णा इतिं स्वयं–आतृण्णाः । ज्यो-

पञ्चम्यर्थे चतुर्थी, 'उदात्तयणः' इंति तस्या उदात्तत्वम् । एवमुत्तरौ व्याख्येयौ । तेजः कीर्तिः । ज्योतिः दीप्तिः । सुव-स्सुखम् ॥

[4]अत्रैव ब्राह्मणम्—इत्याहेंति ॥ एताभिः हिरण्येष्टकाभिः इमे लोकाः विधृताः एतासामुपधानेनेत्यर्थः ॥

रण्यं यथ्स्वयमातृण्णा उपधायं ॥ २५ ॥ हिरण्येष्टका उपदधातीमानेवैताभिर्लोकाञ्ज्योतिष्मतः कुरुतेऽथो एताभिरेवास्मा इमे लोकाः प्र भान्ति यास्ते अग्ने सूर्ये रुचं उद्यतो दिवमातन्वान्तिं रश्मिभिः । ताभि-

तिः । हिरण्यम् । [5]यत् । स्वयमातृण्णा इति स्वयं–आतृण्णाः । उपधायेत्युप–धायं ॥ २५ ॥ हिरण्येष्टका इति हिरण्य–इष्टकाः । उपदधातीत्युप–दधाति । इमान् । एव । एताभिः । लोकान् । ज्योतिष्मतः । कुरुते । अथो इति । एताभिः । एव । अस्मै । इमे । लोकाः । प्रेति । भान्ति । [6]याः । ते । अग्ने । सूर्ये । रुचः । उद्यत इत्युत्–यतः । दिवम् । आतन्वन्तीत्या–तन्वन्ति । रश्मि-

---

[5]यदित्यादि ॥ गतम् । अथो इति । एताभिरिष्टकाभिः ज्योतिष्मन्तः कृता लोका अस्मै यजमानाय प्रकर्षेण भान्ति ॥

[6]अथ तिस्रः ऋचः—यास्ते अग्ने इत्याद्याः ॥ प्रथमाद्वितीये 'ध्रुवाऽसि'* इत्यत्र व्याख्याते । सर्वा अनुष्टुभः प्रथमा कृतिर्नामानुष्टुप् । तत्र प्रथमा—उद्यतस्तव सूर्ये स्थिता याः रुचः

---

*सं. ४-२-९.

स्सर्वाभी रुचे जनाय नस्कृधि ।
या वो देवास्सूर्ये रुचो गोष्वश्वेषु
या रुचः । इन्द्राग्नी ताभिस्सर्वाभी
रुचं नो धत्त बृहस्पते । रुचं नो धे-
हि ॥ २६ ॥ ब्राह्मणेषु रुचꣳ राजसु
नस्कृधि । रुचं विश्येषु शूद्रेषु मयि

भीरिति रश्मि-भिः । ताभिः । सर्वाभिः । रुचे ।
जनाय । नः । कृधि । याः । वः । देवाः । सूर्ये ।
रुचः । गोषु । अश्वेषु । याः । रुचः । इन्द्राग्नी इ-
न्द्र-अग्नी । ताभिः । सर्वाभिः । रुचम् । नः ।
धत्त । बृहस्पते । रुचम् । नः । धेहि ॥ २६ ॥
ब्राह्मणेषु । रुचम् । राजस्विति राज-सु । नः ।
कृधि । रुचम् । विश्येषु । शूद्रेषु । मयि । धेहि ।

दिवं रश्मिभिः व्याप्तामातन्वन्ति ताभिस्सर्वाभिः रश्मिभिः नो यजमानाय दीप्तिं कुरु ॥

[7]द्वितीया—हे देवा या वः सूर्ये स्थिताः सूर्यनिबन्धना रुचः गोष्वश्वेषु या रुचः हे इन्द्राग्नी हे बृहस्पते ताभिः सर्वाभिः अस्मभ्यं रुचं धत्त ॥

[8]तृतीया—नः अस्माकं ब्राह्मणेषु रुचं धेहि स्थापय ॥

धेहि रुचा रुचम् । द्वेधा वा अग्निं चिक्यानस्य यशं इन्द्रियं गच्छत्य-ग्निं वा चितमीजानं वा यदेता आ-हुतीर्जुहोत्यात्मन्नेव यशं इन्द्रियं धत्त ईश्वरो वा एष आर्तिमार्तोयोऽग्निं चि-क्यानोधिक्रामति तत्वा यामि ब्रह्म-

रुचा । रुचम् । [9]द्वेधा । वै । अग्निम् । चिक्यान-स्य । यशः । इन्द्रियम् । गच्छति । अग्निम् । वा । चितम् । ईजानम् । वा । यत् । एताः । आहुतीरित्या–हुतीः । जुहोति । आत्मन् । एव । यशः । इन्द्रियम् । धत्ते । [10]ईश्वरः । वै । एषः । आर्तिम् । आर्तोरित्या–अर्तोः । यः । अग्निम् ।

---

[9]अथात्र ब्राह्मणम्—द्वेधा वा इत्यादि ॥ अग्निं चिक्यानस्य चितवतः यश इन्द्रियं च द्वेधा गच्छति तमग्निं वा गच्छति ईजानं वा अनग्निकेन क्रतुना इष्टवन्तं न सर्वथाऽग्निचितम् । उभयत्र लिटः कानजादेशः । तस्मादेताभिः 'यास्ते अग्ने' इत्यादिभिराहुतिभिः यश इन्द्रियं चात्मनि स्थापयति, ततो नान्यं गच्छति ॥

[10]ईश्वरो वा इति ॥ 'ईश्वरे तोसुन्कसुनौ' इति हेतौ शता । चयनेन हेतुना अग्निमतिक्रामति । आरोहति वारुण्या* । उ-

---

*सं. २-१-११.

णा वन्दमान इति वारुण्यर्चा॥२७
जुहुयाच्छान्तिरेवैषाऽग्नेर्गुप्तिरात्मनो
ह्विष्कृतो वा एष योऽग्निं चिनुते
यथा वै ह्विस्स्कन्दत्येवं वा एष स्क-
न्दति योऽग्निं चित्वा स्त्रियमुपैति मै-

चिन्वन्न् । अधिक्रामतीत्यधि–क्रामति । तत् । त्वा । यामि । ब्रह्मणा । वन्दमानः । इति । वारुण्या । ऋचा ॥ २७ ॥ जुहुयात् । शा-न्तिः । एव । एषा । अग्नेः । गुप्तिः । आत्मनः । [1]ह्विष्कृत इति ह्विः–कृतः । वै । एषः । यः । अग्निम् । चिनुते । यथा । वै । ह्विः । स्कन्दति । एवम् । वै । एषः । स्कन्दति । यः । अग्निम् । चि-

---

दात्तमिवृत्तिस्वरेण ङीप उदात्तत्वम्, 'उदात्तयणः' इति विभक्तेः । एषा सञ्चिताहुतिरग्नेश्शान्तिः अधिक्रमणदोषशान्तिहेतुरात्मनश्च गुप्तिः रक्षाहेतुः ॥

[1]ह्विष्कृतो वा इत्यादि ॥ एष ह्विष्कृतः निर्वर्तितहवी-रूप इति यावत् । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् । यद्वा—ह्विष्कृतः कृतह्विः भावप्रधानो ह्विश्शब्दः । 'जाति-कालसुखादिभ्यः परवचनम्' इति परनिपातः । ह्विस्थानीयोऽ-यमग्निश्चिन्वानः तस्मात् ह्विस्कन्दनं यथा दोषवदेवमस्याः स्त्रिया

मैत्रावरुण्याऽऽमिक्षया यजेत मैत्रावरुणतामेवोपैत्यात्मनोऽस्कन्दाय यो वा अग्निमृतुस्थां वेदर्तुरृतुरस्मै कल्पमान एति प्रत्येव तिष्ठति सं-

त्वा । स्त्रियम् । उपैतीत्युप-एति । मैत्रावरुण्येति मैत्रा-वरुण्या । आमिक्षया । यजेत । मैत्रावरुण-तामिति मैत्रा-वरुणताम् । एव । उपेति । एति । आत्मनः । अस्कन्दाय । [12]यः । वै । अग्निम् । ऋतुस्थामित्यृतु-स्थाम् । वेद । ऋतुरृतुरित्यृतुः-ऋतुः । अस्मै । कल्पमानः । एति । प्रतीति । एव । तिष्ठति । [13]संवत्सर इति सं-वत्सरः । वै । अग्निः ।

उपायनम् । तस्मान्मैत्रावरुण्याऽऽमिक्षया यजेतेति विधिः । अनूबन्ध्या-स्थानीयं विधीयते मैत्रावरुणम् । तामिति । मित्रावरुणयोर्भागो मैत्रा-वरुणः । तद्भावमुपैति स्कन्दनम् । ततश्च हुतकल्पत्वात् स्कन्द-नदोषो नास्यात्मनः । यद्वा—स्वार्थिकोऽण्—मित्रावरुणभावमुपैति । ततश्च तद्भावेन स्थितत्वादात्मनः स्कन्दने दोषाप्रसङ्ग इति ॥

[12]यो वा अग्निमित्यादि ॥ ऋतुषु वसन्तादिषु तिष्ठतीत्यृतुस्था। आकारान्तलक्षणः कः । ऋतुरृतुः सर्वः ऋतुः अस्मै यजमानाय कल्पमानः संवर्धमान एति प्रवर्तते । प्रतितिष्ठति यजमानः ॥

[13]संवत्सरो वा इत्यादि ॥ गतम्* ॥

---

*सं. ५-६-१०.

वथ्सरो वा अग्निः ॥ २८ ॥ ऋतु-
स्थास्तस्य वसन्तश्शिरो ग्रीष्मो द-
क्षिणः पक्षो वर्षाः पुच्छꣳ शरदुत्त-
रः पक्षो हेमन्तो मध्यं पूर्वपक्षाश्चि-
तयोऽपरपक्षाः पुरीषमहोरात्राणीष्ट-
का एष वा अग्निर् ऋतुस्था य एवं
वेदर्तुरृतुरस्मै कल्पमान एति प्र-
त्येव तिष्ठति प्रजापतिर्वा एतं ज्यै-

॥ २८ ॥ ऋतुस्था इत्यृतु–स्थाः । तस्य । वस-
न्तः । शिरः । ग्रीष्मः । दक्षिणः । पक्षः । वर्षाः ।
पुच्छम् । शरत् । उत्तर इत्युत्–तरः । पक्षः । हेम-
न्तः । मध्यम् । पूर्वपक्षा इति पूर्व–पक्षाः । चित-
यः । अपरपक्षा इत्यपर–पक्षाः । पुरीषम् । अहो-
रात्राणीत्यहः–रात्राणि । इष्टकाः । एषः । वै । अ-
ग्निः । ऋतुस्था इत्यृतु–स्थाः । यः । एवम् । वेद ।
ऋतुरृतुरित्यृतुः–ऋतुः । अस्मै । कल्पमानः ।
एति । प्रतीति । एव । तिष्ठति । [14]प्रजापतिरिति प्रजा–

[14]प्रजापतिर्वा इत्यादि ॥ एवमृतुस्थां अग्निं ऋतुषु न्यधत्त । गतमन्यत् ॥

इति पञ्चमे सप्तमे षष्ठोनुवाकः.

ष्ठ्यंकामो न्यंधत्त ततो वै स ज्यै-
ष्ठ्यमगच्छद्य एवं विद्वानग्निं चिनुते
ज्यैष्ठ्यमेव गच्छति ॥ २१ ॥
यदाकूताथ्समसुस्रोद्धृदो वा मनसो

पतिः । वै । एतम् । ज्यैष्ठ्यकाम इति ज्यैष्ठ्य-
कामः । नीति । अधत्त । ततः । वै । सः । ज्यै-
ष्ठ्यम् । अगच्छत् । यः । एवम् । विद्वान् । अ-
ग्निम् । चिनुते । ज्यैष्ठ्यम् । एव । गच्छति ॥२१॥

पृथिवीं यच्छ यत्स्वंयमातृण्णा उंपधायं धे-
ह्यृचाऽग्निरग्निं चिनुते त्रीणिं च ॥६॥

[1]यत् । आकूंतादित्या-कूतात् । समसुंस्रोदितिं
सं-असुंस्रोत् । हृदः । वा । मनंसः । वा । सम्भृं-

---

[1]दशाग्निकानि समिष्टयजूंषि जुहोति—यदाकूतादित्यादीनि ॥ आद्याश्चतस्रः त्रिष्टुभः । अन्या अनुष्टुभः । तत्र प्रथमा—आकूतिः संकल्पः प्रत्ययः 'अक्षयं सुखमाप्नवानि' इत्येवंरूपः । हृदयं चित्तं श्रुतिस्मृत्यादि तत्साधनोपायचिन्तनम् । मनः अन्तःकरणं तदनुकूलप्रतिकूलेषु प्रवृत्तिनिवृत्त्यात्मकम् । चक्षुर्ग्रहणेन दशेन्द्रियाणि लक्ष्यन्ते यानि सम्यगनुष्ठानेन अभिमतं लाभं साधयन्ति । एतेष्वाकूत्यादिषु संभृतं एभिः प्रत्ययैः चिरकालविषयीकृतं

वा संभृतं चक्षुषो वा । तमनु प्रेहि सुकृतस्य लोकं यत्र ऋषयः प्रथमजा ये पुराणाः । एतꣳ सधस्थ परि ते ददामि यमावहाच्छेवधिं जा-

तमिति सं–भृतम् । चक्षुषः । वा । तम् । अनु । प्रेति । इहि । सुकृतस्येति सु–कृतस्य । लोकम् । यत्र । ऋषयः । प्रथमजा इति प्रथम–जाः । ये । पुराणाः । [2]एतम् । सधस्थेति सध–स्थ । परीति । ते । ददामि । यम् । आवहादित्या–वहात् । शेव-

---

यदेतेभ्यः समसुस्रोत् स्रुतं सम्यक्परिनिष्पन्नम् । ल्यब्लोपे पञ्चमी । एतानि प्राप्य निष्पन्नं इदानीमिति । स्रुवतेर्लुङि शपश्लुः । तं अभिप्रेतमर्थं अनु लक्षीकृत्य प्रेहि गच्छ । कीदृशीमित्याह—सुकृतस्य लोकं सुकृतफलभोगस्थानं यत्र सुकृतिन एव गच्छन्ति तत् स्थानं गच्छ—हे यजमान । देहपातोत्तरकालमिति सामर्थ्यात् गम्यते । 'सूपमानात्कः' इति सुकृतशब्दोन्तोदात्तः । पुनश्च विशेष्यते—यत्रासते प्रथमजाः नित्याः स्वयम्भुप्रभृतयः ऋषयो द्रष्टारः ये च पुराणाः पूर्वमुक्ता नः पूर्वे वः अस्माकं पित्रादयः तत् स्थानं गच्छेति ॥

[2]अथ द्वितीया—एतामिति ॥ अग्निरामन्त्र्यते—हे अग्ने सधस्थ सहस्थानस्थित पृथिव्यामेतावन्तं कालमनेन सहस्थित । 'सधमाधस्थयोः' इति सहशब्दस्य सधादेशः । इदानीं गच्छते तुभ्य-

तवेदाः । अन्वागन्ता यज्ञपतिर्वो अ-
त्र तꣳ स्म जानीत परमे व्योमन् ।
जानीतादेनं परमे व्योमन्देवास्स-

धिमिति शेव-धिम् । जातवेदा इति जात-वेदाः । अन्वागन्तेत्यनु-आगन्ता । यज्ञपतिरिति यज्ञ-पतिः । वः । अत्र । तम् । स्म । जानीत । परमे । व्योमन्निति वि-ओमन् । [3]जानीतात् । एनम् ।

मेनं यजमानं परिददामि रक्षार्थं तव हस्ते करोमि तत्रापि सहासने स्थातुमिति भावः । रक्षामिदानीं प्रार्थयते—जातवेदाः जातप्रज्ञानः रक्षणोपायज्ञः त्वं शेवधिं निधिस्थानं यमावहात् आवहसि निधिमिव परिगृह्णासि गोपायसि च तं परिददामीति । वहेर्लेटि पुरुषव्यत्ययः, आडागमश्च । इदानीं देवा आमन्त्र्यन्ते—हे देवाः यूयमपि शृणुत अयं यज्ञपतिर्यजमानः वः युष्मानन्वागन्ता युष्मान्गच्छतोन्वागन्ता अनन्तरमेवानुक्रमेण आगमिष्यति । 'न लुट्' इति निघातप्रतिषेधः । 'तास्यनुदात्तेत्' इति लस्सार्वधातुकस्यानुदात्तत्वं, टिलोप उदात्तनिवृत्तिस्वरेण तस्यैवोदात्तत्वं, 'गतिर्गतौ' इति प्रथमस्य गतेरनुदात्तत्वम्, 'तिङि चोदात्तवति' इति द्वितीयस्य 'उदात्तवता तिङा' इति 'गतिमता च' इति द्वयं समस्यते । तत्र परमे व्योम्नि प्रशस्ते निधिलक्षणे च पुण्यलोके युष्मानन्वागन्तारं जानीत प्रविष्टवानयमस्य स्थानमिति तमेनं स्वीकुरुत । स्मेति पादपूरणे, सामप्रतीकत्वं वा द्योतयति ॥

[3]अथ तृतीया—जानीतादिति ॥ हे देवाः प्रथमं तावदेनं परमे

धस्था विद रूपमस्य । यदागच्छात्
॥३०॥ पथिभिर्देवयानैरिष्टापूर्ते कृ-
णुतादाविरस्मै । सं प्र च्यवध्वमनु सं

परमे । व्योमन्निति वि–ओमन्न् । देवाः । सधस्था इति सध–स्थाः । विद । रूपम् । अस्य । यत् । आगच्छादित्या–गच्छात् ॥ ३० ॥ पथिभिरिति प-थि– भिः । देवयानैरिति देव–यानैः । इष्टापूर्ते इतीष्टा–पूर्ते । कृणुतात् । आविः । अस्मै । [4]सम् ।

व्योमन् स्थाने आगतं जानीतात् जानीत 'तस्य तात्' इति तादेशः । अनन्तरं चेह सधस्थाः सहासने स्थातारः अत एव अस्य रूपं विद जानीत कीदृशोयमिति विदितरूपविशेषमेनं कुरुत । 'विदो लटो वा' इत्याकारादेशः । तत्र यद्ययं देव-यानैः पथिभिरागच्छात् आगतस्स्यात् । पूर्ववदाडागमः । ततो-स्मै इष्टापूर्ते इष्टापूर्तफले आविष्कृणुतात् आविष्कृणुत एतदर्थ-मिष्टापूर्ते च गतवान्, ईदृशं च तयोः फलमिति । पूर्ववत्तादे-शः । इष्टं देवेभ्यः । पूर्तं पितृभ्यः । छान्दसं पूर्वपदस्य दीर्घत्वम् । अत्र देवा इति पादादित्वान्न निहन्यते, 'विभाषितं विशेषवचने' इति तस्याविद्यमानवत्त्वनिषेधाद्द्वितीयमामन्त्रितं न नि-हन्यते । 'आमन्त्रितं पूर्वमविद्यमानवत्' इति द्वयोरप्यविद्य-मानवत्त्वात् तेनाख्यातं निहन्यते ॥

[4]अथ चतुर्थी—सं प्र च्यवध्वमिति ॥ व्याख्यातेयं 'अग्निं यु-

प्र यातग्ने पथो देवयानान्कृणुध्वम्।
अस्मिन्थ्सधस्थे अध्युत्तरस्मिन्विश्वे
देवा यजमानश्च सीदत । प्रस्तरेण
परिधिना स्रुचा वेद्या च बर्हिषा ।
ऋचेमं यज्ञं नो वह सुवर्देवेषु गन्त-

प्रेति । च्यवध्वम् । अन्विति । सम् । प्रेति । या-
त । अग्ने । पथः । देवयानानिति देव—यानान् ।
कृणुध्वम् । अस्मिन्न् । सधस्थ इति सध—स्थे ।
अधीति । उत्तरस्मिन्नित्युत्—तरस्मिन्न् । विश्वे ।
देवाः । यजमानः । च । सीदत । [5]प्रस्तरेणेति प्र—
स्तरेण । परिधिनेति परि—धिना । स्रुचा । वेद्या ।

नज्मि'* इत्यत्र । हे अग्ने विश्वे देवाः सर्वे यूयं यजमानश्च इत्थं कृतसंवादा इदानीं संप्रच्यवध्वं सम्यगस्मात् स्थानात् प्रच्चलत । अनन्तरं च संप्रयात सहिता एव गच्छत । गच्छन्तश्च देवयाने-नैव पथः कृणुध्वम् अन्यैः पथिभिः न गन्तव्यम् । एवमस्मिन् सधस्थे सहस्थाने लोके उत्तरस्मिंश्च द्युलोके इदानीं देहपातोत्त-रकालं च सीदत परस्परस्योपकुर्वन्तो वर्तध्वमिति ॥

[5]अथ पञ्चमी—प्रस्तरेणेति ॥ प्रस्तरादिभिः सह इममस्माकं यज्ञं वह प्रापय देवान् देवेष्विति विभक्तिव्यत्ययः । स्रुग्ग्रहणं

---

*सं. ४-७-१३.

वे । यदिष्टं यत्परादानं यद्दत्तं या च दक्षिणा । तत् ॥ ३१ ॥ अग्निर्वैश्वकर्मणस्सुवर्देवेषु नो दधत् । येना सहस्रं वहसि येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे ।

च । बर्हिषा । ऋचा । इमम् । यज्ञम् । नः । वह । सुवः । देवेषु । गन्तवे । [6]यत् । इष्टम् । यत् । परादानमिति परा–दानम् । यत् । दत्तम् । या । च । दक्षिणा । तत् ॥ ३१ ॥ अग्निः । वैश्वकर्मण इति वैश्व–कर्मणः । सुवः । देवेषु । नः । दधत् । [7]येन । सहस्रम् । वहसि । येन । अग्ने । सर्ववेद-

---

पात्राणामप्युपलक्षणम् । ग्रहणमन्त्राणां प्रयोजनं चाह—सुवर्गन्तवे अस्माकं स्वर्गगमनाय । तुमर्थे तवेन् प्रत्ययः ॥

[6]षष्ठी—यदिष्टमिति ॥ यदिष्टं देवेभ्यो दत्तं दर्शपूर्णमासादिषु यत्परादानं नात्यादरेण दत्तं दीनान्धकृपणादिभ्यः यद्दत्तं समीचीनं बहिर्वेदि यागे च दक्षिणा अन्तर्वेदि यद्दत्तं तत् सर्वं वैश्वकर्मणोग्निरस्माकं स्वर्गहेतुर्देवेषु दधत् स्थापयतु स्वर्गसाधनमेव सर्वं करोतु । लेट्याडागमः ॥

[7]सप्तमी—येना सहस्रमिति ॥ .....* ॥

---

*अत्र सप्तममन्त्रस्य भाष्यं अष्टममन्त्रावतारिका च गलिता.

वे । येनाग्ने दक्षिणा युक्ता यज्ञं व-
हन्त्यृत्विजः । तेनेमं यज्ञं नो वह
सुवर्देवेषु गन्तवे । येनाग्ने सुकृतः
पथा मधोर्धारां व्यानशुः । तेनेमं
यज्ञं नो वह सुवर्देवेषु गन्तवे । यत्र
धारा अनपेता मधोर्घृतस्य च याः ।

समिति सर्व—वेदसम् । तेन । इमम् । यज्ञम् । नः । वह । सुवः । देवेषु । गन्तवे । [8]येन । अग्ने । दक्षिणाः । युक्ताः । यज्ञम् । वहन्ति । ऋत्विजः । तेन । इमम् । यज्ञम् । नः । वह । सुवः । देवेषु । गन्तवे । [9]येन । अग्ने । सुकृत इति सु—कृतः । पथा । मधोः । धाराः । व्यानशुरिति वि—आनशुः । तेन । इमम् । यज्ञम् । नः । वह । सुवः । देवेषु ।

---

[8]हे अग्ने येन पथा युक्ता योग्या दक्षिणा यज्ञं च ऋत्विजो वहन्ति । यद्वा—दक्षिणाभिर्युक्तं इत्युभयत्र व्यत्ययः । तेनेत्यादि । गतम् ॥

[9]नवमी—येनाग्ने सुकृत इति ॥ हे अग्ने येन पथा सुकृतः मधोः मधुरस्य धारा व्यानशुः व्याप्नुवन् । व्यत्ययेन परस्मैपदम् । यद्वा—सुकृतः देवाः येन पथा नीताः मधोः मधुरसस्य घृतस्य धारा व्यानशुः व्यश्नवते । छान्दसो लिट् । तेनेत्यादि । गतम् ॥

तदग्निर्वैश्वकर्मणस्सुवर्देवेषु नो दधत् ॥ ३२ ॥

यास्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः । ये ते

गन्तवे । [10]यत्र । धाराः । अनपेता इत्यनप–इताः। मधोः । घृतस्य । च । याः । तत् । अग्निः । वैश्वकर्मण इति वैश्व–कर्मणः । सुवः । देवेषु । नः। दधत् ॥ ३२ ॥

आगच्छात्तह्यानशुस्तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे चतुर्दश च ॥ ७ ॥

[1]याः । ते । अग्ने । समिध इति सं–इधः । यानि । धाम । या । जिह्वा । जातवेद इति जात–

---

[10]दशमी—यत्रेति ॥ यत्र पथि मधोः घृतस्य च या धारा अनपेताः तत्र लोके देवेषु स्थापयतु किं मधोः घृतस्य च धाराः अनुपक्षीणा देवयोग्याश्च करोत्वित्यर्थः ॥

इति पञ्चमे सप्तमे सप्तमोनुवाकः.

---

[1]स्वयंचितिं जपति—यास्त इति त्रिष्टुभा ॥ हे अग्ने जातवेदः जातप्रज्ञ जातधन वा यास्तव समिधः समिन्धनानि यानि च धाम धामानि जन्मस्थानानि । 'सुपां सुलुक्' इति लुक्,

अग्ने मेडयो य इन्दवस्तेभिरात्मानं चिनुहि प्रजानन्न् । उथ्सन्नयज्ञो वा एष यदग्निः किं वाऽहैतस्य क्रियते किं वा न यद्वा अध्वर्युरग्नेश्चिन्वन्नन्तरेत्यात्मनो वै तदन्तरेति यास्ते अग्ने समिधो यानि ॥ ३३ ॥ धा-

वेदः । यः । अर्चिः । ये । ते । अग्ने । मेडयः । ये । इन्दवः । तेभिः । आत्मानम् । चिनुहि । प्र-जानन्निति प्र-जानन् । [2]उत्सन्नयज्ञ इत्युत्सन्न-य-ज्ञः । वै । एषः । यत् । अग्निः । किम् । वा । अ-हं । एतस्य । क्रियते । किम् । वा । न । यत् । वै । अध्वर्युः । अग्नेः । चिन्वन्न् । अन्तरेतीत्यन्तः-एति । आत्मनः । वै । तत् । अन्तः । एति । याः ।

यश्चार्चिः दीप्तिः हे अग्ने अङ्गनादियुक्त । ये च मेडयः शब्दाः चमनामसूपमितामिदम् । ये ते च इन्दवः विप्रुषः तेभिस्तैस्सर्वैः स्वयमेवात्मानं चिनुहि । ' उतश्च प्रत्ययाच्छन्दो वा वचनम् ' इति हेर्लोपाभावः । प्रजानन् प्रकृष्टो ज्ञाता । कोन्यस्त्वद्वते तां चेतुं शक्नुयादिति भावः । तेभिरिति । ' बहुलं छन्दसि ' इति ऐस-भावः, ' नपुंसकमनपुंसकेन ' इति नपुंसकं शिष्यते ॥

[2]अथात्रैव ब्राह्मणम्—उत्सन्न यज्ञ इत्यादि ॥ व्याख्यातम्* ।

---

*सं. ५-३-१.

मेत्याहैषा वा अग्नेस्स्वयंचितिरग्नि-
रेव तदग्निं चिनोति नाध्वर्युरात्म-
नोन्तरेति चतस्र आशाः प्र चर-
न्त्वग्नय इमं नो यज्ञं नयतु प्रजान-
न् । घृतं पिन्वन्नजरꣳ सुवीरं ब्रह्म

ते । अग्ने । समिध इति सं-इधः । यानि ॥३३॥
धामं । इति । आह । एषा । वै । अग्नेः । स्वयं-
चितिरिति स्वयं-चितिः । अग्निः । एव । तत् ।
अग्निम् । चिनोति । न । अध्वर्युः । आत्मनः ।
अन्तः । एति । [3]चतस्रः । आशाः । प्रेति । चर-
न्तु । अग्नयः । इमम् । नः । यज्ञम् । नयतु । प्र-
जानन्निति प्र-जानन् । घृतम् । पिन्वन् । अज-

पुरुषबुद्ध्यविषयत्वेन ज्ञानवत्त्वस्य परिहृतत्वात् अध्वर्योरात्मैकदेशा-
न्तरस्याभावः ॥

[3]कूर्मोपधानमन्त्रः—चतस्र आशा इति त्रिष्टुप् ॥ चतस्र आशा दिशः अग्नयः प्रचरन्तु प्रकाशनार्थाय स्वर्गं गच्छतोस्य । अयं च कूर्मः इममस्माकं यज्ञं स्वर्गं नयतु प्रापयतु प्रजा-नन् प्रकृष्टो ज्ञाता घृतमुदकं अजरं अविनाशं सुवीर्यं च शो-भनवीर्यं च पिन्वन् सिञ्चन् इमं यज्ञं नयत्विति । ब्रह्मैव समि-न्धनं भवतु आहुतीनामग्नीनां प्रचरताम् । आहूयन्ते याभ्य

समिद्भवत्याहुतीनाम् । सुवर्गाय वा एष लोकायोपं धीयते यत्कूर्मश्चतस्र आशाः प्र चरन्त्वग्नय इत्याह ॥ ३४ ॥ दिश एवैतेन प्र जानाती-मं नो यज्ञं नयतु प्रजानन्नित्याह सुवर्गस्य लोकस्याभिनीत्यै ब्रह्म समिद्भवत्याहुतीनामित्याह ब्रह्मणा वै

रम् । सुवीरमिति सु—वीरम् । ब्रह्म । समिदिति सं—इत् । भवति । आहुतीनामित्या—हुतीनाम् । सुव-र्गायेति सुवः—गाय । वै । एषः । लोकाय । उपेति । धीयते । यत् । कूर्मः । चतस्रः । आशाः । प्रेति । चरन्तु । अग्नयः । इति । आह ॥ ३४ ॥ दिशः । एव । एतेन । प्रेति । जानाति । इमम् । नः । य-ज्ञम् । नयतु । प्रजानन्निति प्र—जानन् । इति । आ-ह । सुवर्गस्येति सुवः—गस्य । लोकस्य । अभिनी-त्या इत्यभि—नीत्यै । ब्रह्म । समिदिति सं—इत् ।

इत्याहुतयोऽग्नयः । संप्रदाने क्तिन्, 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् ॥

*अथात्रैव ब्राह्मणम्—सुवर्गायेत्यादि ॥ गतम् । चतस्र इत्यादि । मन्त्रावयवानां स्तुतिः । अभिनीत्यै आभिमुख्येन नयनाय यत्

देवास्सुवर्गं लोकमायन् यद्ब्रह्मण्व-
त्योपदधाति ब्रह्मणैव तद्यजमान-
स्सुवर्गं लोकमेति प्रजापतिर्वा ए-
ष यदग्निस्तस्य प्रजाः पशवश्छन्दा-
ꣳसि रूपꣳ सर्वान् वर्णानिष्टकानां
कुर्याद्रूपेणैव प्रजां पशून्छन्दाꣳस्य-

भवति । आहुतीनामित्या—हुतीनाम् । इति । आह । ब्रह्मणा । वै । देवाः । सुवर्गमिति सुवः—गम् । लोकम् । आयन् । यत् । ब्रह्मण्वत्येति ब्रह्मण्—वत्या । उपदधातीत्युप—दधाति । ब्रह्मणा । एव । तत् । यजमानः । सुवर्गमिति सुवः—गम् । लोकम् । एति । [5]प्रजापतिरिति प्रजा—पतिः । वै । एषः । यत् । अग्निः । तस्य । प्रजा इति प्र—जाः । पशवः । छन्दाꣳसि । रूपम् । सर्वान् । वर्णान् । इष्टकानाम् । कुर्यात् । रूपेण । एव । प्रजामिति प्र—जाम् । पशून् । छन्दाꣳसि । अवेति । रुन्धे । अथो इति । प्रजाभ्य

ब्रह्मण्वत्या ऋचा 'चतस्र आशाः' इत्यनया, 'ब्रह्म समित् भवति' इत्यत्र दर्शनात् । 'अनो नुट्' ॥

[5]प्रजापतिर्वा इत्यादि ॥ प्रजादीनि प्रजापते रूपाणि नः अस्मान् प्रजापत्यात्मनोऽग्नेरवयवभूतानां इष्टकानां सर्वान् सर्ववर्णान्

वं रुन्धेऽथो प्रजाभ्य एवैनं पशुभ्य-
श्छन्दोभ्योऽवरुध्य चिनुते॥ ३५ ॥
मयि गृह्णाम्यग्रे अग्निꣳ रायस्पो-
षाय सुप्रजास्त्वाय सुवीर्याय। मयि

इति प्र–जाभ्यः। एव। एनम्। पशुभ्य इति पशु–
भ्यः। छन्दोभ्य इति छन्दः–भ्यः। अवरुध्येत्यव–
रुध्य। चिनुते॥ ३५॥

एति यास्ते अग्ने समिधो यान्यग्नय इत्याहे-
ष्टकानाꣳ षोडश च॥ ८॥

[1]मयि। गृह्णामि। अग्रे। अग्निम्। रायः। पोषाय। सुप्रजास्त्वायेति सुप्रजाः–त्वाय। सुवी-
र्यायेति सु–वीर्याय। मयि। प्रजामिति प्र–जाम्।

कुर्यात् लेखाभिः दक्षिणावृद्धिः तासां प्रजादिभावाय प्रजादीनां च सर्ववर्णत्वात् तथा कृते रूपेणैव प्रजादीनवरुन्धे। ततश्च प्रजापत्यात्माऽग्निः परिगृहीतो भवति। अथो अपि च प्रजादिभ्य एवादायाग्निः चितो भवति, प्रजादीनां इष्टकानां चैतत्स्वभावत्वात्॥

इति पञ्चमे सप्तमे अष्टमोनुवाकः.

---

[1]आत्मन्यग्निं गृहीते—मयि गृह्णामीति द्वाभ्याम्॥ त्रिष्टुप् पुरस्ताज्ज्योतिस्त्रिष्टुप् अक्षराधिका। अग्रे प्रथमं चयनात् पूर्व-

प्रजां मयि वर्चो दधाम्यरिष्टास्स्याम तनुवा सुवीराः। यो नो अग्निः पितरो ह्यस्वन्तरमर्त्यो मर्त्याँ आविवेश। तमात्मन्परि गृह्णीमहे वयं

मयि। वर्चः। दधामि। अरिष्टाः। स्याम। तनुवा। सुवीरा इति सु-वीराः। [2]यः। नः। अग्निः। पितरः। ह्यस्विति ह्य्-सु। अन्तः। अमर्त्यः। मर्त्यान्। आविवेशेत्या-विवेश। तम्। आत्मन्। परीति। गृह्णीमहे। वयम्। मा। सः। अस्मान्।

मेवाग्निं मयि गृह्णामि रायो धनस्य पोषाय पुष्ट्यर्थं शोभनापत्यत्वाय शोभनवीर्यत्वाय च। व्याख्यातानि पदानि। किं यजमानस्य रायस्पोषाय दद्युरिति, नेत्याह—मयि प्रजां प्रजादिकं च मयि वर्चो बलं च दधामि धारयेय मम तेजो माक्रमेदित्यनेन अभिप्रायेण मयि गृह्णामीति। 'यदध्वर्युरात्मन्' इत्यादिकं ब्राह्मणमिदानीमेव भविष्यति। किञ्च—सर्वेऽपि वयं पुत्रपौत्रादिसहिताः सुवीराश्शोभनापत्या अरिष्टा अनुपहिंसिताश्च तनुवा शोभनेन शरीरेण सहिताः सर्वे स्याम समर्थाश्च॥

[2]अथ द्वितीया—यो न इति॥ हे पितरः सर्वस्य पितरः। भूतेन्द्रियाण्यामन्त्र्यन्ते यो नोस्मान् ह्यस्तु हृदयादिषु अन्तर्मध्ये आविवेश अमर्त्यः अमरणधर्मा मर्त्यान् मरणशीलान् अस्मानाविवेश

मा सो अस्मा॑ अंव॒हाय॒ परा॑ गा॒
त् । यद॑ध्व॒र्युरा॒त्मन्ना॒ग्निमगृ॑हीत्वाऽग्निं
चि॑नु॒याद्यो॑स्य॒ स्वोऽग्नि॒स्तमपि॑ ॥ ३६ ॥
यज॑मानाय चिनु॒याद॒ग्निं खलु॒ वै
प॒शवोऽनूप॑ तिष्ठन्तेऽप॒क्रामु॑का अ-

अव॒हायेत्यव॑–हाय॑ । परेति॑ । गा॒त् । [3]यत् । अध्व॒-
र्युः । आत्मन्न् । अग्निम् । अगृ॑हीत्वा । अग्निम् ।
चि॒नु॒यात् । यः । अस्य॒ । स्वः । अग्निः । तम् ।
अपीति॑ ॥ ३६ ॥ यज॑मानाय । चि॒नु॒यात् । अ-
ग्निम् । खलु॑ । वै । प॒शवः॑ । अनु॑ । उपेति॑ । ति॒-
ष्ठ॒न्ते॒ । अप॑क्रामु॒का इत्यप॑–क्रामु॒काः । अ॒स्मा॒त् ।

तं महानुभावमात्मनि वयं परिगृह्णीमहे । ननु चोक्तमन्तराविवेशेति तत्किमुच्यते आत्मनि परिगृह्णीमहे इति; अत्राभिप्रायमाह—सोऽस्मानपहाय त्यक्त्वा मा परागात् माऽन्यत्र गच्छत्विति । परिग्रहशब्देन अयमर्थो विवक्षित इति दर्शितं भवति ॥

[3]अथात्रैव ब्राह्मणम्—यद्ध्वर्युरित्यादि ॥ अग्निग्रहणविधानार्थम् । यद्ध्वर्युः आभ्यां मन्त्राभ्यां आत्मन्यग्निमगृहीत्वा अग्निं चिनुयात् योस्याध्वर्योः स्व आत्मनि योग्निः तमपि यजमानाय चिनुयात् चयने जह्यात् ततश्चेतुमुपयान्तं पशवोनूपतिष्ठन्ते पश्चादनुद्रुत्य भजन्ते । संगतिकरण आत्मनेपदम् । एवमेतद्युक्तमिति खलुशब्देन द्योत्यते । ततश्च अस्याध्वर्योरपक्रामुकाः

स्मात्पशवस्स्युर्मायं गृह्णाम्यग्रे अ-
ग्निमित्याहात्मन्नेव स्वमग्निं दाधार
नास्मात्पशवोऽपं क्रामन्ति ब्रह्मवा-
दिनो वदन्ति यन्मृच्चापश्चाग्नेरंना-
द्यमथ कस्मान्मृदा चाद्भिश्चाग्निश्ची-

पशवः । स्युः । मायं । गृह्णामि । अग्रे । अग्निम् । इति । आह । आत्मन् । एव । स्वम् । अग्निम् । दाधारं । न । अस्मात् । पशवः । अपेति । क्राम-न्ति । ब्रह्मवादिन इति ब्रह्म—वादिनः । वदन्ति । यत् । मृत् । च । आपः । च । अग्नेः । अनाद्यम् । अथ । कस्मात् । मृदा । च । अद्भिरित्यत्—भिः । च । अग्निः । चीयते । इति । यत् । अद्भिरित्यत्—

अपक्रमणशीलाः पशवस्स्युः । छान्दस उकञ् । मयि गृह्णामीत्या-दिना यथोक्तदोषाभावमाचष्टे । दाधारेति छान्दसो लिट् । धारय-न्निति । 'तुजादीनाम्' इत्यभ्यासस्य दीर्घत्वम् ॥

[4]ब्रह्मवादिन इत्यादि ॥ मृच्च आपश्चेत्येतदुभयमग्नेरनाद्यमभ-क्ष्यम् । 'ययतोश्चातदर्थे' इत्युत्तरपदान्तोदात्तत्वम् । अथ कस्मा-त्कारणादनेनाभिमतेन अग्निश्चीयते विरुद्धमिव लक्ष्यते एतदिति ब्र-ह्मवादिन आहुः । उत्तरम्—यदद्भिरिति । यदद्भिर्मृदं संयौति मिश्रयति आपश्च सर्वदेवतार्थाः । तस्मात्ताद्दश्या मृदा चयनेन सर्वाभिर्देव-

यत इति यद्भिस्संयौतिं ॥ ३७ ॥
आपो वै सर्वा देवता देवताभिरेवै-
नꣳसꣳ सृजति यन्मृदा चिनोतीयं
वा अग्निर्वैश्वानरोऽग्निनैव तदग्निं
चिनोति ब्रह्मवादिनो वदन्ति यन्मृ-
दा चाद्भिश्चाग्निश्चीयतेऽथ कस्माद्-

भिः । संयौतीति सं—यौतिं ॥ ३७ ॥ आपः । वै । सर्वाः । देवताः । देवताभिः । एव । एनम् । संमि-
ति । सृजति । यत् । मृदा । चिनोति । इयम् । वै । अग्निः । वैश्वानरः । अग्निना । एव । तत् । अग्निम् । चिनोति । ब्रह्मवादिन इति ब्रह्म—वादिनः । वदन्ति । यत् । मृदा । च । अद्भिरित्यत्—भिः । च । अग्निः । चीयते । अथ । कस्मात् । अग्निः । उच्य-

---

ताभिः एनमग्निं संसृजति संयोजयति । तस्मान्मृदा चाद्भिश्च अग्निश्चीयते; न किञ्चिदिह विरुद्धमिति ॥

[5]एवमद्भिश्चयनं प्रयोजनवादित्युक्तम् । इदानीं मृदा चयने यो गुणः तं दर्शयति—यन्मृदेत्यादि ॥ गतम् । ब्रह्मवादिन इत्यादि । पुनरपि पर्यनुयोगान्तरमत्र कुर्वन्ति—ब्रह्मवादिनः मृदाचाद्भिश्चीयमानोग्निः कस्मात्संबन्धादग्निरुच्यते । अद्भिर्मृदा काष्ठेन

ग्निरुच्यत इति यच्छन्दोभिश्चिनो-
त्यग्नयो वै छन्दाꣳसि तस्मादग्नि-
रुच्यतेऽथो इयं वा अग्निर्वैश्वानरो
यत् ॥ ३८ ॥ मृदा चिनोति तस्मा-
दग्निरुच्यते हिरण्येष्टका उप दधा-
ति ज्योतिर्वै हिरण्यं ज्योतिरेवास्मि-
न्दधात्यथो तेजो वै हिरण्यं तेज

ते । इति । यत् । छन्दोभिरिति छन्दः—भिः । चि-
नोति । अग्नयः । वै । छन्दाꣳसि । तस्मात् । अ-
ग्निः । उच्यते । अथो इति । इयम् । वै । अग्निः ।
वैश्वानरः । यत् ॥ ३८ ॥ मृदा । चिनोति । त-
स्मात् । अग्निः । उच्यते । [6]हिरण्येष्टका इति हि-
रण्य—इष्टकाः । उपेति । दधाति । ज्योतिः । वै ।
हिरण्यम् । ज्योतिः । एव । अस्मिन् । दधाति ।
अथो इति । तेजः । वै । हिरण्यम् । तेजः । एव ।

वा निष्पादितं हिरण्मयं भवति, तत्त्वं च विरुद्धमिति । समा-
धत्ते—यच्छन्दोभिरित्यादि । गतम् ॥

[6]हिरण्येष्टका इत्यादि ॥ 'तेजोसि तेजो मे यच्छ'* इत्याद्या
हिरण्येष्टकाप्षष्ठे विहिताः पुनरिह विधीयन्ते अग्नेरात्मीयतासंपादना-

*सं. ५-७-६.

एवात्मन्धत्ते यो वा अग्निꣳ सर्वतो-
मुखं चिनुते सर्वासु प्रजास्वन्नमत्ति
सर्वा दिशोऽभि जयति गायत्रीं पु-
रस्तादुप दधाति त्रिष्टुभं दक्षिणतो
जगतीं पश्चादनुष्टुभमुत्तरतः पङ्क्तिं

आत्मन्न् । धत्ते । [7]यः । वै । अग्निम् । सर्वतोमुख-
मिति सर्वतः—मुखम् । चिनुते । सर्वासु । प्रजास्विति
प्र—जासु । अन्नम् । अत्ति । सर्वाः । दिशः । अभी-
ति । जयति । [8]गायत्रीम् । पुरस्तात् । उपेति । द-
धाति । त्रिष्टुभम् । दक्षिणतः । जगतीम् । पश्चात् ।
अनुष्टुभमित्यनु—स्तुभम् । उत्तरत इत्युत्—तरतः ।

र्थम् । यद्वा—अत्रैवासां विधिः, षष्ठे तु क्रमविधिः । ज्योति-
र्वा इत्यादि । गतम् ॥

[7]यो वा अग्निमित्यादि ॥ सर्वासु दिक्षु मुखानि छन्दांसि यस्य स सर्वतोमुखः, सर्वासु वा दिक्षु मुखं चाग्नेरेभिः छन्दोभिः सर्वतोमुखः । सर्वास्विति निर्धारणे सप्तमी । सर्वासु प्रजासु मध्ये अतिशयेनान्नमत्ति । सर्वाश्च दिशोभिजयति ॥

[8]गायत्रीमित्यादि ॥ गतम् । अथो इत्यादि । परस्परसम्बद्धैः छन्दोभिश्चयनात् दिश्येव दिशं प्रवयति ; तस्मादिदानीमपि दिशि अन्या दिक् प्रोतेव लक्ष्यते । सर्वा दिशः परस्परं प्रोता इव

मध्यं एष वा अग्निस्सर्वतोमुखस्तं
यं एवं विद्वाꣳश्चिनुते सर्वासु प्रजा-
स्वन्नमत्ति सर्वा दिशोऽभि जयत्यथो
दिश्येव दिशं प्र वयति तस्माद्दिशि
दिक्प्रोता ॥ ३९ ॥

प्रजापतिरग्निमसृजत सोऽस्माथ्सृष्टः

पदक्रम । मध्यं । एषः । वै । अग्निः । सर्वतोमुख इति सर्वतः-मुखः । तम् । यः । एवम् । विद्वान् । चिनुते । सर्वासु । प्रजास्वितिं प्र-जासु । अन्नम् । अत्ति । सर्वाः । दिशः । अभीति । जयति । अथो इति । दिशि । एव । दिशम् । प्रेति । वयति । तस्मात् । दिशि । दिक् । प्रोतेति प्र-उता ॥३९॥

अपि सं यौति वैश्वानरो यदेष वै पश्वं-
विꣳशतिश्च ॥ १ ॥

[1]प्रजापतिरिति प्रजा-पतिः । अग्निम् । असृ-

भवन्ति । कोणासु दिक्षु अन्यासामनुप्रविष्टत्वात् प्रोता इत्युच्यन्ते । वेञः निष्ठायां संप्रसारणं, 'शतुरनुमः' इति गतेः प्रकृतिस्वरत्वम् ॥

इति पञ्चमे सप्तमे नवमोनुवाकः.

---

[1]प्रजापतेरित्यादि पशुशिरसां विधिः ॥ प्रजापतिना सृष्टोग्निरस्मात्प्रजापतेः प्राङ्मुखतः प्राद्रवत् । तस्मै तन्निवृत्त्यर्थं अश्वं

प्राङ्प्रद्रवत्तस्मा अश्वं प्रत्यास्यथ्सद-
क्षिणाऽवर्तत तस्मै वृष्णिं प्रत्या-
स्यथ्स प्रत्यङ्ङाऽवर्तत तस्मा ऋषभं
प्रत्यास्यथ्स उदङ्ङाऽवर्तत तस्मै बस्तं
प्रत्यास्यथ्स ऊर्ध्वोऽद्रवत्तस्मै पुरुषं
प्रत्यास्यद्यत्पशुशीर्षाण्युपदधाति
सर्वत एवैनम् ॥ ४० ॥ अवरुध्य

जत। सः। अस्मात्। सृष्टः। प्राङ्। प्रेति। अद्रवत्। तस्मै। अश्वम्। प्रतीति। आस्यत्। सः। दक्षिणा। एति। अवर्तत। तस्मै। वृष्णिम्। प्रतीति। आस्यत्। सः। प्रत्यङ्। एति। अवर्तत। तस्मै। ऋषभम्। प्रतीति। आस्यत्। सः। उदङ्। एति। अवर्तत। तस्मै। बस्तम्। प्रतीति। आस्यत्। सः। ऊर्ध्वः। अद्रवत्। तस्मै। पुरुषम्। प्रतीति। आस्यत्। यत्। पशुशीर्षाणीति पशु—शीर्षाणि। उपदधातीत्युप—दधाति। सर्वतः। एव। एनम्॥ ४०॥ अवरुध्ये-

---

प्रत्यास्यत् प्रातिकूल्येनाग्रतः क्षिप्तवान्, अश्वेन प्रतिरुद्धवानिति यावत्। ततस्सोऽग्निरावृत्य दक्षिणस्यां दिशि आवर्तत। ततो सक्तुं(?) तस्मै वृष्णिं प्रत्यास्यत्। एवं सर्वत्र। दक्षिणादाच्। तस्मात्पशुशिरसामुपधानेन सर्वतो रुद्धस्य सर्वाभ्यो दिग्भ्यो निर्निरुद्धोऽग्निश्चितो भवति॥

चिनुत एता वै प्राणभृत्श्चक्षुष्मतीरिष्टँका यत्पशुशीर्षाणि यत्पशुशीर्षाण्युपदधाति ताभिरेव यजमानोऽमुष्मिन्लोके प्राणित्यथो ताभिरेवास्मा इमे लोकाः प्र भान्ति मृदाऽभिलिप्योप दधाति मेध्यत्वाय पशुर्वा एत्यंव–रुध्यं । चिनुते । [2]एताः । वै । प्राणभृत इतिं प्राण्–भृतंः । चक्षुष्मतीः । इष्टंकाः । यत् । पशुशीर्षाणीतिं पशु–शीर्षाणिं । यत् । पशुशीर्षाणीतिं पशु–शीर्षाणिं । उपदधातीत्युंप–दधांति । ताभिंः । एव । यजंमानः । अमुष्मिन्नं् । लोके । प्रेतिं । अनितिं । अथो इतिं । ताभिंः । एव । अस्मै । इमे । लोकाः । प्रेतिं । भान्तिं । [3]मृदा । अभिलिप्येत्यंभि–लिप्यं । उपेतिं । दधाति । मेध्यत्वायेतिं मेध्य–त्वायं । [4]पशुः । वै ।

---

[2]एता वा इत्यादि ॥ भूतपूर्वं प्राणभृत्त्वं चक्षुष्मत्त्वं च शिरस्सूपचर्यते । उपधेयत्वाच्चेष्टकात्वम् । तदुपधानेन यजमानोमुष्मिन् लोके प्राणिति जीवति । लोकाश्चेमे अस्मै प्रभान्ति प्रकर्षेण प्रकाशन्ते उपकारका भवन्ति ॥

[3]मृदाऽभिलिप्येति विधिः ॥

[4]पशुर्वा इत्यादि ॥ पशुशिरस्सु गुणविध्यर्थम् । पशुसाधनत्वात्

ष यदग्निरन्नं पशवं एष खलु वा अग्नि-
र्यत्पंशुशीर्षाणि यं कामयेत कनीयो-
स्यान्नंम्॥४१॥स्यादितं सन्तरां तस्यं
पशुशीर्षाण्युपं दध्यात्कनीय एवा-
स्यान्नं भवति यं कामयेत समावं-
दस्यान्नꣳ स्यादितं मध्यतस्तस्योपं

एषः । यत् । अग्निः । अन्नंम् । पशवंः । एषः । खलु । वै । अग्निः । यत् । पशुशीर्षाणीतिं पशु-शीर्षाणिं । यम् । कामयेत । कनीयः । अस्य । अन्नंम् ॥ ४१ ॥ स्यात् । इतिं । संतरामितिं सं-तराम् । तस्यं । पशुशीर्षाणीतिं पशु-शीर्षाणिं । उपेतिं । दध्यात् । कनीयः । एव । अस्य । अन्नंम् । भवति । यम् । कामयेत । समावंत् । अस्य । अन्नंम् । स्यात् । इतिं । मध्यतः ।

पशवोग्निः । अन्नसाधनत्वात् अन्नं पशवः । किञ्च—एषोग्निरेव पशुशीर्षाणि, अवयवावयविनोरभिन्नत्वात् पशुत्वस्य च समानत्वात् । तस्माद्यजमानमध्वर्युः कामयते कनीयोल्पतरं अस्यान्नं स्यादिति तस्य संतरां सन्निकृष्टतराणि पशुशीर्षाण्युपदध्यात् । 'किमेत्तिङव्यय' इत्यामुप्रत्ययः । कनीय एवेत्यादि । गतम् । समावत् समम् । समादावतुप् स्वार्थिकः । मध्यतो नातिसन्निकृष्टा

दध्याथ्समावेदेवास्यान्नं भवति यं कामयेत भूयोस्यान्नꣳ स्यादित्यन्तेषु तस्यं व्युदूह्योपं दध्यादन्तत एवास्मा अन्नमवं रुन्धे भूयोस्यान्नं भवति ॥ ४२ ॥

स्तेगान्दꣳष्ट्राभ्यां मण्डूकाञ्जम्भ्यैभि-

तस्यं । उपेतिं । दध्यात् । समावंत् । एव । अस्य। अन्नंम् । भवति । यम् । कामयेत । भूयंः । अस्य । अन्नंम् । स्यात् । इतिं । अन्तेंषु । तस्यं । व्युदूह्येति वि—उदूह्यं । उपेतिं । दध्यात् । अन्तः । एव । अस्मै । अन्नंम् । अवेतिं । रुन्धे । भूयंः । अस्य । अन्नंम् । भवति ॥ ४२ ॥

एनमस्यान्नं भूयोस्यान्नं भवति ॥ १० ॥

[1]स्तेगान् । दꣳष्ट्राभ्याम् । मण्डूकान् । जम्भ्यै-

दिक् । भूयः बहुतरम् । अन्तेष्वित्यादि । अन्तेषु प्रान्तेषु व्युदूह्य व्युदूह्योपदध्यात् । अन्ततो दिगन्तेभ्योस्मै यजमानायान्नमवरुन्धे । ततो बहुतरं तस्यान्नं भवति ॥

इति पञ्चमे सप्तमे दशमोनुवाकः.

---

[1]समन्त्रकः सब्राह्मणोऽग्निस्समाप्तः । अतः परमश्वमेधकाण्डं वैश्वदेवम् । तत्र हविषा प्रचर्याज्यमवदानं कृत्वा 'स्तेगान्'

रादंकां खादेनोर्जꣳ सꣳसूदेनारंण्यं
जाम्बीलेन मृदं बस्वैंभिरशकैंरा-
भिरवंकामवंकाभिरशकैंरामुथ्सादेनं

भिः । आदंकाम् । खादेनं । ऊर्जंम् । सꣳसूदेनेतिं सं—सूदेनं । अरंण्यम् । जाम्बीलेन । मृदंम् । ब-स्वैंभिः । शकैंराभिः । अवंकाम् । अवंकाभिः । शर्कंराम् । उत्सादेनेत्युंत्—सादेनं । जिह्वाम् । अ-

इत्यादिचतुर्दशभिरनुवाकैः प्रतिमन्त्रं शरीरहोमं जुहोति । अत्र द्वितीयया निर्दिष्टा देवताः स्तेगाद्याः । तृतीयानिर्दिष्टान्यश्वस्याङ्गानि दंष्ट्रादीनि । इमां देवतामनेन अश्वेन यजामीति होमकाल उभयं स्मर्तव्यमिति मन्त्राभिप्रायः । अत्र ब्राह्मणं 'वैश्वदवो वा अश्वः । तं यत्प्राजापत्यं कुर्यात् । ....समदं दधाति'* इति । स्तेगाः क्षुद्रजन्तुविशेषाः गोकर्णकण्टका† इति प्रसिद्धाः । महाकण्टका इत्यन्ये । तदधिष्ठातृदेवता गृह्यते । दंष्ट्रे दन्ते उन्नते । मण्डू-काः प्रसिद्धाः । तद्दन्तमूलं जम्भः तत्र भवा जम्भ्याः पार्श्वद-न्ताः । यद्वा—स्वार्थिको यत् । आदका भक्षयित्री प्राणाभि-मानिनी देवता । पावकादित्वादित्वाभावः । खादः दन्तः येन खाद्यन्ते । करणे घञ्, 'कर्षात्वतः' इत्यन्तोदात्तत्वम् । ऊर्क् रसः । तदभिमानिनी देवता सर्वत्र ग्राह्या । संसूदः सन्तत-क्षरणो नासिकादिः । थाथादिना उत्तरपदान्तोदात्तत्वम् । आर-ण्यं प्रसिद्धम् । जाम्बीलं भक्षिततृणादि यत्र निधीयते आमा-

*ब्रा. ३-९-११. †श्वोकण्टका.

जिह्वामवक्रन्देन तालुꣳ सरस्वतीं
जिह्वाग्रेण ॥ ४३ ॥
वाजꣳ हनूभ्यामप आस्येनादित्या-
ञ्छ्मश्रुभिरुपयाममधरेणोष्ठेन सदुत्त-
वक्रन्देनेत्यव—क्रन्देन । तालुम् । सरस्वतीम् । जि-
ह्वाग्रेणेति जिह्वा—अग्रेण ॥ ४३ ॥
स्तेगान्द्यावि ꣳ शातिः ॥ ११ ॥

[1]वाजम् । हनूभ्यामिति हनु—भ्याम् । अपः । आस्येन । आदित्यान् । श्मश्रुभिरिति श्मश्रु—भिः । उपयाममित्युप—यामम् । अधरेण । ओष्ठेन । सत् । उत्तरेणेत्युत्—तरेण । अन्तरेण । अनू-

---

शय इति प्रसिद्धम् । मृत् प्रसिद्धा । बर्स्वः दन्तमूलमांसादीनि । शर्कराः तत्सदृशान्यस्थीनि । अवका अवित्री देवता अग्निस्थानाभिमानिनी । पूर्ववदित्वाभावः । शैवालाभिमानिनी वा गृह्यते । अवकाः शैवालसदृशानि मांसानि । अस्थिविशेषा इत्यन्ये । शर्कराः प्रसिद्धाः । उत्सादः उच्चप्रदेशः । जिह्वा प्रसिद्धा । अवक्रन्दः आन्तःकायिकः । तालुः शब्दाभिव्यक्तिस्थानं जिह्वामूलम् । सरस्वतीं जिह्वाग्रेण । गतम् ॥

इति पञ्चमे सप्तमे एकादशोनुवाकः.

---

[1]वाजोऽन्नम् । हन्वादीनि प्रसिद्धानि । हनूभ्यामिति छान्दसं सांहितिकं दीर्घत्वम् । उपयामः पृथिवी । अधरेणोष्ठेन । गतम् ।

रेणान्तरेणानूकाशं प्रकाशेन बाह्यꣳ
स्तनयित्नुं निर्बाधेन सूर्याग्नी चक्षुं-
भ्यां विद्युतौ कनानकाभ्यामशनिं
मस्तिष्केण वलं मज्जभिः ॥४४॥

काशमित्यनु—काशम् । प्रकाशेनेति प्र—काशेन । बाह्यम् । स्तनयित्नुम् । निर्बाधेनेति निः—बाधेन । सूर्याग्नी इति सूर्य—अग्नी । चक्षुर्भ्यामिति चक्षुः—भ्याम् । विद्युताविति वि—द्युतौ । कनानकाभ्याम् । अशनिम् । मस्तिष्केण । वलम् । मज्जभिरिति म—ज्ज—भिः ॥ ४४ ॥

वाजं पञ्चविꣳशतिः ॥ १२ ॥

'ओत्वोष्ठयोः' इति पररूपत्वम् । सत् द्यौः, सीदन्त्यस्यां पुण्यकृत इति । उत्तरेण ओष्ठेनेत्येव । अन्तरं ओष्ठयोर्मध्यम् । अनूकाशः द्यावापृथिव्योर्मध्यं, अनुक्रमेण काशन्ते भासन्ते अस्मिन् ज्योतींषि । 'इकः काशे' इति सांहितिकं दीर्घत्वम् । प्रकाशः आभ्यन्तरं प्रकाशस्थानम् । बाह्यं बहिर्भवं प्रकाशस्थानं दिगादिः । 'बहिषष्टिलोपो यञ्च' इति यञ् । स्तनयित्नुः प्रसिद्धः । निर्बाधः कनशब्दः । सूर्याग्नी चक्षुर्भ्याम् । गतम् । विद्युतौ वृष्टिरवृष्टिः । कनानके अक्षिस्थे कृष्णमण्डले । अशनिः प्रसिद्धः । मस्तिष्कः । शिरोमांसम् । वलं मज्जभिः ॥

इति पञ्चमे सप्तमे द्वादशोनुवाकः.

कूर्माञ्छफैरच्छलाभिः कपिञ्जला-
न्थ्साम कुष्ठिकाभिर्जवं जङ्घाभिर-
गदं जानुभ्यां वीर्यं कुहाभ्यां भयं
प्रचालाभ्यां गुहोपपक्षाभ्यामश्विना-
वꣳसाभ्यामदितिꣳ शीर्ष्णा निरृ-
तिं निर्जाल्मकेन शीर्ष्णा ॥ ४५ ॥

[1]कूर्मान् । शफैः । अच्छलाभिः । कपिञ्जलान् ।
सामं । कुष्ठिकाभिः । जवम् । जङ्घाभिः । अग-
दम् । जानुभ्यामिति जानु-भ्याम् । वीर्यम् । कु-
हाभ्यांम् । भयम् । प्रचालाभ्यामितं प्र-चाला-
भ्यांम् । गुहा । उपपक्षाभ्यामित्युप-पक्षाभ्यांम् ।
अश्विनौ । अꣳसाभ्याम् । अदितिम् । शीर्ष्णा ।

---

[1]कूर्मान् शफैः । गतम् । अच्छलाः शफलमूलमांसानि । कपिञ्जलाः प्रसिद्धाः । साम गीतिः । कुष्ठिका प्रकोष्ठजङ्घाभ्योऽधःप्रदेशः । जवो वेगः । जङ्घा जानुभ्योऽधःप्रदेशः । अगदः आरोग्यम् । जानुनी पादयोर्मध्यसन्धी । वीर्यं बलम् । कुहः हस्तयोर्मध्यसन्धिः । भयं गतम् । प्रचालौ पादयोरुपरिप्रदेशौ । गुहा गोहनी मूर्छाऽस्य 'सुपां सुलुक्' इति द्वितीयाया लुक् । उपपक्षौ पार्श्वे । अश्विनावंसाभ्याम् । गतम् । अदितिर्देवमाता । शीर्ष्णा शिरसा । 'शीर्षञ्छन्दसि' इति शीर्षादेशः, तस्यान्तोदात्तत्वात्

योक्त्रं गृह्भिर्युगमानंतेन चित्तं म-
न्याभिस्संक्रोशान्प्राणैः प्रकाशेन त्व-
चं पराकाशेनान्तरां मशकान्केशैरि-

निरृतिमिति निः-ऋतिम्। निर्जाल्मकेनेति निः-जाल्मकेन। शीर्ष्णा ॥ ४५ ॥

कूर्मान्तयोर्विंशतिः ॥ १३ ॥

[1]योक्त्रम्। गृह्भिः। युगम्। आनंतेनेत्या-नतेन। चित्तम्। मन्याभिः। संक्रोशानिति सं-क्रोशान्। प्राणैरिति प्र-अनैः। प्रकाशेनेति प्र-काशेनं। त्वचंम्। पराकाशेनेति परा-काशेनं। अन्तराम्। मशकान्। केशैः। इन्द्रंम्। स्वपसेति

उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्। निरृतिः प्रसिद्धा। निर्जाल्मकं शुद्धं केशरहितम् ॥

इति पञ्चमे सप्तमे त्रयोदशोनुवाकः.

---

[1]योक्त्रं गतम्। गृध्राः अक्षाः। युगं प्रसिद्धम्। आन्नतं ग्रीवाप्रदेशः। चित्तं प्रसिद्धम्। मन्या ग्रीवारेखाः। सिरा वा तत्रस्थाः। संक्रोशा घोषाः। प्राणाः चक्षुरादयः। प्रकाशः बाह्यं रूपम्। त्वक् त्वगिन्द्रियादीनि। पराकाशः आभ्यन्तरं रूपम्। अन्तरा त्वगिन्द्रियाभिमानिनी। मशकान् केशैः।

न्द्रꣳ स्वपसा वहेन बृहस्पतिꣳ श-
कुनिसादेन रथमुष्णिहाभिः ॥४६॥
मित्रावरुणौ श्रोणीभ्यामिन्द्राग्नी
शिखण्डाभ्यामिन्द्राबृहस्पतीं ऊरु-
भ्यामिन्द्राविष्णू अष्ठीवद्भ्याꣳ सवि-

सु-अपसा । वहेन । बृहस्पतिम् । शकुनिसादेने-
ति शकुनि-सादेन । रथम् । उष्णिहाभिः ॥४६॥

योक्त्रमेकंविꣳशतिः ॥१४॥

[1]मित्रावरुणाविति मित्रा-वरुणौ । श्रोणीभ्या-
मिति श्रोणि-भ्याम् । इन्द्राग्नी इतीन्द्र-अग्नी । शिख-
ण्डाभ्याम् । इन्द्राबृहस्पती इतीन्द्रा-बृहस्पती ।

इन्द्रः प्रसिद्धः । स्वपसा शोभनकर्मणा वहेन कण्ठावलम्बेन। 'सोर्मनसी' इत्युत्तरपदाद्युदात्तत्वम् । बृहस्पतिः प्रसिद्धः । सुट्-स्वरावुक्तौ । शकुनिसादः पृष्ठं यत्र शकुनाः शक्ता धीराः सीद-न्ति । रथः प्रसिद्धः । उष्णिहाः शिरोवेष्टनसदृशाः केशनिवहाः ॥

इति पञ्चमे सप्तमे चतुर्दशोनुवाकः.

---

[1]मित्रावरुणौ श्रोणीभ्यां गतः । प्रथमस्य 'देवताद्वन्द्वे च' इत्युत्तरपदपरत्वात् आनङ् । द्वितीयस्य संहितायां छान्दसं दीर्घत्वम् । इन्द्राग्नी प्रसिद्धे । 'नोत्तरपदेऽनुदात्तादौ' इत्याद्युदा-

तारं पुच्छेन गन्धर्वाञ्छेपेनाप्सरसौ
मुष्काभ्यां पवमानं पायुना पवित्रं
पोत्राभ्यामाक्रमणꣳ स्थूराभ्यां प्र-
तिक्रमणं कुष्ठाभ्याम् ॥ ४७ ॥

ऊरुभ्यामित्यूरु-भ्याम् । इन्द्राविष्णू इतीन्द्रा-विष्णू । अष्ठीवद्भ्यामित्यष्ठीवत्-भ्याम् । सवितारम् पुच्छेन । गन्धर्वान् । शेपेन । अप्सरसः । मुष्का-भ्याम् । पवमानम् । पायुना । पवित्रम् । पोत्रा-भ्याम् । आक्रमणमित्या-क्रमणम् । स्थूराभ्याम् । प्रतिक्रमणमिति प्रति-क्रमणम् । कुष्ठाभ्याम् ॥ ४७॥

मित्रावरुणौ द्वाविꣳशतिः ॥ १५ ॥

त्तत्वाभावः । शिखण्डे केशचूडे । इन्द्राबृहस्पती ऊरुभ्यां गतम् । 'देवताद्वन्द्वे च' इति आनङ् । इन्द्राविष्णू गतम् । अष्ठीवद्भ्यां जानुभ्याम् । सवितारं पुच्छेन । गन्धर्वान् शेपेन गतम् । अप्स-रसः प्रसिद्धाः । मुष्के बीजे । पवमानं पायु गतम् । पवित्रं पा-वनहेतुः । पोत्रे घोणास्थीनि । आक्रमणं आक्रमणसामर्थ्यम् । स्थूराभ्याम् पादापरार्धमणिभ्याम् । प्रतिक्रमणं प्रतिक्रमणसामर्थ्यम् । कुष्ठाभ्यां हस्तापरार्धमणिभ्याम् ॥

इति पञ्चमे सप्तमे पञ्चदशोनुवाकः.

इन्द्रस्य क्रोडोऽदित्यै पाजस्यं दिशां
जत्रवौ जीमूतान्हृदयौपशाभ्यांम-
न्तरिक्षं पुरितता नभं उदर्येणेन्द्राणीं
प्लीह्ना वल्मीकान्क्लोम्ना गिरीन्प्लाशि-

[1]इन्द्रस्य । क्रोडः । अदित्यै । पाजस्यम् । दिशाम् । जत्रवः । जीमूतान् । हृदयौपशाभ्यामिति हृदय—औपशाभ्याम् । अन्तरिक्षम् । पुरितता । नभः । उदर्येण । इन्द्राणीम् । प्लीह्ना । वल्मीकान् ।

---

[1]इन्द्रस्य यज्वनः क्रोडः उदरम् । षष्ठ्या निर्दिष्टा देवता, अङ्गं प्रथमया । अदित्यै देयं पाजस्यं हृदयम् । षष्ठ्यर्थे चतुर्थी । पाजो बलं तस्मै हितं पाजस्यं स्थानम् । दिशां जत्रवः। पूर्ववत् षष्ठ्या निर्दिष्टा देवता । जत्रवो ग्रीवाया अधस्ताद्धनन्यः । अतःपरं द्वितीययैव देवता निर्दिश्यते । जीमूताः प्रसिद्धाः । हृदयौपशाभ्यां मांसविशेषाभ्याम् । हृदये स्थितं मांसं हृदयौपशमुच्यते । हृदयस्थानमिति यावत् । तत् स्थानं यत्रोपेत्य शेते तदुपशं अन्तस्थानविशेषात्मकं मांसविशेषः । छान्दसो डः । तदेव औपशम् । स्वार्थिकोण् छान्दसः । अन्तरिक्षं प्रसिद्धम् । पुरितता हृदयस्य परिवारणं मांसमेव । आन्त्राणीत्येके । पुरि शरीरमध्ये तायत इति क्विप्, 'गमादीनामिति वक्तव्यम्' इत्यनुनासिकलोपः, 'तत्पुरुषे कृति बहुलम्' इत्यलुक् । अवग्रहो नेष्यते, न हि प्रसिद्धम् । उदर्यमुदरे भवं मांसम् । 'शरीरावयवाच्च' इति यत् । इन्द्राणी प्रसिद्धा । प्लीह्ना पिण्डितेन मांस-

भिंस्समुद्रमुदरेंण वैश्वानरं भस्मं-
ना ॥ ४८ ॥
पूष्णो वंनिष्ठुरंन्धाहेस्स्थूंरगुदा सर्पा-
न्गुदांभिरृ ऋतून्पृष्टीभिर्दिवं पृष्ठेन
वसूंनां प्रथमा कीकंसा रुद्राणां द्वि-

क्लोम्ना । गिरीन् । प्लाशिभिरितिं प्लाशि–भिः । स-
मुद्रम् । उदरेंण । वैश्वानरम् । भस्मंना ॥ ४८ ॥
इन्द्रंस्य द्वावि॑ंशतिः ॥ १६ ॥

[1]पूष्णः । वनिष्ठुः । अन्धाहेरित्यंन्ध–अहेः । स्थूरगुदेतिं स्थूर–गुदा । सर्पान् । गुदांभिः । ऋ-तून् । पृष्टीभिरितिं पृष्टि–भिः । दिवंम् । पृष्ठेनं ।

विशेषेण । वल्मीकाः प्रसिद्धाः । क्लोम्ना आम्रफलसदृशेन मां-सेन । गिरयः प्रसिद्धाः । प्लाशिभिः पद्मवर्णाकारैः मांसैः । समुद्रः प्रसिद्धः । उदरेण उदरस्थेन केनचिदपि मांसेन । वैश्वा-नरः प्रसिद्धः । भस्मना अनेन दृभ्यतृणादि* ॥

इति पञ्चमे सप्तमे षोडशोनुवाकः.

---

[1]पूष्णो वनिष्ठुः । पूर्ववत् षष्ठीनिर्दिष्टा देवता । गुदसदृशं मांसं वनिष्ठुः । अन्धाहेः स्थूरगुदा 'सर्पान् गुदाभिः' इति वक्ष्यमा-णस्य अयं पुरस्तादपवादः । गुदमूलं स्थूरगुदा । कपिलकादि-

---

*भस्म जीर्णतृणादि इति माधवीये.

तीयाऽऽदित्यानां तृतीयाऽङ्गिरसां
चतुर्थी साध्यानां पञ्चमी विश्वेषां
देवानाꣳ षष्ठी ॥ ४९ ॥
ओजो ग्रीवाभिर्निरृतिमस्थभिरि-

वसूनान् । प्रथमा । कीकंसा । रुद्राणाम् । द्वितीया । आदित्यानाम् । तृतीया । अङ्गिरसाम् । चतुर्थी । साध्यानाम् । पञ्चमी । विश्वेषाम् । देवानाम् । षष्ठी ॥ ४९ ॥

पूष्णश्चतुर्विꣳशतिः ॥ १७ ॥

[1]ओजः । ग्रीवाभिः । निरृतिमिति निः—ऋतिम् । अस्थभिरित्यस्थ—भिः । इन्द्रम् । स्वपसेति

त्वाच्छत्वविकल्पः । सर्पाः प्रसिद्धाः । गुदाः गुदभागाः । ऋतवः प्रसिद्धाः । पृष्टयो बाह्वोरुपरिस्थितान्यस्थीनि । छान्दसं सांहितिकं दीर्घत्वम् । द्यौः प्रसिद्धा । पृष्ठं ग्रीवोपरिस्थितं वंशास्थि । वसूनां प्रथमा कीकसेति । ग्रीवाया आरभ्य पृष्ठवंशस्थितान्यस्थिगोळकानि क्रमेण वस्वादीनाम् ॥

इति पञ्चमे सप्तमे सप्तदशोनुवाकः.

---

[1]*अथाष्टमगतान्मन्त्रानाह—ओजो ग्रीवाभिरिति ॥ ग्रीवास्त-

---

*अत्रोपलभ्यमानेषु कोशेषु क्वापि एतदष्टादशानुवाकस्य भाष्यादर्शनात् माधवीयं भाष्यं योजितम्.

न्द्रꣳ स्वपꣳसा वहेन रुद्रस्य विचल-
स्स्कन्धोऽहोरात्रयोर्द्वितीयोऽर्धमासा-
नां तृतीयो मासां चतुर्थ ऋतूनां
पञ्चमस्संवथ्सरस्य षष्ठः ॥ ५० ॥
आनन्दं नन्दथुना कामं प्रत्यासा-

सु—अपꣳसा । वहेन । रुद्रस्य । विचल इति वि—चलः । स्कन्धः । अहोरात्रयोरित्यहः—रात्रयोः । द्वितीयः । अर्धमासानामित्यर्ध—मासानाम् । तृतीयः । मासाम् । चतुर्थः । ऋतूनाम् । पञ्चमः । संवत्सरस्येति सं—वत्सरस्य । षष्ठः ॥ ५० ॥

ओजो विꣳशतिः ॥ १८ ॥

[1]आनन्दमित्या—नन्दम् । नन्दथुना । कामम् ।

दवयवाः । अस्थीनि तत्रत्यानि । योऽयं वहो वहनयोग्यंप्रदेशः स्वपाः शोभनकर्मा वहेत्यन्तः स्वपाः सोयमिन्द्रस्य भागः । स्कन्धोऽवयवभेदेन षोढा भिन्नः । तत्रात्यन्तचञ्चलोऽवयवो रुद्रस्य । तत्तदनन्तरभाविनोऽहोरात्रादीनाम् ॥

इति माधवीये पञ्चमे सप्तमे अष्टादशोनुवाकः.

---

[1]आनन्दः प्रसिद्धः । नन्दथुः प्रजननसुखम् । 'द्वितोऽथुच्' । कामः प्रसिद्धः । प्रत्यासौ प्रास्यौ त्वचौ प्रत्यस्यते प्रक्षिप्यते याभ्यां

भ्यां भयꣳ शितीमभ्यां प्रशिषं प्र-
ज्ञासाभ्याꣳ सूर्याचन्द्रमसौ वृक्या-
भ्याꣳ श्यामशबलौ मतस्नाभ्यां
व्युष्टिꣳ रूपेण निर्भुक्तिमरूपेण॥५१

प्रत्यासाभ्यामिति प्रति–आसाभ्याम् । भयम् । शितीमभ्यामिति शितीम–भ्याम् । प्रशिषमिति प्र–शिषम् । प्रज्ञासाभ्यामिति प्र–ज्ञासाभ्याम् । सूर्याचन्द्रमसाविति सूर्या–चन्द्रमसौ । वृक्याभ्याम् । श्यामशबलाविति श्याम–शबलौ । मतस्नाभ्याम् । व्युष्टिमिति वि–उष्टिम् । रूपेण । निर्भुक्तिमिति नि–र्भुक्तिम् । अरूपेण ॥ ५१ ॥

आनन्दꣳ षोडश ॥ १९ ॥

नजननम् । असेः करणे घञ् । थाथाद्घिनोत्तरपदान्तोदात्तत्वम् । नयं प्रसिद्धम् । शितीमभ्यां उदगेरशुक्लाभ्यां? स्थानाभ्याम् । द्रव्याभ्यामितीत्यन्ये । गुणेन गुणिनो लक्षणमिति इमनिच्, तस्य छान्दसं दीर्घत्वम् । प्रशिषं प्रशासकम् । शासः क्वौ उपधाया इत्वम् । प्रज्ञासौ अक्षिगोळके प्रकर्षेण ज्ञात्यसभ्यां प्रमेयमिति पूर्ववत्प्रत्ययः वरश्च । सूर्याचन्द्रमसौ प्रसिद्धौ । वृक्याभ्यां स्वल्पाम्रफलसदृशाभ्यां गांसाभ्याम् । श्यामशबलौ तमःप्रकाशौ मतस्नाभ्यां महासिराभ्याम् । व्युष्टिं प्रभातम् । 'तादौ च' इति गतेः प्रकृतिवरत्वम्, 'उदात्तस्वरितयोर्यणः' इतीकारस्स्वर्यते । रूपेण शुक्लादि-

अहंर्मा॒ꣳसेन॒ रात्रिं॑ पीवं॒साऽपो॑ यू॒-
षेण॑ घृ॒तꣳ रसे॑न॒ इयां॑ वस॑या दू॒षी-
का॑भिर्हा॒दुनि॑मश्रु॑भिः पृष्वां॑ दि॒वꣳ॑
रू॒पेण॒ नक्ष॑त्राणि॒ प्रति॑रूपेण पृथि॒वीं॑
च॒र्मणा॒ छवीं॑ छ॒व्योपा॑कृताय॒ स्वा-

[1]अहः॑ । मा॒ꣳसेन॑म् । रात्रि॑म् । पीव॑सा । अ॒पः॑ ।
यू॒षेण॑ । घृ॒तम् । रसे॑न । इ॒याम् । वस॑या । दू॒षी-
का॑भिः । हा॒दुनि॑म् । अश्रु॑भिरित्यश्रु॑-भिः । पृ-
ष्वा॑म् । दिव॑म् । रू॒पेण॑ । नक्ष॑त्राणि । प्रति॑रूपेणे-
ति॒ प्रति॑-रू॒पेण॑ । पृ॒थि॒वीम् । च॒र्मणा॑ । छ॒वीम् ।

रूपवता । मत्वर्थीयो लुप्यते । निस्रुक्तिरस्तमयः । स एव स्वरः । अरूपेण गन्धादिना ॥

इति पञ्चमे सप्तमे एकोनविंशोनुवाकः.

---

[1]अहर्मांसेन । गतम् । रात्रिः प्रसिद्धा । पीवसा रेतः प्रावरण-चर्मणा । अपः प्रसिद्धाः । यूषेण यूष्णा पक्वमांसान्निस्स्रुतेन ज-लेन । घृतं रसेन । गतम् । श्याम् अवश्यायः, श्वायतेर्विच् । वसया स्नेहविशेषेण । दूषीका अक्ष्मिलम् । छान्दसं दीर्घत्वम् । ह्लादुनिं हृदयस्थं जलम् । अश्रूणि प्रसिद्धानि । प्रुष्वां निम्नस्थं जलम् । द्यौः प्रसिद्धा । रूपं मुख्यं स्वरूपम् । नक्षत्राणि

हाऽऽलंब्धाय॒ स्वाहा॑ हुताय॒ स्वा-
हा॑ ॥ ५२ ॥
अग्नेः॑ पंक्षतिस्सरंस्वत्यै॒ निपं॑क्षति-
स्सोमंस्य तृतीया॒ऽपां चंतुर्थ्यो॑षंधी-
नां पञ्चमी संवथ्स॒रस्यं॑ षष्ठी म॒रु-

छ॒व्या॑ । उपाकृं॒तायेत्युंप-आकृंताय । स्वाहा॑ । आलंब्धा॒येत्या-ल॒ब्धा॒य॒ । स्वाहा॑ । हुतायं । स्वा-हा॑ ॥ ५२ ॥

अहं॑रष्टावि॒ꣳशतिः ॥ २० ॥

[1]अग्नेः॑ । प॒क्षतिः॑ । सर॑स्वत्यै । निपं॑क्षति॒रिति॒ नि-प॒क्ष॒तिः॑ । सोमं॑स्य । तृ॒तीया॑ । अ॒पाम् । च॒-तु॒र्थी । ओष॑धीनाम् । प॒ञ्च॒मी । सं॒व॒त्स॒रस्ये॑ति॑

प्रसिद्धानि । प्रतिरूपं मुखसदृशम् । पृथिवीं चर्मणा । गतम् । छविं आकारशोभाम् । 'कृदिकारादक्तिनः' इति ङीष् । छव्या चर्मपुटेन सूक्ष्मेण । उपाकृतायेत्यादि । गतम् । उपाकृतावस्थोऽश्वो देवता । आलब्धा नियुक्ता ॥

इति पञ्चमे सप्तमे विंशोनुवाकः.

---

[1]अग्नेः पक्षतिः पक्षमूलं पक्षतिः पार्श्ववङ्क्रीणां प्रथमः पक्षतिः । सरस्वत्यै निपक्षतिः निकृष्टा पक्षतिः द्वितीया वङ्क्रीः । एवं तृतीयादयस्सोमादीनाम् । द्यावापृथिव्योः पार्श्वम् । 'पर्शोर्ण-

ताꣳ सप्तमी बृहस्पतेरष्टमी मित्रस्य नवमी वरुणस्य दशम्यिन्द्रस्यैकादशी विश्वेषां देवानां द्वादशी द्यावापृथिव्योः पार्श्वं यमस्य पाटूरः ॥५३॥

वायोः पक्षतिस्सरस्वतो निपक्षति-

सं—वत्सरस्य । षष्ठी । मरुताम् । सप्तमी । बृहस्पतेः । अष्टमी । मित्रस्य । नवमी । वरुणस्य । दशमी । इन्द्रस्य । एकादशी । विश्वेषाम् । देवानाम् । द्वादशी । द्यावापृथिव्योरिति द्यावा—पृथिव्योः । पार्श्वम् । यमस्य । पाटूरः ॥ ५३ ॥

अग्नेरेकान्नत्रिꣳशत् ॥ २१ ॥

[1]वायोः । पक्षतिः । सरस्वतः । निपक्षतिरिति

स्वक्तव्यः' इति णसि 'सिति च' इति पदत्वादेर्गुणाभावः । पर्शवः पार्श्ववड्क्रयः । 'देवताद्वन्द्वे च' इति द्यावापृथिवीशब्द आद्युदात्तः, 'नोत्तरपदे' इति प्रतिषेधे पृथिव्यादिपर्युदासात् 'उदात्तयणः' इति विभक्तेरुदात्तत्वम् । यमस्य पाटूरः सर्वपशुविधारणोस्थिविशेषः ॥

इति पञ्चमे सप्तमे एकविंशोनुवाकः

---

[1]वायोः पक्षतिः पार्श्वान्तं पूर्वेण व्याख्यातम् ॥

इति पञ्चमे सप्तमे द्वाविंशोनुवाकः.

श्चन्द्रमंसस्तृतीया नक्षत्राणां चतुर्थी
सवितुः पञ्चमी रुद्रस्य षष्ठी सर्पा-
णाꣳ सप्तम्यर्यम्णोऽष्टमी त्वष्टुर्नवमी
धातुर्दशमीन्द्राण्या एकादश्यदित्यै
द्वादशी द्यावापृथिव्योः पार्श्वं यस्यै
पाटूरः ॥ ५४ ॥
पन्थामनूवृग्भ्याꣳ संतातिꣳ स्रावन्या-
भ्याꣳ शुकान्पित्तेनं हरिमाणं

नि-पक्षतिः । चन्द्रमसः । तृतीया । नक्षत्राणाम् । चतुर्थी । सवितुः । पञ्चमी । रुद्रस्य । षष्ठी । सर्पाणाम् । सप्तमी । अर्यम्णः । अष्टमी । त्वष्टुः । नवमी । धातुः । दशमी । इन्द्राण्याः । एकादशी । अदित्यै । द्वादशी । द्यावापृथिव्योरिति द्यावा-पृथिव्योः । पार्श्वम् । यस्यै । पाटूरः ॥ ५४ ॥

वायोरष्टाविꣳशतिः ॥ २२ ॥

[1]पन्थाम् । अनूवृग्भ्यामित्यनूवृक्-भ्याम् । संतातिमिति सं-तातिम् । स्रावन्याभ्याम् । शुकान् ।

---

[1]पन्याः प्रसिद्धः । द्वितीयाया अप्याकारश्छान्दसः । अनूवृग्भ्यां अनुवृत्ताभ्यां सिराविशेषाभ्याम् । वर्णव्यत्ययेन ककारः ।

यक्का हलीक्ष्णान्पापवातेन कूश्मा-
ञ्छकृभिरुशवर्तानूवध्येन शुनो वि-
शसनेन सर्पान्लोहितगन्धेन वयाꣳ-
सि पक्कगन्धेन पिपीलिकाः प्रशा-
देन ॥ ५५ ॥

पित्तेन । हरिमाणम् । यक्का । हलीक्ष्णान् । पाप-
वातेनेति पाप-वातेन । कूश्मान् । शकृभिरिति
शकृ-भिः । शवर्तान् । ऊवध्येन । शुनः । विश-
सनेनेति वि-शसनेन । सर्पान् । लोहितगन्धेनेति
लोहित-गन्धेन । वयाꣳसि । पक्कगन्धेनेति पक्क-
गन्धेन । पिपीलिकाः । प्रशादेनेति प्र-शादेन ॥५५

पन्थां द्वाविꣳशतिः ॥ २३ ॥

'न हि वृति' इत्यादिना दीर्घत्वम् । सन्ततिः प्रसिद्धा, स्नावा-
नस्सिराः स्नावभ्योऽभितः स्नावन्यौ सर्वसिरानुग्राहिण्यौ सिराविशेषौ
पार्श्वयोः । स्वार्थिको वा यत् । शुकान् पित्तेन गतम् । हरि-
माणं कामिलादि हरिणस्वभावम् । 'तुरिष्ठेमेयस्सु' इति टिलो-
पः । यक्का मांसपिण्डविशेषेण वर्तुलाकारेण । 'पद्दन्' इत्या-
दिना यकृच्छब्दस्य यकन्नादेशः । हलीक्ष्णान् तृणासंह्मान् । पा-
पवातेन आमवालजाः क्षुद्रजन्तवः । ऊवध्येन उदरस्थेन पुरीषे-
ण । श्वानः प्रसिद्धाः । विशसनेन शस्त्रादिलग्नेन मांसेन ।

क्रमैरत्यक्रमीद्वाजी विश्वैर्देवैर्यज्ञियैः
संविदानः । स नो नय सुकृतस्य
लोकं तस्य ते वयꣳ स्वधया म-
देम ॥ ५६ ॥

[1]क्रमैः । अतीतिं । अक्रमीत् । वाजी । विश्वैः ।
देवैः । यज्ञियैः । संविदान इतिं सं–विदानः । सः ।
नः । नय । सुकृतस्येतिं सु–कृतस्यं । लोकम् ।

सर्पान् लोहितगन्धेन रुधिरगन्धेन । वयांसि पक्वगन्धेन पाक्वेन मांसेन । पिपीलिकाः प्रशादेन भूमौ विशीर्णेन । शद निशातने । पूर्वपदान्तोदात्तत्वम् ॥

इति पञ्चमे सप्तमे त्रयोविंशोनुवाकः.

---

[1]अथ 'चित्तं सन्तानेन'* इत्यादि चतुर्दशानुवाकः आरण्यानुवाक्यः 'प्रयासाय स्वाहा'* इति पञ्चदश आरण्योनुवाक्यः परस्ताद्व्याख्यास्येते । ब्राह्मणं च भवति—'चतुर्दशैताननुवाकान् जुहोत्यनन्तरित्यै। प्रयासाय स्वाहेति पञ्चदशम्'† इति। अथोत्तराभ्यामनुवाकाभ्यां अश्वस्य हृदयमभिमन्त्रयते । क्रमैरिति पुरुस्ताज्ज्योतिषा त्रिष्टुभा ॥ क्रमैरात्मीयैः पादविक्षेपैः अयं वाजी अत्यक्रमीत् अन्यानत्यागच्छत् महानुभावः सञ्जातः । तदेवाह—विश्वैर्देवैर्यज्ञियैः यज्ञार्हैः देवैः संविदानः ऐकमत्यं गतः । 'समोगमृच्छि' इत्यात्मनेपदम् । कर्मणि वा लटि व्यत्ययेन यगभावः । ज्ञायमान इत्यर्थः । स त्वमस्मान्

---

*सं.१-४-३६, ३५. †ब्रा. ३-९-११.

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्माऽन्तरिक्षꣳ समुद्रो योनिस्सूर्यस्ते च क्षुर्वातः प्राणश्चन्द्रमाश्श्रोत्रं मासाश्चार्धमासाश्च पर्वाण्यृतवोऽङ्गानि संवथ्सरो महिमा ॥ ५७ ॥

तस्य । ते । वयम् । स्वधयेति स्व–धया । मदेम ॥ ५६ ॥

क्रमैरष्टादश ॥ २४ ॥

[1]द्यौः । ते । पृष्ठम् । पृथिवी । सधस्थमिति सध–स्थम् । आत्मा । अन्तरिक्षम् । समुद्रः । योनिः । सूर्यः । ते । चक्षुः । वातः । प्राण इति प्र–अनः । चन्द्रमाः । श्रोत्रम् । मासाः । च । अर्धमासा इत्यर्ध–मासाः । च । पर्वाणि । ऋतवः । अ-

---

सुकृतस्य सुष्ठुकृतस्य कर्मणः फलभूतं लोकं स्थानं नय प्रापय । 'सूपमानात्कः' इति सुकृतशब्दोन्तोदात्तः । तस्य तादृशस्य तव सम्बन्धि तादृशेन त्वया तत्र स्थाने स्वधयाऽन्नेन वयं मदेम । 'लिङ्याशिष्यङ्' ॥

इति पञ्चमे सप्तमे चतुर्विंशोनुवाकः.

---

[1]द्यौस्ते पृष्ठमिति ॥ सर्वात्मतया अश्वस्स्तूयते । पृष्ठमुपरिभागः ।

अग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निस्स तै लोकस्तं जेष्यस्यथाव जिघ्र वायुः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्वायुस्स तै लोकस्तस्मात्त्वाऽन्तरैष्यामि यदि नावजिघ्रङ्गानि । संवत्सर इति सं—वत्सरः । महिमा ॥५७

द्यौः पञ्चविꣳशतिः ॥ २५ ॥

[1]अग्निः । पशुः । आसीत् । तेन । अयजन्त । सः । एतम् । लोकम् । अजयत् । यस्मिन्न् । अग्निः । सः । ते । लोकः । तम् । जेष्यसि । अथ । अवेति । जिघ्र । वायुः । पशुः । आसीत् । तेन । अयजन्त । सः । एतम् । लोकम् । अजयत् । यस्मिन्न् । वायुः । सः । ते । लोकः । तस्मात् । त्वा । अन्तः । एष्यामि । यदि । न । अवजिघ्र-

---

सधस्थं सहस्थानम् । 'सुपि स्थः' इति कः । 'सधमाधस्थयोः' इति सधादेशः ॥

इति भट्टभास्करमिश्रविरचिते ज्ञानयज्ञाख्ये यजुर्वेदभाष्ये पञ्चमकाण्डे सप्तमप्रश्ने पञ्चविंशोनुवाकः.

———

स्यादित्यः पशुरासीत्तेनायजन्त स
एतं लोकमजयद्यस्मिन्नादित्यस्स तं
लोकस्तं जेष्यसि यद्यवजिघ्रसि॥५८

सीत्यव-जिघ्रसि । आदित्यः । पशुः । आसीत् । तेन । अयजन्त । सः । एतम् । लोकम् । अजयत् । यस्मिन्न् । आदित्यः । सः । ते । लोकः । तम् । जेष्यसि । यदि । अवजिघ्रसीत्यव-जिघ्रसि ॥ ५८ ॥

यस्मिन्नष्टौ च ॥ २६ ॥

---

[1]*अथ यदुक्तमश्वमेधब्राह्मणे 'अग्निः पशुरासीदित्यवघ्रापयेत्'† इति तमिमं मन्त्रमस्मिन् षड्विंशानुवाके पठति—अग्निः पशुरासीदिति ॥ हे अश्व अयं अग्निः देवः पुरा कस्मिंश्चित् जन्मनि त्वमिवाश्वमेधे यागहेतुश्चाश्वः पशुरासीत् । तेन अग्निरूपेण पशुना केचित् यजमाना अयजन्त । स च पशुरग्निर्देवो भूत्वा लोकं एतं अजयत् । यस्मिन् लोके सः अग्निः इदानीं तिष्ठति सः एव तवापि लोको भविष्यति, त्वं च तं लोकं जेष्यसि । अथैवं सति त्वमुत्सुकः सन् इदमुदकं जिघ्र । एवं वाय्वादित्यवाक्ययोरपि योज्यम् । वायुवाक्ये तु व्यतिरेकोपन्यासः—यदि उदकं नावजिघ्रसि तर्हि तस्मात् वायुलोकात् त्वां अन्तः एष्यामि त्वमन्तरितस्तस्माल्लोकाद्भ्रष्टो यथा

---

*एतस्यान्तिमानुवाकस्यापि भाष्यमत्रत्येषु भट्टभास्करभाष्यकोशेषु नोपलभ्यत इति माधवीयमेवात्र योजितम्.

†तै. ब्रा. ३-९-५.

यो वा अयंथादेवतं त्वामग्न इन्द्रस्य चित्ति यथा वै वयो वै यदाकूताद्यास्ते अग्ने मयि गृह्णामि प्रजापतिस्सोस्माथ्स्तेगान् वाजं कूर्मान् योक्तं मित्रावरुणाविन्द्रस्य पूष्ण ओजं आनन्दमहरग्नेर्वायोः पन्थां ऋमैद्यौस्तेऽग्निः पशुरासीथ्षड्विंशतिः ॥ २६ ॥

यो वा एवाहुतिमभवन्पथिभिरवरुह्यान्नन्दमष्टौपश्चाशत् ॥ ५८ ॥

यो वा अयंथादेवतं यद्यवजिघ्रसि.

हरिः ओम्—श्रीकृष्णार्पणमस्तु.

पञ्चमकाण्डे सप्तमप्रपाठकः

काण्डश्च समाप्तः.

भवसि तथा करिष्यामि । आदित्यवाक्ये तु अग्निवाक्यवदन्वयः—यद्युदकं अवजिघ्रसि तर्हि तमादित्यलोकं जेष्यसि ॥

इति माधवीये पञ्चमे सप्तमे षड्विंशोनुवाकः.

प्रपाठकः काण्डश्च समाप्तः.

शुद्धिपत्रिका.

पृष्ठे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
१२	१०	सः	सः ।
२७	९	द्वितीयम्	द्वितीयंम्
३०	३	षाणं	षाणं
३१	१	जिंगा	जिगा
४०	१२	जङ	जङ्घ
४२	६	ऐन्द्राग्नी	ऐन्द्राग्नी
६४	,,	वै	वै
७१	१३	त्यां	त्या
८१	२	न्यङ्कुः	न्यङ्कुः
१३३	१०	षड्	षट्
१५०	२	नैवैन	नैवैन
१५८	१४	चितीक ।	चितीक
१७१	३	तता	तैता
१७६	४	बशा	वशा
,,	५	वश	वशे
१९८	८	ऋछतु	ऋच्छतु
२०१	३	भि सं	भि सं
२४७	१	अग्नयः	अग्नयंः

शुद्धिपत्रिका.

पुटे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
५८	३	देवैर्मिश्रि	देवैर्मिश्र
५९	४	ब्राह्मणम्	ब्राह्मणम् ।
९९	१०	५-६-२.[2]	५-६-२[3]
११९	१	प्रथमोऽ	प्रथमो
१९२	२	षष्ट्रकारो	षट्रकारो